
Acc No 8310




SRI CHAMARAJENDRA SANSKRIT COLLEGE
FORT, BANGALORE.
LIBRARY


रत्नप्रभासहितशारीरकमीमांसाभाष्यप्रारंभः ॥


शंकराचा.
व्यास
॥ शंकरं शंकराचार्यं केशवं बादरायणं सूत्रभाष्य कृतोवंदे भगवंतोपुनःपुनः॥

श्रीगणेशायनमः॥ ॥ हरिः ॐ ॥ ॥ यमिह कारुणिकं शरणंगतोऽस्यरिसहोदर आपमहत्पदं॥ तमहमाशु हरिं-
परमाश्रयेजनकजांकमनंतसुखाकृतिं ॥ १ ॥ श्रीगौर्यसिकलार्थदं निजपदांभोजेनमुक्तिप्रदं प्रौढविभवनं हरंतमनघं श्री-
ढुंढितुंडासिना ॥ वंदे चर्मकपालिकोपकरणैर्वैराग्यसौख्यात्परं नास्तीतिप्रदिशंतमंतविधुरं श्रीकाशिकेशं शिवं ॥ २ ॥ यत्कृ
पालवमात्रेणमूकोभवतिपंडितः॥ वेदशास्त्रशरीरांतां वाणीं वीणाकरां भजे ॥ ३ ॥ कामाक्षीदत्तदुग्धप्रचुरस्फुरन्नुत -
प्राज्यभोज्याधिपूज्य श्रीगौरीनायकाभिख्यकटनशिवरामार्यलब्धात्मबोधैः॥ ॥ श्रीमद्गोपालगीर्भिः प्रकटि
तपरमाद्वैतभासास्मितास्य श्रीमद्गोविंदवाणीचरणकमलगोभिर्वृतोहं यथालिः ॥ ४ ॥ मोक्षपुर्यां श्रीकांच्यां श्री
कामाक्ष्या दत्तं पायसं देवैरपिस्पृहणीयं प्राज्यं संपूर्णं प्रकृष्टाज्ययुक्तं वायन्नं भोज्यमन्नं तेनाधिपूज्याः श्रीशिवरामयो
गिनः॥ किंच शिवश्चासौरामश्चेतिस्वनाम्ना श्रीगौरीनायकयोरभेदं प्रकटयंतितेभ्यो गुरुभ्यो लब्धआत्मबोधो यैः -
श्रीमद्गोपालसरस्वतीभिः तैरित्यर्थः ॥ श्री शंकरं भाष्यकृतं प्रणम्य व्यासं हरिं सूत्रकृतं च वच्मि॥ श्रीभाष्यतीर्थे प-
र- हंसतुष्ट्यै वाग्जालबंधच्छिदमभ्युपायं॥ ५॥ ॥ अस्यार्थः अत्र भाष्ये कठिनवाग्रूपेण जालेन योबंधः जालबंध्या-
पक्षिणामिव परमहंसानां क्लेशकरः तन्नाशकं अभीष्टमुपायं वच्मीत्यर्थः॥ ५॥ विस्तृतग्रंथवीक्षायामलसं यस्य मान
सं ॥ व्याख्यातदर्थमारब्धा भाष्यरत्नप्रभाभिधा ॥ ६ ॥ श्रीमच्छारीरकं भाष्यं प्राप्य वाक् शुद्धिमाप्नुयात् ॥ ॥

इतिश्रमोमेसफलोगंगांरथ्योदकंयथा ॥ ७ ॥ यदज्ञानसमुद्भूतमिंद्रजालमिदं जगत् ॥ सत्यज्ञानसुखानंतं तद-
हंब्रह्मनिर्भयं ॥ ८ ॥ ॥ इहखलुस्वाध्यायोध्येतव्यइतिनित्याध्ययनविधिनाऽधीतसांगस्वाध्यायेतर्हिजिज्ञास-
स्वसोन्वेष्टव्यः सविजिज्ञासितव्यः आत्मा वा अरे द्रष्टव्यः श्रोतव्यइतिश्रवणविधिरुपलभ्यते तस्यार्थः अमृत-
त्वकामेनाद्वैतात्मविचार एव वेदांतवाक्यैः कर्तव्यइति तेनकाम्येननियमविधिना अर्थाभ्दिन्नात्मशास्त्रप्रवृत्तिः वै
दिकानांपुराणादिप्राधान्यंवानिरस्यतइतिवस्तुगतिः तत्रकश्चिदिहजन्मनि जन्मांतरे वानुष्ठितयज्ञादिभिर्निर्तांतं
विमलस्वांतोऽस्यश्रवणविधेः कोविषयः किंफलं कोधिकारीकः संबंधइतिजिज्ञासते तंजिज्ञासुमुपलभमानो भगवा
न्बादरायणस्तदनुबंधचतुष्टयंश्रवणात्मकशास्त्रारंभप्रयोजकंन्यायेननिर्णेतुमिदंसूत्रंरचयांचकार ॥ ॥
अथातो ब्रह्मजिज्ञासेति ॥ ॥ नन्वनुबंधजातंविधिसंनिहितार्थवादवाक्यैरेवज्ञातुंशक्यं ॥ ॥ तद्यथेह
कर्मचितोलोकः क्षीयतएवमेवामुत्रपुण्यचितोलोकः क्षीयतइतिश्रुत्यायत्कृतकंतदनित्यमितिन्यायवत्यानजाय
तेम्रियते वा विपश्चित् योवैभूमा तदमृतमतोन्यदार्तं इत्यादिश्रुत्या च भूमात्मानित्यः ततोन्यदनित्यमिति विवेकोलभ्य
ते कर्मणा कृष्यादिनाचितः संपादितः सस्यादिर्लोकोभोग्यइत्यर्थः विपश्चित् नित्यज्ञानस्वरूपः परीक्ष्यलोको- १
न्कर्मचितान्ब्राह्मणोनिर्वेदमायान्नास्त्यकृतः कृतेन आत्मनस्तुकामायसर्वंप्रियंभवति इत्यादिश्रुत्याऽना

त्प्रमात्रेदेहेंद्रियादिसकलपदार्थजातेवैराग्यंलभ्यते · परिक्ष्यानित्यत्वेननिश्चित्याकृतोमोक्षः कृतेनकर्मणानास्ती
तिकर्मतत्फलेभ्योवैराग्यंप्राप्तवानित्यर्थः शांतोदांतउपरतस्तितिक्षुःश्रद्धावित्तोभूत्वात्मन्येवात्मानंपश्येदितिश्रुत्या
शमादिषट्कंलभ्यते समाहितोभूत्वेतिकाण्वःपाठःउपरतिः सन्यासः नचपुनरावर्ततइतिस्वयंज्योतिरानंदात्म
कमोक्षस्यनित्यत्वश्रुत्यामुमुक्षालभ्यते तथाचविवेकादिविशेषणवानधिकारीतिज्ञातुंशक्यं यथायएता
रात्रीरुपयंतीतिरात्रिसत्रविधौप्रतितिष्टंतीत्यर्थवादस्थप्रतिष्ठाकामस्तद्वत्तथाश्रोतव्यइत्यत्रप्रत्ययार्थ-
स्यनियोगस्यप्रकृत्यर्थोविचारोविषयः विचारस्यवेदांताविषयाइतिशक्यंज्ञातुं आत्माद्रष्टव्यइतिअद्वैतात्म-
दर्शनमुद्दिश्यश्रोतव्यइतिविचारविधानात् नहिविचारः साक्षाद्दर्शनहेतुः अप्रमाणत्वात् अपितुप्रमाणविष-
यत्वेनप्रमाणंचाद्वैतात्मनिवेंदाताएवतंत्वौपनिषदंपुरुषंवेदांतविज्ञानसुनिश्चितार्थाइत्यादिश्रुतेः वेदांतानां
चप्रत्यक्ब्रह्मैक्यंविषयः। तत्वमस्यहंब्रह्मास्मीतिश्रुतेः एवंविचारविधेःफलमपिज्ञानद्वारामुक्तिः तरति -
शोकमात्मवित्ब्रह्मवेदब्रह्मैवभवतीतिश्रुतेः तथासंबंधोप्यधिकारिणाविचारस्यकर्तव्यतारूपः फलस्यप्रा -
प्यतारूपइतियथायोगंसुबोधः तस्मादिदंसूत्रंव्यर्थमितिचेन्न॥ तासामधिकार्यादिश्रुतीनांस्वार्थेतात्पर्यनि -
र्णायकसूत्राभावेकिंविवेकादिविशेषणवानधिकारीउतान्यः किंवेंदांताः पूर्वतंत्रेणगतार्थाअगतार्थावा -

किंब्रह्म प्रत्यगभिन्नंनवा किंमुक्तिः स्वर्गादिवल्लोकांतरं आत्मस्वरूपंवेति संशयानिवृत्तेः तस्मादागमवाक्यैरापात-
तः प्रतिपन्नाधिकार्यादिनिर्णयार्थमिदं सूत्रमावश्यकं ॥ तदुक्तं प्रकाशात्मश्रीचरणैः ॥ अधिकार्यादीनामागमि-
कत्वेपिन्यायेननिर्णयार्थमिदंसूत्रमिति ॥ येषांमते श्रवणेविधिर्नास्ति तेषामविहितश्रवणेधिकार्यादिनिर्णया
नपेक्षणात् सूत्रं व्यर्थमित्यापततीत्यलंप्रसंगेन ॥ तथाचास्य सूत्रस्य श्रवणविध्यपेक्षिताधिकार्यादिश्रुति
भिः स्वार्थनिर्णयायोद्धापितत्वाद्धेतुहेतुमद्भावः श्रुतिसंगतिः ॥ शास्त्रारंभहेत्वनुबंधनिर्णायकत्वेनोपोद्घा
तत्वात् शास्त्रादौसंगतिः ॥ अधिकार्यादिश्रुतीनांस्वार्थेसमन्वयोक्तेः समन्वयाध्यायसंगतिः । ऐतदात्म्यमिदं-
सर्वंतत्सत्यंस आत्मा तत्वमसीत्यादिश्रुतीनांसर्वात्मत्वादिस्पष्टब्रह्मलिंगानांविषयादौसमन्वयोक्तेः पादसंग
तिः ॥ एवंसर्वसूत्राणां श्रुत्यर्थनिर्णायकत्वात् श्रुतिसंगतिः । तत्तदध्यायेतत्तत्पादेच समानप्रमेयत्वेन संगतिरू
हनीया ॥ प्रमेयंच कृत्स्नशास्त्रस्य ब्रह्म । अध्यायानांसमन्वयाविरोधसाधनफलानि । तत्र प्रथमपादस्य स्पष्टब्र
ह्मलिंगानांसमन्वयः प्रमेयः ॥ द्वितीयतृतीययोरस्पष्टब्रह्मलिंगानांचतुर्थपादस्य पदमात्रसमन्वय इतिभेदः ।
अस्याधिकरणस्य प्राथम्यान्नाधिकरणसंगतिरपेक्षिता । अथाधिकरणमारभ्यते । श्रोतव्य इतिविहितश्रवणा- २
त्मकंवेदांतमीमांसाशास्त्रंविषयः । तत्किमारब्धव्यंनवेति विषयप्रयोजनसंभवासंभवाभ्यांसंशयः । तत्रनाहंब्र

ह्मेतिभेदग्राहिप्रत्यक्षेणकर्तृत्वाकर्तृत्वादिविरुद्धधर्मत्वलिंगकानुमानेनचविरोधेनब्रह्मात्मनोरैक्यस्यविषयस्या संभवात् सत्यबंधस्यज्ञानान्निवृत्तिरूपफलासंभवान्नारंभणीयमितिप्राप्तेसिद्धांतः । अथातोब्रह्मजिज्ञासेतिअ- त्रश्रवणविधिसमानार्थत्वायकर्तव्येतिपदमध्याहर्तव्यं । अध्याहृतंचभाष्यकृताब्रह्मजिज्ञासाकर्तव्येतितत्र प्रकृतिप्रत्ययार्थयोर्ज्ञानेच्छयोः कर्तव्यत्वानन्वयात् प्रकृत्याफलीभूतंज्ञानमजहल्लक्षणयोच्यते । प्रत्ययेनेच्छा- साध्योविचारोजहल्लक्षणयातथाचब्रह्मज्ञानायविचारः कर्तव्यइतिसूत्रस्यश्रौतार्थः संपद्यते । तत्रज्ञानस्य स्वतःफलत्वायोगात् प्रमातृत्वकर्तृत्वभोक्तृत्वात्मकानर्थनिवर्तकत्वेनैवफलत्वंवक्तव्यं ॥ तत्रानर्थस्यसत्यत्वे- ज्ञानमात्रान्निवृत्त्ययोगादध्यस्तत्वंवक्तव्यमितिबंधस्याध्यस्तत्वंअर्थात्सूचितं तच्चशास्त्रस्यविषयप्रयोजनव त्वसिद्धिहेतुः तथाहिशास्त्रमारब्धव्यंविषयप्रयोजनवत्वात् भोजनादिवत् शास्त्रंप्रयोजनवत् बंधनिवर्त- कज्ञानहेतुत्वात् रज्जुरयमित्यादिवाक्यवत् ॥ बंधोज्ञाननिवर्त्यः अध्यस्तत्वात् रज्जुसर्पवत् इतिप्रयोजनसि द्धिः एवमर्थात्ब्रह्मज्ञानाज्जीवगतानर्थभ्रमनिवृत्तिफलंसूत्रयन्जीवब्रह्मणोरैक्यंविषयमप्यर्थात् सूचयति । अन्यज्ञानादन्यत्रभ्रमानिवृत्तेः जीवोब्रह्माभिन्नः । तज्ज्ञाननिवर्त्याध्यासाश्रयत्वात् यदित्थंतत्तथा ॥ यथा शुक्त्यभिन्नइदमंशइतिविषयसिद्धिहेतुरध्यासइत्येवंविषयप्रयोजनवत्वाच्छास्त्रमारंभणीयमिति ।

शा०भा
५

त्रेण ज्ञापितं तदास्मिन् भाष्ये युष्मत्पदेन युष्मच्छब्दजन्यप्रत्यययोग्यः परागर्थो लक्ष्यते अस्मच्छब्देनास्मच्छ- अ०प्र०पा०
ब्दजन्यप्रत्यययोग्यः प्रत्यगात्मा तथा च लक्ष्यतावच्छेदकतया शब्दोऽपि बोध्यत इति न त्वमादेशः ननु परा- १
क्प्रत्यक्त्वयोरेव लक्ष्यतावच्छेदकत्वं न शब्दयोग्यत्वांशस्य गौरवादिति वाच्यं पराक्प्रतीचोर्विरोधस्फु-
रणार्थं विरुद्धशब्दयोग्यत्वस्यापि वक्तव्यत्वात् अत एवेदमस्मत्प्रत्ययगोचरयोरिति वक्तव्येऽपीदंशब्दोऽस्म-
दर्थे लोके वेदे च बहुशः इमे वयमास्महे इमे विदेहा अयमहमस्मीति च प्रयोगदर्शनात् नास्मच्छब्दविरोधीति म-
त्वा युष्मच्छब्दः प्रयुक्तः इदंशब्दप्रयोगे विरोधास्फुर्तेः एतेन चेतनवाचित्वादस्मच्छब्दः पूर्वं प्रयोक्तव्यः अ-
भ्यर्हितं पूर्वमिति न्यायात् त्यदादीनि सर्वैर्नित्यमिति सूत्रेण विहित एकशेषश्च स्यादिति निरस्तं युष्मदस्म-
दोरिति सूत्र इवात्रापि पूर्वनिपातैकशेषयोरप्राप्तेरेकशेषविवक्षितविरोधास्फूर्तेश्च वृद्धास्तु युष्मदर्थादनात्मनो
निष्कृष्य शुद्धस्य चिद्धातोरध्यारोपापवादन्यायेन ग्रहणं द्योतयितुमादौ युष्मद्ग्रहणमित्याहुः तत्र युष्मद-
स्मत्पदाभ्यां पराक्प्रत्यक्त्वेनात्मानात्मनोर्वस्तुतो विरोध उक्तः प्रत्ययपदेन प्रतीतितो विरोध उक्तः प्रती-
यत इति प्रत्ययो हंकारादिरनात्मा दृश्यतया भाति आत्मा तु प्रतीतित्वात् प्रत्ययः स्वप्रकाशतया भाति ५
गोचरपदेन व्यवहारतो विरोध उक्तः युष्मदर्थः प्रत्यगात्मतिरस्कारेण कर्ताहमित्यादिव्यवहारगोचरः

अस्मदर्थस्त्वनात्मविलापेनाहंब्रह्मेति व्यवहारगोचर इति त्रिधा विरोधः स्फुटीकृतः युष्मच्चास्मच्च यु
ष्मदस्मदी ते एव प्रत्ययौ च तौ गोचरौ चेति युष्मदस्मत्प्रत्ययगोचरौ तयोस्त्रिधा विरुद्धस्वभावयोरितरेतरभा
वो त्यंताभेदस्तादात्म्यं वा तदनुपपत्तौ सिद्धायामित्यन्वयः ऐक्यासंभवेपि शुक्लो घट इतिवत्तादात्म्यं किं न -
स्यादित्यत आह विषयविषयिणोरिति चिज्जडयोः विषयविषयित्वाद्दीपघटयोरिव न तादात्म्यमिति भावः
युष्मदस्मदी पराक्प्रत्यक्वस्तुनी ते एव प्रत्ययश्च गोचरश्चेति वा विग्रहः अत्र प्रत्ययगोचरपदाभ्यां आत्मा -
नात्मनोः प्रत्यक्पराग्भावे चिदचित्त्वं हेतुमाह विषयविषयिणोरिति अनात्मनो ग्राह्यत्वादचित्त्वं आत्मन
स्तु ग्राहकत्वाच्चित्त्वं वाच्यं अचित्त्वे स्वस्य स्वेन ग्रहणस्य कर्मकर्तृत्वविरोधेनासंभवादप्रत्यक्षत्वापत्तेरित्य-
र्थः यथेष्टं वा हेतुहेतुमद्भावः नन्वेवमात्मानात्मनोः पराक्प्रत्यक्त्वेन चिदचित्त्वेन ग्राह्यग्राहकत्वेन च विरोधा
त्तमःप्रकाशवदैक्यस्य तादात्म्यस्य वानुपपत्तौ सत्यां तत्प्रमित्यभावेनाध्यासाभावेपि तद्धर्माणां चैतन्यस्फुरण जा
ड्यदुःखादीनां विनिमयेनाध्यासोस्त्वित्यत आह तद्धर्माणामपीति तयोरात्मानात्मनोर्धर्मास्तद्धर्मास्तेषामपीत
रेतरभावानुपपत्तिः इतरत्र धर्म्यंतरे इतरेषां धर्माणां भावः संसर्गस्तस्यानुपपत्तिरित्यर्थः नहि धर्मिणोः -
संसर्गं विना धर्माणां विनिमयोस्ति स्फटिके लोहितवस्तुसान्निध्याल्लौहित्यधर्मसंसर्गः असंगात्मधर्मिणः

केनाप्यसंसर्गाद्धर्मिसंसर्गपूर्वकोधर्मसंसर्गः कुतस्त्यइत्यभिप्रेत्योक्तंसुतरामिति नन्वात्मानात्मनोस्तादात्म्य स्यतद्धर्मसंसर्गस्यचाभावेप्यध्यासः किंनस्यादित्यतआह ॥ १॥ इत्यतइति इत्युक्तरीत्यातादात्म्याद्यभावे नतत्प्रमायाअभावादतः प्रमाजन्यसंस्कारस्याध्यासहेतोरभावात् ॥ अध्यासोमिथ्येतिभवितुंयुक्तमित्यन्व यः मिथ्याशब्दोद्व्यर्थः अपन्हववचनः अनिर्वचनीयतावचनश्चेति अत्रचापन्हवार्थः ननुकुत्रकस्याध्यासो पन्हूयते ॥

इत्यतोस्मत्प्रत्ययगोचरेविषयिणिचिदात्मके युष्मत्प्रत्ययगोचरस्यविषयस्यतद्धर्माणांचा-
ध्यासः तद्विपर्ययेणविषयिणस्तत्धर्माणांचविषयेध्यासोमिथ्येतिभवितुंयुक्तं ॥

इत्याशक्यआत्मन्यनात्मतत्धर्माणां अनात्मन्यात्मतद्धर्माणामध्यासोनिरस्यतइत्याह अस्मत्प्रत्ययगो चरइत्यादिनाअहमितिप्रत्यययोग्यत्वंबुध्यादेरप्यस्तीतिमत्वातत आत्मानंविवेचयतिविषयिणीति बु ध्यादिसाक्षिणीत्यर्थः साक्षित्वेहेतुश्चिदात्मकइति अहमितिभासमानेचिदंशात्मनीत्यर्थः युष्मत्प्रत्य- यगोचरस्येतित्वंकारयोग्यस्येदमर्थस्येतियावत् नन्वहमितिभासमानबुध्यादेः कथमिदमर्थत्वमित्यत आह विषयस्येतिसाक्षिभास्यस्येत्यर्थः साक्षिभास्यत्वरूपलक्षणयोगात् बुध्यादेर्घटादिवदिदमर्थत्वंनप्र ६

तिभासत इतिभावः अथवायदात्मनोमुख्यंसर्वांतरत्वरूपंप्रत्यक्त्वंप्रतीतित्वंब्रह्मास्मीतिव्यवहारगोचरत्वंचोक्तंत
दसिद्धं अहमितिप्रतीयमानत्वात् अहंकारवदित्याशंक्याह अस्मत्प्रत्ययगोचरइति अस्मच्चासोप्रत्ययश्चासो-
गोचरश्चतस्मिन्नित्यर्थः अहंवृत्तिव्यंग्यस्फुरणत्वंस्फुरणविषयत्वंवाहेतुः आद्येदृष्टांतेहेत्वसिद्धिः द्वितीयेतुप
क्षेतदसिद्धिरित्यात्मनोमुख्यंप्रत्यक्त्वादिकमुक्तमितिभावः ननुयदात्मनोविषयित्वंतदसिद्धंअनुभवामीतिशब्द
वत्वात् अहंकारवदित्यतआह विषयिणीतिवाच्यत्वंलक्ष्यत्वंवाहेतुः नाद्यःपक्षेतदसिद्धेः नांत्यःदृष्टां
तेतद्वैकल्यादितिभावः देहंजानामीतिदेहाहंकारयोर्विषयविषयित्वेपिमनुष्योहमित्यभेदाध्यासवत् आ
त्माऽहंकारयोरप्यध्यासस्यादित्यतआह चिदात्मकइति तयोर्जडत्वात्मत्वाभ्यांसादृश्याद्ध्यासेपिचिदात्मन्यन
वच्छिन्नेजडाल्पाहंकारादेर्नाध्यासइतिभावः अहमितिभास्यत्वादात्मवदहंकारस्यापिप्रत्यक्त्वादिकंमुख्यमेवत
तःपूर्वोक्तपरात्मत्वाद्यसिद्धिरित्याशंक्याह युष्मदिति अहंवृत्तिभास्यत्वमहंकारेनास्तिकर्तृकर्मत्वविरोधात् चिद्रा
स्यत्वंचिदात्मनिनास्तीतिहेत्वसिद्धिः अतोबुध्यादेःप्रतिभासतःप्रत्यक्त्वेपिपरात्मत्वादिकंमुख्यमेवेतिभावः
यष्मत्पराक् तच्चासोप्रतीयतइतिप्रत्ययश्चासोकर्तृत्वादिव्यवहारगोचरश्चतस्येतिविग्रहः तस्यहेयत्वा
र्थमाहविषयस्येतिषिञ्बंधनेविषिणोतिबध्नातीतिविषयस्तस्येत्यर्थः आत्मन्यनात्मतद्धर्माध्यासोमि-

बलात्सत्यस्यापिज्ञानान्निवृत्तिसंभवात् अध्यासवर्णनंव्यर्थमितितन्न ज्ञानमात्रनिवर्त्यस्यक्वापिसत्यत्वादर्श
नात्सत्यस्यचात्मनोनिवृत्यदर्शनाच्च अयोग्यतानिश्चयेसतिसत्यबंधस्यज्ञानान्निवृतिश्रुतेर्बोधकत्वायोगा-
न्नचसेतुदर्शनात्सत्यस्यपापस्यनाशदर्शनान्नायोग्यतानिश्चयइतिवाच्यं तस्यश्रद्धानियमादिसापेक्षज्ञा-
ननाश्यत्वात् बंधस्यच नान्यः पंथाइतिश्रुत्याज्ञानमात्रान्निवृत्तिप्रतीतेः अतः श्रुतज्ञाननिवर्त्यत्वनिर्वाहि
र्थमध्यस्तत्वंवर्णनीयंकिंचज्ञानैकनिवर्त्यस्यकिंनामसत्यत्वं नतावदज्ञानाजन्यत्वं मायांतुप्रकृतिमितिश्रुतिवि
रोधात् मायाविद्ययोरैक्यात् नापिस्वाधिष्ठानेस्वाभावशून्यत्वं अस्थूलमित्यादिनिषेधश्रुतिविरोधात् नापिब्र
ह्म वद्बाधायोग्यत्वंज्ञानान्निवृत्तिश्रुतिविरोधात् अथव्यवहारकालेबाधशून्यत्वं तर्हिव्यावहारिकमेवस-
त्यत्वमित्यागतम ध्यस्तत्वंतच्चश्रुत्यर्थयोग्यताज्ञानार्थंवर्णनीयमेव यागस्यापूर्वद्वारत्ववत् नचतदनन्यत्वा
धिकरणादौतस्यवर्णनात्पौनरुक्त्यंतत्रोक्ताध्यासस्यैवप्रवृत्त्यंगविषयादिसिध्यर्थमादौस्मर्यमाणत्वादितिदिक्
अध्यासंद्वेधादर्शयतिलोकव्यवहारइतिलोक्यतेमनुष्योहमित्यभिमन्यतेइतिलोकोर्थध्यासः तद्विषयोव्यव-
हारोभिमानइतिज्ञानाध्यासोदर्शितः द्विविधाध्यासस्वरूपलक्षणमाह अन्योन्यस्मिन्नित्यादिनाधर्मधर्मिणो- ८
रित्यंतेन जाड्यचैतन्यादिधर्माणांधर्मिणोअहंकारात्मनोतयोरत्यंतभिन्नयो ॥ ॥ ॥ ॥

रितरेतरभेदाग्रहेणान्योन्यस्मिन् अन्योन्यतादात्म्यं अन्योन्यधर्मांश्च व्यत्यासेनाध्यस्य लोकव्यवहार इति यो ज-
नाअतः सोयमिति प्रमायाः नाध्यासत्वं तदिदमर्थयोः कालभेदेन कल्पितभेदेपि अत्यंतभेदाभावादिति वक्तुमत्यंते
त्युक्तं नच धर्मितादात्म्याध्यासे धर्माध्याससिद्धेर्धर्मांश्चेति व्यर्थमिति वाच्यं अंधत्वादीनामिंद्रियधर्माणां धर्म्यध्यासास्फु-
टत्वेप्यंधोहमिति स्फुटोध्यास इति ज्ञापनार्थत्वात् नन्वात्मानात्मनोः परस्पराध्यस्तत्वे शून्यवादः स्यादित्याशंक्याह -
सत्यानृते मिथुनीकृत्येति सत्यमनिदं चैतन्यं तस्यानात्मनि संसर्गमात्राध्यासो न स्वरूपस्यानृतं यक्ष्यदर्थः तस्य स्वरू-
पतोप्यध्यासात् तयोर्मिथुनीकरणमध्यास इति न शून्यतेत्यर्थः नन्वध्यासमिथुनीकरणलोकव्यवहारशब्दानां एकार्थ-
त्वे ध्यस्य मिथुनीकृत्येति पूर्वकालत्ववाचिक्त्वा प्रत्ययादेशस्य ल्यपः कथं प्रयोग इति चेन्न अध्यासव्यक्तिभेदात् तत्र पू-
र्वपूर्वाध्यासस्योत्तरोत्तराध्यासं प्रति संस्कारद्वारा पूर्वकालत्वेन हेतुत्वद्योतनार्थत्वात् ल्यप्प्रयोगः तदेवस्पष्टयति नैसर्गिक -
इति प्रत्यगात्मनि हेतुहेतुमद्भावेनाध्यासप्रवाहोनादिरित्यर्थः ननु प्रवाहस्य वस्तुत्वादध्यासव्यक्तीनां च सादित्वा -
त्कथमनादित्वमिति चेत् उच्यते अध्यासत्वावच्छिन्नव्यक्तीनां मध्ये न्यतमया व्यक्त्याविनादिकालस्यावर्तनं का-
र्यानादित्वमित्यंगीकारात् एतेन कारणाभावादिति विकल्पो निरस्तः संस्कारस्य निमित्तस्य नैसर्गिकपदेनोक्तत्वात्
नच पूर्वप्रमाजन्य एव संस्कारो हेतुरिति वाच्यं लाघवेन पूर्वानुभवजन्यसंस्कारस्य हेतुत्वात् अतः पूर्वाध्यासजन्यसं

स्कारोस्तीतिसिद्धं अध्यासस्योपादानमाह मिथ्याज्ञाननिमित्तइति मिथ्या च तदज्ञानं च मिथ्याज्ञानं तन्निमित्तमुपा-
दानं यस्य स तन्निमित्तस्तदुपादान इत्यर्थः अज्ञानस्योपादानत्वेपि संस्फुरदात्मतत्वावरकतया दोषत्वेनाहंकारा-
ध्यासकर्तुरीश्वरस्योपाधित्वेन संस्कारकालकर्मादिनिमित्तपरिणामित्वेन च निमित्तत्वमिति द्योतयितुं निमित्तपद -
स्वप्रकाशात्मन्यसंगे कथमविद्यासंगः इतिशंकानिरासार्थं मिथ्यापदं प्रचंडमार्तंडमंडले पेचकानुभवसिद्धांधकारवत् -
अहमज्ञ इत्यनुभवसिद्धं अज्ञानं दुरपन्हवं कल्पितस्याधिष्ठानास्पर्शित्वात् नित्यस्वरूपज्ञानस्याविरोधित्वाच्चेति -
यद्वा अज्ञानं ज्ञानाभाव इतिशंकानिरासार्थं मिथ्यापदं मिथ्यात्वे सति साक्षाज्ज्ञाननिवर्त्यत्वमज्ञानस्य लक्षणं मिथ्याज्ञा-
नपदेनोक्तं ज्ञानेनेच्छाप्रागभावः साक्षान्निवर्त्यत इति वदंतं प्रति मिथ्यात्वे सतीत्युक्तं अज्ञाननिवृत्तिद्वारा ज्ञाननिवर्त्य-
बंधोति व्याप्तिनिरासाय साक्षादिति अनाद्युपादानत्वे सति मिथ्यात्वं वा लक्षणं ब्रह्मनिरासार्थं मिथ्यात्वमिति -
मृदादिनिरासार्थमनादीति अविद्यात्मनोः संबंधनिरासार्थमुपादानत्वे सतीति संप्रति अध्यासं दृढयितुमभि-
लपति अहमिदं ममेदमिति आध्यात्मिककार्याध्यासेष्वहमिति प्रथमोध्यासः नचाधिष्ठानारोप्यांशद्वयानुप-
लंभात् नायमध्यास इति वाच्यं अयो दहतीतिवत् अहमुपलभ इति दृक्दृश्यांशयोरुपलंभात् इदंपदे-
न भोग्यः संघात उच्यते अत्राहमिदमित्यनेन मनुष्योहमिति तादात्म्याध्यासो दर्शितः ममेदं शरीरमिति सं -

सर्गाध्यासः ननु देहात्मनोस्तादात्म्यमेव संसर्ग इति तयोः कोभेद इति चेत् सत्यं सत्यैक्ये सति मिथो भेदस्तादात्म्यं त
त्र मनुष्योहमित्यैक्यांशभानं ममेदमिति भेदांशरूपसंसर्गभानमिति भेदः एवं सामग्री सत्वादनुभवसत्वादध्यासोस्ती
ति अतोब्रह्मात्मैक्ये विरोधाभावेन विषयप्रयोजनयोः सत्वात् शास्त्रमारंभणीयमिति सिद्धांतभाष्यतात्पर्यं -
एवं सूत्रेणार्थात्सूचिते विषयप्रयोजने प्रतिपाद्य तद्धेतुमध्यासं लक्षणसंभावनाप्रमाणैः साधयितुं लक्षणं पृच्छ-
ति आहेति · किंलक्षणकोध्यास इत्याह पूर्ववादीत्यर्थः अस्य शास्त्रस्य तत्वनिर्णयप्रधानत्वेन वादकथात्व-
द्योतनार्थं आहेति परोक्तिः आहेत्यादि कथं पुनः प्रत्यगात्मनीत्यंतः प्रागध्यासलक्षणपरं भाष्यं तदारभ्य सं

आह कोयमध्यासो नामेति उच्यते स्मृतिरूपः परत्र पूर्वदृष्टावभासः ॥

भावनापरं तमेतमविद्याख्यामित्यारभ्य सर्वलोकप्रत्यक्ष इत्यंतं प्रमाणपरमिति विभागः लक्षणमाह उच्यत इति स्मृति
रूप इति अध्यास इत्यनुषंगः अत्र परत्रावभास इत्येव लक्षणं शिष्टं पदद्वयं तदुपपादनार्थं तथाहि अवभास्य
त इत्यवभासो रजताद्यर्थः तस्यायोग्यमधिकरणं परत्र पदार्थः अधिकरणस्यायोग्यत्वमारोप्यात्यंताभाव-
त्वं तद्वत्वं वा तथा चैकावच्छेदेन स्वसंसृज्यमाने स्वात्यंताभाववति अवभास्यत्वमध्यस्तत्वमित्यर्थः इदं च सा-
धनाद्यध्याससाधारणं लक्षणं संयोगेति व्याप्तिनिरासाय एकावच्छेदेनेति ॥ ॥ ॥ ॥

संयोगस्यस्वसंसृज्यमानेवृक्षेस्वात्यंताभाववत्यवभास्यत्वेपिस्वस्वात्यंताभावयोर्मूलाग्रावच्छेदकयोर्भेदान्नातिव्याप्तिः पूर्वंस्वाभाववतिभूतलेपश्चादानीतोघटोभातीतिघटे अतिव्याप्तिनिरासायस्वसंसृज्यमानइतिपदं तेनस्वाभावकालेप्रतियोगिसंसर्गस्यविद्यमानतोच्यतइतिनातिव्याप्तिः भूत्वावच्छेदेनावभास्यगंधेतिव्याप्तिवारणाय स्वात्यंताभाववतीतिपदंसुक्ताविदंत्वावच्छेदेनरजतसंसर्गकालेत्यंताभावोस्तीतिनाव्याप्तिः नन्वस्यलक्षणस्यासंभवः शुक्तौरजतस्यसामग्र्यभावेनसंसर्गासत्वात् नचस्मर्यमाणसत्यरजतस्यैवपरत्रसुक्तावभास्यत्वेनाध्यस्तत्वोक्तिरितिवाच्यं अन्यथाख्यातिप्रसंगादित्यतआह स्मृतिरूपइति स्मर्यतइतिस्मृतिः सत्यरजतादिः तस्यरूपमिवरूपमस्येतिस्मृतिरूपः स्मर्यमाणसदृशइत्यर्थः सादृश्योक्त्यास्मर्यमाणादारोप्यस्यभेदान्नान्यथाख्यातिरित्युक्तंभवति सादृश्यमुपपादयति पूर्वदृष्टेतिदृष्टंदर्शनंसंस्कारद्वारापूर्वदर्शनादवभास्यतइतिपूर्वदृष्टावभासः तेनसंस्कारजन्यज्ञानविषयत्वंस्मर्यमाणारोप्ययोःसादृश्यमुक्तंभवति स्मृत्यारोप्ययोःसंस्कारजन्यत्वात् नचसंस्कारजन्यत्वादारोप्यस्यस्मृतित्वापत्तिरितिवाच्यं दोषसंप्रयोगजन्यत्वस्यापिविवक्षितत्वेनसंस्कारमात्रजन्यत्वाभावात् अत्रसंप्रयोगशब्देनअधिष्टानसामान्यज्ञानमुच्यते अहंकाराध्यासेइंद्रियसंप्रयोगाभावात् एवंचदोषसंप्रयोगसंस्कारबलाच्छुक्त्यादौरजतमुत्पन्नमस्तीतिपरत्रावभास्यत्व " " " " " " ॥

लक्षणमुपपंनमितिस्मृतिरूपपूर्वदृष्टपदाभ्यामुपपादितं अन्येतु ताभ्यां दोषादित्रयजन्यत्वं कार्यध्यासलक्षणमुक्तमित्या-
हुः अपरेतुस्मृतिरूपःस्मर्यमाणसदृशः सादृश्यंच प्रमाणाजन्यज्ञानविषयत्वंस्मृत्यारोप्ययोः प्रमाणाजन्यत्वात् पूर्वदृष्ट
पदं तज्जातीयपरं अभिनवरजतादेः पूर्वदृष्टत्वाभावात् तथाच प्रमाणाजन्यज्ञानविषयत्वेसति पूर्वदृष्टजातीयत्वंभा
तीतिकाध्यासलक्षणंताभ्यामुक्तं परत्रावभासशब्दाभ्यामध्यासमात्रलक्षणं व्याख्यातमेवतत्रस्मर्यमाणगंगादावभिनव
घटेचातिव्याप्तिनिरासाय प्रमाणेत्यादिपदद्वयमित्याहुः तत्रार्थध्यासेस्मर्यमाणसदृशः परत्रपूर्वदर्शनादवभास्यतइ-
तियोजना ज्ञानाध्यासेतुस्मृतिसदृशः परत्रपूर्वदर्शनादवभासतइतिवाक्यंयोजनीयमितिसंक्षेपः ननुअध्यासेवादिविप्र

तंकेचिदन्यत्रान्यधर्माध्यासइतिवदंति केचित्तुयत्रयदध्यासस्तद्विवेकाग्रहनिबंध
नोभ्रमइति अन्येतुयत्रयदध्यासस्तस्यैवविपरीतधर्मत्वकल्पनामाचक्षते ॥ ॥

तिपत्तेः कथमुक्तलक्षणसिद्धिरित्याशंक्याधिष्टानारोप्यस्वरूपविवादेपिपरत्रपरावभासइतिलक्षणसंवादाद्युक्तिभिः
सत्याधिष्टानेमिथ्यार्थावभाससिद्धेः सर्वतंत्रसिधांतइदंलक्षणमितिमत्वान्यथात्मख्यातिवादिनोर्मतमाह तं केचि
दिति केचिदन्यथाख्यातिवादिनोन्यत्रशुक्त्यादावन्यधर्मस्यस्वावयवधर्मस्यदेशांतरस्थरूप्यादेरध्यासइतिवंदति
आत्मख्यातिवादिनस्तुबाह्येशुक्त्यादौबुध्दिरूपात्मनोधर्मस्यरजतस्याध्यासआंतरस्यरजतस्यबहिर्वदवभासतइति-

शा·भा ११ वदंतीत्यर्थः अख्यातिमतमाह केचिदिति यत्र यस्याध्यासो लोकसिद्धस्तयोरर्थयोस्तद्धियोश्च भेदाग्रहे सति तन्मूलो भ्रमः अ·प्र·पा· १
इदं रूप्यमिति विशिष्टव्यवहार इति वदंतीत्यर्थः तैरपि विशिष्टव्यवहारान्यथानुपपत्त्या विशिष्टभ्रांतेः स्वीकार्यत्वात् पर
त्र परावभाससंमतिरिति भावः शून्यमतमाह अन्ये त्विति तस्यैवाधिष्ठानस्य शुक्त्यादेर्विपरीतधर्मत्वकल्पनां विपरीतो वि
रुद्धो धर्मो यस्य तद्भावः तस्य रजतादेरत्यंतासतः कल्पनामाचक्षत इत्यर्थः एतेषु मतेषु परत्र परावभासत्वलक्षणसंवा-
दमाह सर्वथापि त्विति अन्यथाख्यातित्वादिप्रकारविवादेप्यध्यासः परत्र परावभासत्वलक्षणं न जहातीत्यर्थः

सर्वथापि त्वन्यस्यान्यधर्मावभासतां न व्यभिचरति तथा च लोकेनुभवः शुक्तिका हि रजतवदवभासते एकश्चंद्रः सद्वितीयवदिति कथं पुनः प्रत्यगात्मन्यविषयेध्यासो विषयतद्धर्माणां ॥ ॥

शुक्तावपरोक्षस्य रजतस्य देशांतरबुद्धौ भासत्वायोगात् शून्यत्वे प्रत्यक्षत्वायोगात् शुक्तौ सत्त्वे बाधायोगात् मिथ्या
त्वमेवेति भावः आरोप्यमिथ्यात्वे न कस्त्यपेक्षा तस्यानुभवसिद्धत्वादित्याह तथा चेति बाधानंतरकालीनोयमनु-
भवः तत्पूर्वं शुक्तिकात्वज्ञानायोगात् रजतस्य बाधप्रत्यक्षसिद्धमिथ्यात्वं वत् शब्देनोच्यते आत्मनि निरुपा-
धिकाहंकाराध्यासे दृष्टांतः शुक्तिका ब्रह्मजीवांतरभेदस्याविद्याद्युपाधिकस्याध्यासे दृष्टांतमाह एक इति द्वितीय ११
चंद्रसहितवदेक एवांगुल्याद्युपाधिना द्विधा भातीत्यर्थः लक्षणप्रकरणोपसंहारार्थ इति शब्दः भवत्वध्यासः शुक्त्यादौ

आत्मनितुनसंभवतीत्याक्षिपति कथंपुनरिति यत्रापरोक्षाध्यासाधिष्ठानत्वंतत्रेंद्रियसंप्रयुक्तत्वंविषयत्वंचेतिव्या
प्तिः शुक्त्यादौ दृष्टातत्र व्यापकाभावादात्मनोधिष्ठानत्वंनसंभवतीत्यभिप्रेत्याह प्रत्यगात्मनीति प्रतीचिपूर्णेबुद्धि-
यायात्म्येविषयस्याहंकारादेस्तद्धर्माणांचाध्यासः कथमित्यर्थः उक्तव्याप्तिमाह सर्वोहीति पुरोवस्थितत्वमिं-
द्रियसंप्रयुक्तत्वं नन्वात्मनोप्यधिष्ठानत्वार्थंविषयत्वादिकमस्त्वित्यतआह युष्मदिति इदंप्रत्ययानर्हस्य-
प्रत्यगात्मनोनचक्षुषागृह्यतइत्यादिश्रुतिमनुसृत्यत्वमविषयत्वंब्रवीषि संप्रत्यध्यासलोभेनविषयत्वांगी-

सर्वोहिपुरोवस्थितेविषयेविषयांतरमध्यस्यति युष्मत्प्रत्ययापेतस्य चप्रत्यगात्मनोविषयत्वं
ब्रवीषि उच्यतेनतावदयमेकांतेनाविषयोस्मत्प्रत्ययविषयत्वात्॥ ॥ ॥ ॥

कारेश्रुतिसिद्धांतयोर्बाधःस्यादित्यर्थः आत्मन्यध्यासंभावनांप्रतिजानीते उच्यतइति अधिष्ठानारोप्ययोरे-
कस्मिन्ज्ञानेभासमानत्वमात्रंअध्यासव्यापकंतच्चभानप्रयुक्तसंशयनिवृत्त्यादिफलभाक्त्वं तदेवभानभिन्नत्वघ
टितंविषयत्वंन्न व्यापकंगौरवादितिमत्वाह नतावदिति अयमात्मानियमेनाविषयोनभवति तत्रहेतुमा-
ह अस्मदिति अस्मत्प्रत्ययोहमित्यध्यासस्तत्र भासमानत्वादित्यर्थः अस्मदर्थश्चिदात्माप्रतिबिंबितत्वे-
नयत्रप्रतीयतेसोस्मत्प्रत्ययोहंकारस्तत्रभासमानत्वादितिवार्थः नचाध्यासेसतिभासमानत्वंतस्मिन्सतिस

इतिपरस्पराश्रयइतिवाच्यं अनादित्वात्पूर्वाध्यासेभासमानात्मनउत्तराध्यासाधिष्टानत्वसंभवात् नन्वहमित्यहंकार विषयकभानरूपस्यात्मनोभासमानत्वंकथंतेद्विषयत्वंविनातत्फलभाक्त्वायोगादित्यतआह अपरोक्षत्वाच्चेति च- शब्दःशंकानिरासार्थःस्वप्रकाशत्वादित्यर्थःस्वप्रकाशत्वंसाधयति प्रत्यगिति आबालपंडितमात्मनःसंशयादि शून्यत्वेनप्रसिद्धेःस्वप्रकाशत्वं अतःस्वप्रकाशत्वेनभासमानत्वात् आत्मनोध्यासाधिष्टानत्वंसंभवतीतिभावःयदु- क्तमपरोक्षाध्यासाधिष्टानत्वस्येंद्रियसंयुक्ततयाग्राह्यत्वंव्यापकमितितत्राहनचायमितितत्रहेतुमाह अप्रत्यक्षेपीति-

अपरोक्षत्वाच्चप्रत्यगात्मप्रसिद्धेःनचायमस्तिनियमःपुरोवस्थितएवविषयेविषयांतरमध्यसित- व्यमिति अप्रत्यक्षेपित्याकाशेबालास्तलमलिनताद्यध्यस्यंतिएवमविरुद्धःप्रत्यगात्मन्यप्यनात्माध्यासः

इंद्रियाग्राह्येपीत्यर्थःबालाःअविवेकिनःतलमिंद्रनीलकटाहकल्पंनभोमलिनंपीतमित्येवमपरोक्षमध्यस्यंतितत्रेंद्रि- यग्राह्यत्वंनास्तीतिव्यभिचाराव्याप्तिःएतेनात्मानात्मनोःसादृश्याभावान्नाध्यासइत्यपास्तं नीलनभसोस्तदभावे- प्यध्यासदर्शनात् सिद्धांतेआलोकाकारचाक्षुषवृत्तिव्यंग्यसाक्षिवेद्यत्वंनभसइतिज्ञेयंसंभावनांनिगमयति एवमि- तिननुब्रह्मज्ञाननाश्यत्वेनसूचितामविद्यांहित्वाध्यासःकिमितिवर्ण्यतेत्याह॰ ॥ ॥ ॥ ॥ १२

तमेतमिति आक्षिप्तसमाहितमुक्तलक्षणलक्षितमध्यासं अविद्याकार्यत्वादविद्येतिमन्यंतइत्यर्थः विद्याविपर्ययत्वाच्चा स्याविद्यात्वमित्याह तद्विवेकेनेति अध्यस्तनिषेधेनाधिष्ठानस्वरूपनिर्धारणंविद्यामध्यासनिवर्तिकामाहुरित्यर्थः तथापि कारणाविद्यांत्यक्त्वाकार्याविद्याकिमितिवर्ण्यतेतत्राह तत्रेति तस्मिन्नध्यासेउक्तन्यायेनाविद्यात्मके सतीत्यर्थः मूला- विद्यायाः सुषुप्तावनर्थत्वादर्शनात्कार्यात्मनातस्या अनर्थत्वज्ञापनार्थंतद्वर्णनंइतिभावः अध्यस्तकृतगुणदोषाभ्याम-

तमेतमेवंलक्षणमध्यासंपंडिताअविद्येतिमन्यंते तद्विवेकेनचवस्तुस्वरूपावधारणंविद्यामाहुस्तत्रैवंसति यत्रयदध्यासस्तत्कृतेनदोषेणगुणेनवाणुमात्रेणापिसनसंबध्यते तमेतमविद्याख्यमात्मानात्मनोरि तरेतराध्यासंपुरस्कृत्यसर्वेप्रमाणप्रमेयव्यवहारालौकिकावैदिकाश्चप्रवृत्ताः सर्वाणिचशास्त्राणिविधिप्रतिषेधमो क्षपराणि

धिष्ठानंनलिप्यतइत्यक्षरार्थः एवमध्यासस्यलक्षणसंभावनेउक्त्वाप्रमाणमाहतमेतमिति तंवर्णितमेतंसाक्षिप्रत्यक्षसिद्धं पुरस्कृत्यहेतुंकृत्वालौकिकः कर्मशास्त्रीयोमोक्षशास्त्रीयश्चेतित्रिविधोव्यवहारः प्रवर्ततइत्यर्थः तत्रविधिनिषेधपराणिक र्मशास्त्राणिऋग्वेदादीनिविधिनिषेधशून्यप्रत्यक्ब्रह्मपराणिमोक्षशास्त्राणिवेदांतवाक्यानीतिविभागः एवंव्यवहारहेतुत्वे नाध्यासेप्रत्यक्षसिद्धेपिप्रमाणांतरंपृच्छति ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

कथंपुनरिति अविद्यावानहमित्यध्यासवानात्माप्रमातासविषय आश्रयो येषांतानि अविद्यावद्विषयाणीतिविग्रहः तत्त्वप्रमेयव्यवहारहेतुभूतायाः प्रमाया आध्यासात्मकप्रमात्राश्रितत्वात् प्रमाणानामविद्यावद्विषयत्वंयद्यपि-प्रत्यक्षंतथापिपुनरपिकथंकेनप्रमाणेनाविद्यावद्विषयत्वमितियोजनायद्वाअविद्यावद्विषयाणिकथंप्रमाणानिस्युः आश्रयदोषादप्रमाण्यापत्तेरित्याक्षेपः तत्रप्रमाणप्रश्नेव्यवहारार्थापत्तिंतल्लिंगकानुमानंचाहउच्यतइत्यादिनातस्मादित्यंतेन

कथंपुनरविद्यावद्विषयाणिप्रत्यक्षादीनिप्रमाणानिशास्त्राणिचेतिउच्यतेदेहेंद्रियादिष्वहंममाभिमानरहितस्यप्रमातृत्वानुपपत्तौ प्रमाणप्रवृत्त्यनुपपत्तेः॥ ॥ ॥ ॥

देवदत्तकर्तृकोव्यवहारः तदीयदेहादिष्वहंममाध्यासमूलः तदन्वयव्यतिरेकानुसारित्वात् यदित्थंतत्तथा यथामृण्मूलोघटइतिप्रयोगः तत्रव्यतिरेकंदर्शयति देहीति देवदत्तस्यसुषुप्तावध्यासाभावेव्यवहाराभावोदृष्टः जाग्रत्स्वप्नयोरध्यासेसति व्यवहारइत्यन्वयःस्फुटत्वान्नोक्तः अनेनलिंगेनकारणतयाध्यासः सिध्यति व्यवहाररूपकार्यानुपपत्त्यावेतिभावः ननुमनुष्यत्वादिजातिमति देहेहमित्यभिमानमात्राद्व्यवहारः सिध्यतुकिमिंद्रियादिषुममाभिमानेनेत्याशंक्याह ॥ ॥ ॥ ॥ ॥ ॥ ॥ १३

नहीति इंद्रियपदंलिंगादेरप्युप लक्षणं प्रत्यक्षादीत्यादिपदप्रयोगात् तथाच प्रत्यक्षलिंगादिप्रयुक्तोयोव्यवहारः द्रष्टानुमाताश्रोताहमित्यादिरूपः सइंद्रियादीनिममतास्पदान्यगृहीत्वानसंभवतीत्यर्थः यद्वाताभिमम त्वेनानुपादाययोव्यवहारः सनेतियोजना पूर्वत्रानुपादानासंभवत्क्रिययोरेकोव्यवहारः कर्तेतिक्त्वाप्रत्ययः साधुः उत्तरत्रानुपादानव्यवहारयोरेकात्मकर्तृकत्वात्साधुत्वमितिभेदः इंद्रियादिषुममेत्यध्यासाभावेंधादेरिवद्रष्टृत्वादिव्यवहारोन

नहींद्रियाण्यनुपादायप्रत्यक्षादिव्यवहारः संभवति नचाधिष्ठानमंतरेणेंद्रियाणांव्यवहारः संभवति नचानध्यस्तात्मभावेनदेहेनकश्चिद्व्याप्रियते ॥ ॥ ॥

स्यात् इतिभावः इंद्रियाध्यासेनैवव्यवहारादलंदेहाध्यासेनेत्यतआह नचेति इंद्रियाणामधिष्ठानमाश्रयः शरीरमित्यर्थः नन्वसंगात्मनासंयुक्तंशरीरंतेषामाश्रयः किमध्यासेनेत्यतआह नचानध्यस्तात्मभावेनेति अनध्यस्त आत्मभावः आत्मतादात्म्यंयस्मिन्नूतेनेत्यर्थः असंगोहीतिश्रुतेराध्यासिकएवदेहात्मनोः संबंधोनसंयोगादिरितिभावः नन्वात्मनोदेहादिभिराध्यासिकसंबंधोपिमास्तुस्वतश्चेतनतयाप्रमातृत्वोपपत्तेः नचसुषुप्तेप्रमातृत्वापत्तिः करणोपरमादितितत्राह ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

नचैतस्मिंनिति प्रमाश्रयत्वंहिप्रमातृत्वंप्रमायदिनित्यचिन्मात्रंतदाश्रयत्वयोगः करणवैय्यर्थ्यंचयदिवृत्तिमात्रंजगदां-
ध्यप्रसंगः वृत्तेर्जडत्वात् अतोवृत्तीद्धोबोधोप्रमातदाश्रयत्वमसंगस्यात्मनोवृत्तिमत्मनस्तादात्म्याध्यासंविनानसंभवतीति -
भावः देहात्मध्यासेतद्धर्माध्यासेचासतीत्यक्षरार्थः तर्ह्यात्मनः प्रमातृत्वंमास्तुइतिवदंतंप्रत्याह नचेतितस्मादात्मनःप्रमा
तृत्वादिव्यवहारार्थमध्यासोंगीकर्तव्यइत्यनुमानार्थापत्त्योःफलमुपसंहरतितस्मादितिप्रमाणसत्वादित्यर्थःयद्वाप्रमाणप्रश्नंसमाधा
याक्षेपंपरिहरति तस्मादिति अहमित्यध्यासस्यप्रमाश्रंतर्गतत्वेनादोषत्वादविद्यावदाश्रयाण्यपिप्रमाणान्येवेतियोजना

नचैतस्मिन्सर्वस्मिन्नसतिअसंगस्यात्मनःप्रमातृत्वमुपपद्यतेनचप्रमातृत्वमंतरेणप्रमाणप्रवृत्तिरस्ति
तस्मादविद्यावद्विषयाण्येवप्रत्यक्षादीनिप्रमाणानिशास्त्राणिचपश्वादिभिश्चाविशेषात् ॥ ॥

सतिप्रमातरिपश्वान्द्वन्दोषइत्युच्यतेयथाकाचादिः अविद्यातुप्रमाश्रंतर्गतत्वान्नदोषःयेनप्रत्यक्षादीनामप्रमाण्यंभवेदिति
भावः ननुयदुक्तमन्वयव्यतिरेकाभ्यांव्यवहारोध्यासकार्यइतितदयुक्तंविदुषामध्यासाभावेपिव्यवहारदृष्टेरित्यतआहपश्वा
दिभिश्चेतिचशब्दःशंकानिरासार्थःकिंविद्वत्वंब्रह्मास्मीतिसाक्षात्कारउतयौक्तिकमात्मनोनात्मभेदज्ञानंआद्येबाधिता-
ध्यासानुवृत्त्याव्यवहारइतिसमन्वयसूत्रेवक्ष्यतेद्वितीयेपरोक्षज्ञानस्यापरोक्षभ्रांत्यनिवर्तकत्वात् विवेकिनामपिव्यवहार- १४
कालेपश्वादिभिरविशेषादध्यासवत्वेनतुल्यत्वाद्व्यवहारोध्यासंकार्यइतियुक्तमित्यर्थःअत्रायंप्रयोगःविवेकिनोध्यासवंतःव्य
वहारवत्वात्पश्वादिवदिति....

तत्संग्रहवाक्यंकुर्वन्दृष्टांतेहेतुंस्फुटयति यथाहीति विज्ञानस्यानुकूलत्वंप्रतिकूलत्वंचेष्टानिष्टसाधनगोचरत्वंतदेवोदाह रति यथेति अयंदंडोमदनिष्टसाधनंदंडत्वात् अनुभूतदंडवत् इदंतृणंइष्टसाधनंअनुभूतजातीयत्वात् अनुभूततृणवदि ति अनुमायव्यवहरंतीत्यर्थः अधुनाहेतोःपक्षधर्मतामाह एवमिति व्युत्पन्नचित्ता अपीत्यन्वयःविवेकिनोपीत्यर्थःफ-

यथाहिपश्वादयःशब्दादिभिःश्रोत्रादीनांसंबंधेसतिशब्दादिविज्ञानेप्रतिकूलेजातेततोनिवर्तंते-
अनुकूलेचप्रवर्ततेयथादंडोद्यतकरंपुरुषमभिमुखमुपलभ्यमांहंतुमयमिच्छतीतिपलायितुमारभं
तहरिततृणपूर्णपाणिमुपलभ्यतंप्रत्यभिमुखीभवंति एवंपुरुषाअपिव्युत्पन्नचित्ताःक्रूरदृष्टीनाक्रोशतः-
खड्गोद्यतकरान्बलवतःउपलभ्यततोनिवर्तंतेतद्विपरीतान्प्रतिप्रवर्तंते अतःसमानःपश्वादिभिःपुरुषा
णांप्रमाणप्रमेयव्यवहारःपश्वादीनांचप्रसिद्धोऽविवेकपूर्वकःप्रत्यक्षादिव्यवहारः॥

लितमाह अतइति अनुभवबलादित्यर्थः समानइति अध्यासकार्यत्वेनतुल्यइत्यर्थः नन्वस्माकंप्रवृत्तिरध्यासादितिन पश्वादयोब्रुवंति नापिपरेषामेतत्प्रत्यक्षंअतःसाध्यविकलोदृष्टांतइतिनेत्याहपश्वादीनांचेतितेषामात्मानात्मनोर्ज्ञान मात्रमस्तिनविवेकःउपदेशाभावात् अतःसामग्रीसत्वादध्यासस्तेषांप्रसिध्धइत्यर्थः॥ ॥ ॥ ॥

निगमयति तत्सामान्येतितैः पश्वादिभिः सामान्यं व्यवहारवत्वं तस्य दर्शनात् विवेकिनामप्ययं व्यवहारः समान इतिनिश्चीयत
इतिसंबंधः समानत्वं व्यवहारस्याध्यासकार्यत्वेनेत्युक्तं पुरस्तात् तत्रोक्तान्वयव्यतिरेकौ स्मारयति तत्काल इति तस्या
ध्यासस्य काल एव कालो यस्य स तत्कालः यदाध्यासस्तदा व्यवहारस्तदभावे सुषुप्तौ तदभाव इत्युक्तान्वयादिमानिति
यावत् अतो व्यवहारलिंगाद्विवेकिनामपि देहादिष्वहंममाभिमानोस्तीत्यनवद्यं ननु लौकिकव्यवहारस्याध्यासिकत्वे

तत्सामान्यदर्शनात् व्युत्पत्तिमतामपि पुरुषाणां प्रत्यक्षादिव्यवहारस्तत्कालः समान इति निश्चीयते शा-
स्त्रीये तु व्यवहारे यद्यपि बुद्धिपूर्वकारी नाविदित्वात्मनः परलोकसंबंधमधिक्रियते तथापि न वेदांतवे-
द्यमशनायाद्यतीतमपेतब्रह्मक्षत्रादिभेदमसंसार्यात्मतत्वं अधिकारेपेक्ष्यते अनुपयोगादधिकारविरोधाच्च ·

पि ज्योतिष्टोमादिव्यवहारस्य नाध्यासजन्यत्वं तस्य देहातिरिक्तात्मज्ञानपूर्वकत्वादित्याशंक्य हेतुमंगीकरोति शास्त्री-
ये त्विति तर्हि कथं वैदिककर्मणोध्यासजन्यत्वसिद्धिरिति आशंक्य किं तत्र देहान्यात्मधीमात्रमपेक्षितं उत आत्म-
तत्वज्ञानं आद्ये तस्याध्यासाबाधकत्वात् तत्सिद्धिरित्याह तथापीति न द्वितीय इत्याह न वेदांतेति क्षुत्पिपासादिमस्तो १५
जातिविशेषवानहं संसारीति ज्ञानं कर्मण्यपेक्षितं न तद्विपरीतात्मतत्वज्ञानं अनुपयोगात् प्रवृत्तिबाधाच्चेत्यर्थः ।

शास्त्रीयकर्मणोध्यासजन्यत्वंभिगमयति प्राकृतथेति अध्यासे आगमंप्रमाणयति तथाहीति यथाप्रत्यक्षानुमानार्थापत्तयो-ध्यासेप्रमाणंतथागमोपीत्यर्थः ब्राह्मणोयजेत नहवैस्नात्वाभिक्षेत अष्टवर्षमुपनयीत कृष्णकेशोग्नीनादधीतेत्यागमो-ब्राह्मणादिपदैरधिकारिणंवर्णाद्यभिमानिनमनुवदन् अध्यासंगमयतीतिभावःएवमध्यासेप्रमाणसिद्धेपिकस्यकुत्राध्यास

प्राकृतथाभूतात्मविज्ञानात्प्रवर्तमानंशास्त्रमविद्यावद्विषयत्वंनातिवर्तते तथाहिब्राह्मणोयजे तेत्यादीनिशास्त्राणि आत्मनिवर्णाश्रमवयोवस्थादिविशेषाध्यासमाश्रित्यप्रवर्तंते आध्यासो नामातस्मिन्तद्बुद्धिरित्यवोचाम तद्यथापुत्रभार्यादिषुविकलेषुसकलेषुवाअहमेवविकलः सकलोवेतिबाह्यधर्मानात्मन्यध्यस्यति॥ ॥ ॥ ॥

इतिजिज्ञासायांतमुदाहर्तुंलक्षणंस्मारयति अध्यासोनामेतिउदाहरति तद्यथेति तल्लक्षणंयथास्पष्टंभवति तथोदा न्हियतइत्यर्थः स्वदेहान्देदेनप्रत्यक्षाःपुत्रादयोबाह्याः तद्धर्मान् साकल्यादीन्देहविशिष्टात्मन्यध्यस्यतितद्धर्मज्ञा नात्स्वस्मिंस्ततुल्यधर्मानध्यस्यतीत्यर्थः भेदापरोक्षज्ञाने तद्धर्माध्यासायोगात् अन्यथास्याप्यनंगीकाराच्चेति-द्रष्टव्यम् ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

एवंवर्णकद्वयेन वेदांतविचारस्य कर्तव्यतायां विषयप्रयोजनत्वं अगतार्थत्वं चेति हेतुद्वयं सूत्रस्यार्थिकार्थं व्याख्याय अक्षर
व्याख्यामारभमाणः पुनरप्यधिकारिभावाभावाभ्यां शास्त्रारंभसंदेहे सति अथशब्दस्यानंतर्यार्थकत्वो स्याधिकारिणं सा
धयति तत्राथशब्द इति सूत्र इत्यर्थः मंगलानंतरारंभप्रश्नकार्त्स्न्येष्वथो अथेति अथशब्दस्य बहवोर्थाः संति तत्राथ योगानु
शासनमिति अत्र सूत्रे यथाथशब्द आरंभार्थकः योगशास्त्रमारभ्यत इति तद्वदत्र किं न स्यादित्यत आह नाधिकारार्थ इति -
अयमाशयः किं जिज्ञासापदं ज्ञानेच्छापरं उत विचारलक्षकं आद्येऽथशब्दस्यास्यारंभार्थत्वे ब्रह्मज्ञानेच्छारभ्यत इति सूत्रा-
र्थः स्यात् स चासंगतः तस्या अनारभ्यत्वात् न हि प्रत्यधिकरणमिच्छा क्रियते किंतु तया विचारः न द्वितीयः कर्तव्यपदाध्याहारं

तत्राथशब्दः आनंतर्यार्थः परिगृह्यते नाधिकारार्थो ब्रह्मजिज्ञासाया अनधिकार्यत्वात् मंगलस्य च वाक्यार्थे समन्वया

भावादर्थांतरप्रयुक्त एव हि अथशब्दः श्रुत्या मंगलप्रयोजनो भवति॥ ॥ ॥

विना विचारलक्षकत्वायोगात् अध्याहृते च तेनैवारंभोक्तेरथशब्दवैयर्थ्यात् किं त्वधिकारिसिध्यर्थमानंतर्यार्थितैवयुक्तेति
अधुना संभावितमर्थांतरं दूषयति मंगलस्येति वाक्यार्थो विचारकर्तव्यता न हि तत्र मंगलस्य कर्तृत्वादिनान्वयोस्तीत्यर्थः ननु
सूत्रकृता शास्त्रादौ मंगलं कार्यमित्यथशब्दः प्रयुक्त इति चेत् सत्यं न तस्यार्थो मंगलं किंतु तच्छ्रवणमुच्चारणं च मंगलकृत्यं करोति
तदर्थस्त्वानंतर्यमेवेत्याह अर्थांतरेति अर्थांतरमानंतर्यं श्रुत्या श्रवणेन शंखवीणादिनादश्रवणवदोंकाराथशब्दयोः श्रवणं मं
गलफलकं ॐकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

कंठभिल्वाविनियतोतस्मान्मांगलिकाविनावितिस्मरणादितिभावः॥ ॥ ननुप्रपंचोमिथ्येतिमतेप्रकृतेसति अथमतंप्रपंचः सत्यदत्यत्रपूर्वप्रकृतार्थादुत्तरार्थस्यार्थांतरत्वार्थेथशब्दोदृष्टः तथात्रकिंनस्यादित्यतआह पूर्वेति फलतःफलस्येत्यर्थः ब्रह्म जिज्ञासायाःपूर्वंअर्थविशेषःप्रकृतोनास्तियस्मात्तस्य अर्थांतरत्वमथशब्देनोच्यतेयतःकुतश्चिदर्थांतरत्वंसूत्रकृतानवक्त व्यंफलाभावात् यदिफलस्यजिज्ञासापदोक्तकर्तव्यविचारस्यहेतुत्वेनयत्पूर्वंप्रकृतंतदपेक्षास्तीति अपेक्षाबलात्प्रकृतहे तुमाक्षिप्यततोर्थांतरत्वमुच्यतेतदर्थांतरत्वमानंतर्येंतर्भवतिहेतुफलभावज्ञानायानंतर्यस्यावश्यंवाच्यत्वात् तस्मादि दमर्थांतरमित्युक्तेतस्यहेतुत्वाप्रतीतेः तस्मादिदमनंतरमित्युक्तेभवत्येवहेतुत्वप्रतीतिःनचाश्वादनंतरोगौरित्यत्रहेतु

पूर्वप्रकृतापेक्षायाश्चफलत आनंतर्याव्यतिरेकात्॥

त्वभानापत्तिरितिवाच्यं तयोर्देशतःकालतोवाव्यवधानेनानंतर्यस्यामुख्यत्वात् अतःसामग्रीफलयोरेवमुख्यमानंतर्यं अव्यवधानात् तस्मिन्नुक्तेसत्यर्थांतरत्वंनवाच्यं ज्ञातत्वाद्धेफलस्याश्चेतिभावः फलस्यविचारस्यपूर्वप्रकृतहेत्वपेक्षायाव- लाद्यदर्थांतरत्वंतस्यानंतर्याभेदात् नपृथगथशब्दार्थत्वमित्यध्याहृत्यभाष्यंयोजनीयं यद्वापूर्वप्रकृतेर्थेअपेक्षायस्या १८ अर्थांतरतायास्तस्याःफलंज्ञानंतद्वारानंतर्याव्यतिरेकात्तद्ज्ञानेतस्याःज्ञानतोंतर्भावात् नाथशब्दार्थतेत्यर्थः॥ ७ ॥

ननु आनंतर्यार्थि कत्वेप्यानंतर्यस्यावधिः कइत्याशंक्याह-सतिचेति यन्नियमेन पूर्ववृत्तंपूर्वभाविपुष्कल कारणमिति यावत् तदेवावधिरितिवक्तव्यमित्यर्थः नन्वस्तुधर्मविचारइवब्रह्मविचारेपिवेदाध्ययनंपुष्कलकारणमित्यत आह - स्वाध्यायेति समानंब्रह्मविचारेसाधारणकारणंनपुष्कलकारणमित्यर्थः ननुसंयोगपृथक्त्व न्यायेनयज्ञेनदानेनेत्यादिश्रुत्यायज्ञादिकर्माणिज्ञानायविधीयंतइतिसर्वापेक्षाधिकरणेवक्ष्यंतेतथाचपूर्वतंत्रेणतदवबोधः पुष्कल -

सतिचानंतर्यार्थत्वेयथाधर्मजिज्ञासापूर्ववृत्तंवेदाध्ययनंनियमेनापेक्षते एवंब्रह्मजिज्ञासापियत्पूर्ववृत्तंनियमेनापेक्षते तद्वक्तव्यंस्वाध्यायानंतर्यंतुसमानंनन्विह कर्मावबोधानंतर्यविशेषः॥

कारणमितिशंकते नन्वितिइहब्रह्मजिज्ञासायांविशेषः असाधारणंकारणं एकस्यतुभयत्वेसंयोगपृथक्त्वमिति जैमिनिसूत्रं तदर्थस्तु एकस्यकर्मण उभयत्वे अनेक फलसंबंधे संयोगउभयसंबंधबोधकंवाक्यंतस्यपृथक्त्वंभेदः स हेतुः उदाहरणं दध्नाजिहोति दध्नेंद्रिय कामस्यजुहुयात् खादिरोयूपः खादिरंवीर्यकामस्यतत्रश्चात्रापिजोतिष्टोमादिकर्मणांस्वर्गादिफलमपियज्ञेनेतिवचनात्ज्ञानार्थत्वंचेति ॥ ॥ ॥ ॥ ॥ ॥ ॥

परिहरति नेत्यादिना अयमाशयः नतावत्पूर्वतंत्रस्थन्यायसहस्रं ब्रह्मज्ञाने तद्विचारेवापुष्कलकारणं तस्यधर्मनिर्णय
मात्रहेतुत्वात् नापिकर्मनिर्णयः तस्यानुष्ठानहेतुत्वात् नहिधूमाग्न्योरिवब्रह्मकर्मणोर्व्याप्तिरस्तियथाधर्मज्ञानात्ब्रह्मज्ञा
नंभवेत् यद्यपिशुद्धिविवेकादिद्वाराकर्माणि हेतवस्तथापितेषांनाधिकारिविशेषणत्वं अज्ञातानांतेषां जन्मांतरकृताना
मपिफलहेतुत्वात् अधिकारिविशेषणंज्ञायमानंप्रवृत्तिपुष्कलकारणंआनंतर्यावधित्वेनवक्तव्यंअतःकर्माणितदव

नधर्मजिज्ञासायाः प्रागपिअधीतवेदांतस्यब्रह्मजिज्ञासोपपत्तेः यथाचहृदयाद्यवदानानामानंतर्यंनियमः क्रम
स्यविवक्षितत्वान्नतथेहक्रमोविवक्षितः॥

बोधस्तन्यायविचारोवानावधिरितिनब्रह्मजिज्ञासायाधर्मजिज्ञासानंतर्यमिति ननुधर्मब्रह्मजिज्ञासयोः कार्यकारणत्वा
भावेपि आनंतर्योक्तिद्वाराक्रमज्ञानार्थोथशब्दः हृदयस्याग्रेवद्यत्यथजिह्वाया अथवक्षसइत्यवदानानांक्रमज्ञाना
र्थोथशब्दइत्याशंक्याह यथेति अवदानंखंडनंअवदानानामानंतर्यनियामकः क्रमोयथाथशब्दार्थस्तस्यविव
क्षितत्वात् नतथेहधर्मब्रह्मजिज्ञासयोः क्रमोविवक्षितः एककर्तृकत्वाभावेनतयोः क्रमानपेक्षणात् अतोनक्रमा
र्थोथशब्दइत्यर्थः॥

ननुतयोरेककर्तृकत्वंकुतोनास्तीत्यतआह शेषेति येषामेकप्रधानशेषतायथावदनानां प्रयाजादीनांचययोश्चशेषशे
षित्वंयथाप्रयाजदर्शयोः यस्यचाधिकृताधिकारत्वंयथाअपांप्रणयनंदर्शपूर्णमासांगमाश्रित्यगोदोहनेनपशुकामस्ये
तिविहितस्यगोदोहनस्ययथावादर्शपूर्णमासाभ्यामिष्टासोमेनयजेतेतिदर्शाद्युत्तरकालेविहितसोमयागस्यदर्शाद्यधिकृ
ताधिकारत्वंतेषामेककर्तृकत्वंभवति ततश्चैकप्रयोगवचनगृहितानां तेषां युगपदनुष्ठानासंभवात् क्रमाकांक्षायांश्रु
त्यादिभिर्हिक्रमोबोध्यतेनैवंजिज्ञासयोः शेषशेषित्वेश्रुतिलिंगादिकंमानमस्तिननुब्रह्मचर्यंसमाप्यगृहीभवेद्गृहाद्वनी
भूत्वाप्रव्रजेदितिश्रुत्याअधीत्यविधिवद्वेदान्पुत्रानुत्पाद्यधर्मतः इष्ट्वाचशक्तितोयज्ञैर्मनोमोक्षेनिवेशयेदितिस्मृत्याचाधि
शेषशेषित्वेधिकृताधिकारेवाप्रमाणाभावाद्धर्मब्रह्मजिज्ञासयोः
कृताधिकारित्वंभातीति तन्न ब्रह्मचर्यादेवप्रव्रजेत् आसादयतिशुद्धात्मामोक्षंवैप्रथमाश्रमइतिश्रुतिस्मृतिभ्यांत्वयो
दात्ततश्रुतिस्मृत्योरशुद्धचित्तविषयत्वावगमात् एतदुक्तंभवति यदिजन्मांतरकृतकर्मभिःशुद्धंचित्तंतदाब्रह्मचर्या
देवसन्यस्यब्रह्मजिज्ञासितव्यं यदिनशुद्धमितिरागेणज्ञायतेतदागृहीभवेत् तत्राप्यशुद्धोवनीभवेत् तत्राप्यशुद्धोत-
थैवकालमाकलयेत् वनेशुद्धोप्रव्रजेदितितथाचश्रुतिः यदहरेवविरजेत्तदहरेवप्रव्रजेदिति तस्मान्नानयोरधिकृताधि
कारत्वेकिंचिन्मानमितिभावः॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

ननुमीमांसयोः शेषशेषित्वमधिकृताधिकारत्वंचमास्त एकमोक्षफलकत्वेनैककर्तृकत्वंस्यादेव वदंतिहिज्ञानकर्म-भ्यांमुक्तिरितिसमुच्चयवादिनः एवमेकजिज्ञास्यकत्वाच्चैककर्तृकत्वं तथाचाग्नेयादिषड्यागानामेकस्वर्गफलकानांद्वादशाध्यायानांचैकधर्मजिज्ञास्यकानांक्रमवत्तयोः क्रमोविवक्षितइतिक्रमार्थेथिशब्दइत्याशंक्याह फलेति फलभेदाज्जिज्ञास्यभेदाच्चनक्रमोविवक्षितइत्यनुषंगः यथासौर्यार्यम्णप्राजापत्यचरूणांब्रह्मवर्चसस्वर्गायुः फलभेदात्यथावाकामचिकित्सातंत्रयोर्जिज्ञास्यभेदान्नक्रमापेक्षातद्वन्मीमांसयोर्नक्रमापेक्षेतिभावः तत्रफलभेदंविवृणोति

फलजिज्ञास्यभेदाच्च अभ्युदयफलंधर्मज्ञानंतच्चानुष्ठानापेक्षंनिःश्रेयसफलंतुब्रह्मविज्ञानंनचानुष्ठानांतरापेक्षम् ॥ ॥ ॥ ॥ ॥ ॥

अभ्युदयेति विषयाभिमुख्येनोदेतीत्यभ्युदयोविषयाधीनंसुखंस्वर्गादिकंतच्चधर्मज्ञानहेतोर्मीमांसायाः फलमित्यर्थः नकेवलंफलस्यस्वरूपतोभेदः किंतुहेतुतोपीत्याह तच्चेतिब्रह्मज्ञानहेतोर्मीमांसायाः फलंतु तद्विरुद्धमित्याह निःश्रेयसेतिनित्यंनिरपेक्षंश्रेयोनिःश्रेयसंमोक्षस्तत्फलमित्यर्थः ब्रह्मज्ञानंचस्वोत्पत्तिव्यतिरिक्तमनुष्ठानंनापेक्षतइत्याह नचेतिस्वरूपतोहेतुतश्चफलभेदान्नसमुच्चयइतिभावः ॥ ॥ ॥ ॥ ॥ ॥ ॥ २०

जिज्ञास्यभेदं विवृणोति भव्यश्चेति भवतीतिभव्यः साध्यइत्यर्थः साध्यत्वेहेतुमाहनेति तर्हितुच्छत्वंनेत्याह पुरुषेतिपु रुषव्यापारः प्रयत्नः तंत्रंहेतुर्यस्यतत्वादित्यर्थः कृतिसाध्यत्वात् कृतिजनकज्ञानकाले धर्मस्यासत्वंनतुच्छत्वादित्य र्थः ब्रह्मणोधर्माद्वैलक्षण्यमाह इहत्विति उत्तर मीमांसायामित्यर्थः भूतमसाध्यम् तत्रहेतुर्नित्येतिसदासत्वादित्यर्थः

भव्यश्चधर्मोजिज्ञास्योनज्ञानकालेस्तिपुरुषव्यापारतंत्रत्वादिहतुभूतम्-
ब्रह्मजिज्ञास्यंनित्यनिर्वृत्तत्वात् नपुरुषव्यापारतंत्रंचोदनाप्रवृत्तिभेदाच्च॥

साध्यासाध्यत्वेनधर्मब्रह्मणोः स्वरूपभेदमुक्त्वाहेतुतोप्याह नेति धर्मवत्कृत्यधीनंनेत्यर्थः मानतोपिभेदमाह चोद नेति अज्ञातज्ञापकवाक्यमत्रचोदनातस्याः प्रवृत्तिबोधकत्वं तद्वैलक्षण्याच्चजिज्ञास्यभेदइत्यर्थः॥ ॥ ॥ ॥

संग्रहवाक्यंविवृणोति याहीति लक्षणंप्रमाणंस्वर्गकामोयजेतेत्यादिवाक्यंहिस्वविषयेधर्मेयागादिकरणकस्वर्गादिफल
कभावनारूपेफलहेतुयागादिगोचरनियोगेवाहितसाधनयागादौवापुरुषंप्रवर्तयदेवावबोधयति अयमात्माब्रह्मे-
त्यादिवाक्यंतुत्वमर्थंकेवलमप्रपंचंब्रह्मबोधयत्येवनप्रवर्तयति विषयाभावादित्यर्थः नन्ववबोधएवविषयस्तत्राह नपु
रुषइति ब्रह्मचोदनयापुरुषोवबोधेनप्रवर्त्यत इत्यत्रहेतुंपूर्ववाक्येनाहावबोधस्येति स्वजन्यज्ञानेस्वयंप्रमाणंनप्रवर्त

याहिचोदनाधर्मस्यलक्षणंसास्वविषयेनियुंजानैवपुरुष मवबोधयतिब्रह्मचोदनातुपुरुषमव
बोधयत्येवकेवलंअवबोधस्यचोदनाजन्यत्वान्नपुरुषोवबोधेनियुज्यते यथाक्षार्थसंनिकर्षेणार्था-
वबोधे तद्वत् तस्मात्किमपिवक्तव्यंयदनंतरंब्रह्मजिज्ञासोपदिश्यतइति॥ ॥६॥ ॥

कमित्यत्रदृष्टांतमाह यथेतिमानादेवबोधस्यजातत्वाज्ज्ञातेचविध्ययोगान्नवाक्यार्थज्ञानेपुरुषप्रवृत्ति तथाचप्रवर्त
कमानमेयोधर्मःउदासीनमानमेयंब्रह्मेतिजिज्ञास्यभेदान्नतन्मीमांसयोः क्रमार्थोथशब्दइतिभावः एवमथशब्दस्या २१
र्थांतरासंभवादानंतर्यवाचित्वेसतितदवधित्वेनपुष्कलंकारणंवक्तव्यमित्याह तस्मादिति उपदिश्यतेसूत्रकृ
तेतिशेषः॥

तत्किमित्यत आह उच्यत इति विवेकादीनामागमिकत्वेन प्रामाणिकत्वं पुरस्तादेवोक्तं लौकिकव्यापारान्मनस उपरमः
शमः बाह्यकरणानामुपरमो दमः ज्ञानार्थं विहितनित्यादिकर्मसन्यास उपरतिः शीतोष्णादिद्वंद्वसहनं तितिक्षा निद्राल-
स्यप्रमादत्यागेन मनस्स्थितिः समाधानं सर्वत्रास्तिकता श्रद्धा एतत्षट्कप्राप्तिः शमादिसंपत् अत्र विवेकादीनामुत्तरोत्तर
हेतुत्वेनाधिकारिविशेषणत्वं मंतव्यं तेषामन्वयव्यतिरेकाभ्यां ब्रह्मजिज्ञासाहेतुत्वमाह तथेति कथंचित्कुतूहलितया-

उच्यते नित्यानित्यवस्तुविवेकः इहामुत्रार्थफलभोगविरागः शमदमादिसाधनसंपत् मुमुक्षुत्वं
चैवि तेषु हि सत्सु प्रागपि धर्मजिज्ञासाया ऊर्ध्वं च शक्यते ब्रह्म जिज्ञासितुं ज्ञातुं च न विपर्यये तस्मादथ
शब्देन यथोक्तसाधनसंपत्त्यानंतर्यमुपदिश्यते अतः शब्दो हेत्वर्थः॥

ब्रह्मविचारप्रवृत्तस्यापि फलपर्यंतज्ञानानुदयाद्व्यतिरेकसिद्धिः अथशब्दव्याख्यामुपसंहरति तस्मादिति ननूक्तविवेका
दिकं न संभवति अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतमित्यादिश्रुत्या कर्मफलस्य नित्यत्वेन ततो वैराग्यासिद्धेः जी
वस्य ब्रह्मस्वरूपमोक्षस्याप्युक्तेः भेदात् तस्य लोष्टादिवत्पुरुषार्थत्वायोगाच्च ततो न मुमुक्षासंभव इति आक्षेपपरिहारा-
र्थोऽतः शब्दः तद्व्याचष्टे अतः शब्द इति अथशब्देनानंतर्यवाचिना तदवधित्वेनार्थाद्विवेकादिचतुष्टयस्य ब्रह्मजिज्ञासाहेतु
त्वं यदुक्तं तस्यार्थिकहेतुत्वस्याक्षेपनिरासायानुवादकोऽतः शब्द इत्यर्थः ॥

उक्तं विवृणोति यस्मादिति तस्मादित्युत्तरेण संबंधः यदल्पं तन्मर्त्यं यत्कृतकं तदनित्यमिति न्यायवती तद्यथेहेत्या-
दिश्रुतिः कर्मफलाक्षयत्वश्रुतेर्बाधिका तस्मादतोऽन्यदार्तमिति श्रुत्या अनात्ममात्रस्यानित्यत्वविवेकाद्वैराग्यलाभ इति
भावः मुमुक्षां संभावयति तथेति यथा वेदः कर्मफलानित्यत्वं दर्शयति तथा ब्रह्मज्ञानात्प्रशांतशोकानलमपारस्वयं -

यस्माद्वेद एवाग्निहोत्रादीनां श्रेयःसाधनानामनित्यफलतां दर्शयति तद्यथेह कर्मचितो लोकः
क्षीयत एवमेवामुत्र पुण्यचितो लोकः क्षीयत इत्यादिः तथा ब्रह्मविज्ञानादपि परं पुरुषार्थं दर्शय
ति ब्रह्मविदाप्नोति परमित्यादिः तस्माद्यथोक्तसाधनसंपत्त्यनंतरं ब्रह्मजिज्ञासा कर्तव्या ॥ ॥

ज्योतिरानंदं दर्शयतीत्यर्थः जीवत्वादेरध्यासोक्त्या ब्रह्मत्वसंभव उक्त एवेति भावः एवमथातःशब्दाभ्यां पुष्कलकारण
वतोऽधिकारिणः समर्थनाच्छास्त्रमारब्धव्यमित्याह तस्मादिति ॥ ॥

सूत्रवाक्यपूरणार्थमध्याहृतकर्तव्यपदान्वयार्थंब्रह्मजिज्ञासापदेनविचारंलक्षयितुंस्वस्यस्वाभिमतसमासकथनेनावयवार्थं
दर्शयतिब्रह्मणइति ननुधर्मायजिज्ञासेतिवत् ब्रह्मणेजिज्ञासेतिचतुर्थीसमासःकिंनस्यादितिचेदुच्यतेजिज्ञासापदस्यहि-
मुख्यार्थःइच्छातस्याःप्रथमंकर्मकारकमपेक्षितंपश्चात्फलं ततश्चादौकर्मज्ञानार्थंषष्ठीसमासोयुक्तःकर्मण्युक्तेसत्यर्थात्फ-
लमुक्तंभवतिइच्छायाःकर्मणएवफलत्वात् यथास्वर्गस्येच्छेत्युक्तेस्वर्गस्यफलत्वंलभ्यतेतद्वत् अतएवधर्मजिज्ञासेत्यत्रापिसा

ब्रह्मणोजिज्ञासाब्रह्मजिज्ञासाब्रह्मचवक्ष्यमाणलक्षणंजन्माद्यस्ययतइतिअतएवनब्रह्मशब्दस्यजात्याद्य
र्थांतरमाशंकितव्यम्

हितस्यज्ञातुमिच्छेतिइच्छांगृहीत्वाषष्ठीसमासोदर्शितःविचारलक्षणायांतुविचारस्यक्लेशात्मकतयाप्रथमंफलाकांक्ष
त्वात्धर्मायजिज्ञासेतिचतुर्थीसमासउक्तःतथावृत्तिकारैर्ब्रह्मणेजिज्ञासेत्युक्तंचेदस्तुज्ञातत्वेनब्रह्मणःफलत्वादिति
अधुनाब्रह्मपदार्थमाह ब्रह्मचेति ननुब्रह्मक्षत्रमिदंब्रह्मआयातिब्रह्मस्वयंभूर्ब्रह्मप्रजापतिरितिश्रुतिषुलोकेचब्राह्म
णत्वजातौजीवेवेदेकमलासनेचब्रह्मशब्दःप्रयुज्यतइत्याशंक्याह अतएवेति जगत्कारणत्वलक्षणप्रतिपादकसू
त्रासांगत्यप्रसंगादेवेत्यर्थः ॥

शा·भा· २३ वृत्त्यंतरेशेषेषष्ठीत्युक्तंदूषयति ब्रह्मणइतीति संबंधसामान्यंशेषः जिज्ञासेत्यत्रसन्प्रत्ययवाच्यायाइच्छायाज्ञानंकर्म अ·प्र·पा· १
तस्यज्ञानस्यब्रह्मकर्म तत्रसकर्मकक्रियायाः कर्मज्ञानंविनाज्ञातुं अशक्यत्वात् इच्छाविषयज्ञानजन्यत्वाच्च प्रथमापेक्षि
तंकर्मैवषष्ठ्यावाच्यंनशेषइत्यर्थः ननुप्रमाणादिकमन्यदेवतत्कर्मास्तु ब्रह्मतुशेषितयासंबध्यतांतत्राह जिज्ञास्यांतरे

ब्रह्मणइतिकर्मणिषष्ठीनशेषे जिज्ञास्यापेक्षत्वाजिज्ञासायाज्जिज्ञास्यांतरानिर्देशाच्चननुशेषष
ष्ठीपरिग्रहेपिब्रह्मणोजिज्ञासाकर्मत्वंनविरुध्यतेसंबंधसामान्यस्यविशेषनिष्ठत्वात् एवमपि
प्रत्यक्षंब्रह्मणःकर्मत्वमुत्सृज्यसामान्यद्वारेणपरोक्षंकर्मत्वंकल्पयतोऽर्थः प्रयासःस्यात् ॥ ॥

तिश्रुतकर्मत्वंत्यक्त्वान्यदश्रुतंकल्पयन्पिंडमुत्सृज्यकरंलेढीतिन्यायमनुसरतीतिभावः गूढाभिसंधिः शंकतेनन्वितिष-
ष्ठीशेषइतिविधानात् षष्ठ्यासंबंधमात्रंप्रतीतमपिविशेषाकांक्षायांसकर्मकक्रियासंनिधानात्कर्मत्वेपर्यवस्यतीत्यर्थः
अभिसंधिमजानन्निवोत्तरमाह एवमपीति कर्मत्वलाभेपिप्रत्यक्षंकर्तृकर्मणोः कृतीतिसूत्रेणजिज्ञासापदस्याप्रत्ययांतत्वे २३
नकृदंतस्ययोगेविहितंप्रथमापेक्षितंकर्मत्वंत्यक्त्वापरोक्षमशाब्दंकल्पयतइत्यर्थः॥ ७॥

शेषवादीस्याभिसंधिमुद्घाटयति नव्यर्थइति शेषपक्षेत्यांब्रह्मसंबंधिनीजिज्ञासाप्रतिज्ञाताभवति तत्रचयानिब्रह्माश्रितानिल क्षणप्रमाणयुक्तिज्ञानसाधनफलानितेषामपिविचारः प्रतिज्ञातोभवति तज्जिज्ञासायाअपिब्रह्मज्ञानार्थत्वेनब्रह्मसंबंधि त्वात् कर्मणिषष्ठ्यांतुब्रह्मकर्मकएवविचारः प्रतिज्ञातोभवतीत्यभिसंधिनाशेषषष्ठीत्युच्यतेअतोमत्प्रयासोनव्यर्थः ब्रह्म

नव्यर्थोब्रह्माश्रिताशेषविचारप्रतिज्ञानार्थत्वादितिचेन्न प्रधानपरिग्रहेतदपेक्षितानामर्थाक्षिप्तत्वा त् ब्रह्महिज्ञानेनाप्तुमिष्टतमत्वात्प्रधानं तस्मिन्प्रधानेजिज्ञासाकर्मणिपरिगृहीतेयैर्जिज्ञासितैर्वि नाब्रह्मजिज्ञासितंनभवति तान्यर्थाक्षिप्तान्येवेतिनपृथक्सूत्रयितव्यानियथाराजासौगच्छ- तीत्युक्तेसपरिवारस्यराज्ञोगमनमुक्तंभवतितद्वत् ॥

तत्संबंधिनांसर्वेषांविचारप्रतिज्ञानमर्थःफलंयस्यतत्वादित्यर्थः त्वत्प्रयासस्येदंफलंनयुक्तं सूत्रेणमुखतःप्रधान स्यब्रह्मणोविचारेप्रतिज्ञातेसतितदुपकरणानांविचारस्यार्थिकप्रतिज्ञायाउदितत्वादित्याहसिद्धांती नप्रधानेति संगृहीतमर्थंदृष्टांतेनव्याकरोतिब्रह्महीत्यादिना ॥ ॥

ताहिजिज्ञासस्येतिमूलम्श्रुत्यनुसाराच्चकर्मणिषष्ठीत्याह श्रुत्यनुगमाच्चेति श्रुतिसूत्रयोरेकार्थत्वलाभश्चेत्यर्थः जिज्ञासा
पदस्यावयवार्थमाह ज्ञातुमिति नन्वनवगते वस्तुनीच्छाया अदर्शनात्तस्यामूलंविषयज्ञानंवक्तव्यंब्रह्मज्ञानंतुजिज्ञासायाः
फलं तदेवमूलंकथमित्याशंक्याह अवगतीति आवरणनिवृत्तिरूपाभिव्यक्तिमच्चैतन्यमवगतिः पर्यंतो वधिर्यस्याखंडसा
क्षात्कारवृत्तिज्ञानस्य तदेवजिज्ञासायाः कर्मतदेवफलं मूलंत्वापातज्ञानमधुनावक्ष्यत इतिफलमूलज्ञानयोर्भेदान्नजि

श्रुत्यनुगमाच्च यतोवाइमानिभूतानिजायंते इत्याद्याः श्रुतयस्तद्विजिज्ञासस्वतद्ब्रह्मेतिप्रत्यक्षमे
वब्रह्मणोजिज्ञासाकर्मत्वंदर्शयंति तच्चकर्मणिषष्ठीपरिग्रहेसूत्रेणानुगतंभवतितस्मात् ब्रह्मण
इतिकर्मणिषष्ठी ज्ञातुमिच्छाजिज्ञासा अवगतिपर्यंतंसन्वाच्यायाइच्छायाः कर्मफलविषयत्वादि
च्छायाः ज्ञानेनहिप्रमाणेनावगंतुमिष्टंब्रह्मब्रह्मावगतिर्हिपुरुषार्थः॥ ॥

ज्ञासानुपपत्तिरित्यर्थः ननुगमनस्यग्रामः कर्मतत्प्राप्तिः फलमितिभेदात् कर्मैवफलमित्ययुक्तंतत्राह फलेति क्रियांतरे
तयोर्भेदेपिइच्छायाः फलविषयत्वात् कर्मैवफलमित्यर्थः ननुज्ञानावगत्योरैक्यान्न्द्देदोक्तिरयुक्तेत्यत आह ज्ञानेनेति
ज्ञानंवृत्तिः अवगतिस्तत्फलं इतिभेद इतिभावः अवगंतुमभिव्यंजयितुं अवगतेःफलत्वंस्फुटयतिब्रह्मेति॥ ॥

हिशब्दोक्तं हेतुमाह निःशेषेति बीजमविद्या आदिर्यस्यानर्थस्य तन्नाशकत्वादित्यर्थः अवयवार्थमुक्त्वा सूत्रवाक्यस्या
र्थमाह तस्मादिति अत्र सन्प्रत्ययस्य विचारलक्षकत्वं तव्यप्रत्ययेन सूचयति अथातःशब्दाभ्यामधिकारिणः साधि
तत्वात् तेन ब्रह्मज्ञानाय विचारः कर्तव्य इत्यर्थः इति तृतीयवर्णकं प्रथमवर्णके बंधस्याध्यासत्वोक्त्या विषयादिप्रसि-
द्धावपि ब्रह्म प्रसिद्ध्यप्रसिध्योर्विषयादिसंभवासंभवाभ्यां शास्त्रारंभसंदेहे पूर्वपक्षमाह तत्पुनरिति पुनःशब्दो वर्णकां

निःशेषसंसारबीजाविद्याद्यनर्थनिबर्हणात्तस्मात् ब्रह्म विजिज्ञासितव्यं तत्पुनर्ब्रह्म प्रसिद्धं प्रसिद्धं
वा स्यात् यदि प्रसिद्धं न जिज्ञासितव्यमथाप्रसिद्धं नैव शक्यमु जिज्ञासितुमिति॥ ॥ ॥

तरद्योतनार्थः यदि वेदांतविचारात् प्रागेव ब्रह्मज्ञानं तर्ह्यज्ञातत्वरूपविषयत्वं नास्ति अज्ञानाभावेन तन्निवृत्तिरू-
पं फलमपि नास्तीति न विचारयितव्यं अथाज्ञातं केनापि तर्हि तदुद्देशेन विचारः कर्तुं न शक्यते अज्ञातस्योद्देशा
योगात् तथा च बुध्ध्यावनारूढस्य विचारात्मकशास्त्रेण वेदांतैश्च प्रतिपादनायोगात् तत्प्रतिपाद्यत्वरूपसंबंधो ना
स्तीति ज्ञानानुत्पत्तेः फलमपि नास्तीत्यनारभ्यं शास्त्रमित्यर्थः॥ ॥

आपातप्रसिध्याविषयादिलाभादारंभणीयमितिसिद्धांतयति उच्यत इत्यादिनाप्रसिद्धं तावदित्यर्थः अस्तित्वस्याप्रकृतत्वे नास्तिपदस्यप्रसिद्धिपरत्वात् ननुकेनमानेनब्रह्मणः प्रसिद्धिः नचसत्यंज्ञानमनंतंब्रह्मेतिश्रुत्यासेतिवाच्यंब्रह्मपदस्य लोकेसंगतिग्रहाभावेनतद्घटितवाक्यस्याबोधकत्वादित्याशंक्यब्रह्मपदव्युत्पत्त्याप्रथमंतस्यनिर्गुणस्यसगुणस्यचप्रसिद्धिरित्याह ब्रह्मशब्दस्यहीति अस्यार्थः श्रुतौसूत्रेचब्रह्मपदस्यप्रयोगान्यथानुपपत्त्या कश्चिदर्थोस्तीति ज्ञायते प्रमाणवाक्येनिरर्थकपदप्रयोगादर्शनात् सचार्थोमहत्वरूपइतिव्याकरणान्निश्चीयते बृहिवृद्धावितिस्मरणात् साचवृद्धिःनिर

उच्यते अस्तितावद्ब्रह्मनित्यशुद्धबुद्धमुक्तस्वभावंसर्वज्ञंसर्वशक्तिसमन्वितं ब्रह्मशब्दस्यहि व्युत्पा-
द्यमानस्यनित्यशुद्धत्वादयोर्थाःप्रतीयंते बृहतेर्धातोरर्थानुगमात् ॥

वधिकमहत्वंसंकोचकाभावात् श्रुतावनंतपदेनसहप्रयोगाच्चज्ञायते निरवधिकमहत्वंचांतवत्वादिदोषवत्वेसर्वज्ञत्वादिगुणहीनत्वेचनसंभवतिलोकेगुणहीनदोषवतोल्पत्वप्रसिद्धेरतोबृंहणाद्ब्रह्मेतिश्रुत्यादेशकालवस्तुपरिच्छेदाभावरूपंनित्यत्वंप्रतीयते अविद्यादोषशून्यत्वंशुद्धत्वं जाड्यादिराहित्यंबुद्धत्वंबंधकालेपिस्वतो बधाभावान्मुक्तत्वंचप्रतीयते एवंसकलदोषशून्यंनिर्गुणंप्रसिद्धं तथासर्वज्ञत्वादिगुणकंचतत्पदवाच्यंप्रसिद्धं ज्ञेयस्यकार्यस्यवापरिशेषेल्पत्वप्रसंगेनसर्वज्ञत्वस्यसर्वकार्यशक्तिमत्वस्यचलाभादिति

एवंतत्सदात्मसिद्धेरप्रमात्वेनापातत्वादज्ञानानिवर्तकत्वात् जिज्ञासोपपत्तिरितिउक्त्वात्वंपदार्थात्मनापिब्रह्मणः प्रसित्ध्यातदु पपत्तिरित्याह सर्वस्येति सर्वस्यलोकस्ययोयमात्मातदभेदात् ब्रह्मणः प्रसिद्धिरित्यर्थः नन्वात्मनःप्रसिद्धिः केत्यतआह- सर्वोहीति अहमस्मीतिनप्रत्येतीतिन किंतुप्रत्येत्येवसैवसच्चिदात्मनः प्रसिद्धिरित्यर्थः आत्मनः कुतः सत्तेति शून्यमतमा- शंक्याह यदीति आत्मनः शून्यस्यप्रतिपत्तौअहंनास्मीतिलोकोजानीयात् लोकस्त्वहमस्मीतिजानाति तस्मादात्मनो- स्तित्वप्रसिद्धिरित्यर्थः आत्मप्रसिद्धावपिब्रह्मणः किमायातंतत्राह आत्मेति अयमात्माब्रह्मेतिश्रुतेरितिभावः प्रसि

सर्वस्यात्मत्वाच्चब्रह्मास्तित्वप्रसिद्धिः सर्वोह्यात्मास्तित्वंप्रत्येति ननाहमस्मीति यदिनात्मास्तित्व प्रसिद्धिः स्यात्सर्वोलोकोनाहमस्मीतिप्रतीयादात्माचब्रह्मयदितर्हिलोकेब्रह्मात्मत्वेनप्रसिद्धमस्ति ततोज्ञातमेवेत्यजिज्ञास्यत्वंपुनरापन्नंन तद्विशेषंप्रतिविप्रतिपत्तेः॥

द्विपक्षोक्तंदोषंपूर्वपक्षेणस्मारयति यदीति अज्ञातत्वाभावेनविषयाद्यभावात् अविचार्यत्वंप्राप्तमित्यर्थः यथेदंरजत मितिवस्तुतः शुक्तिप्रसिद्धिस्तद्वदहमस्मीति सत्वचैतन्यरूपात्मत्वसामान्येनवस्तुतोब्रह्मणः प्रसिद्धिर्नैर्यंपूर्णानंदब्रह्म रूपविशेषगोचरावादिनांविवादाभावप्रसंगात् नहिशुक्तित्वविशेषदर्शनेसतिरजतंरंगमन्यदितिविप्रतिपत्तिरस्ति अतोवि प्रतिपत्त्यन्यथानुपपत्त्यासामान्यतः प्रसित्धावपिविशेषस्याज्ञातत्वाद्विषयादिसिद्धिरितिसिद्धांतयतिनेत्यादिना॥ ॥ ॥

सामान्यविशेषभावस्त्वात्मनिसञ्चित्पूर्णादिपदवाच्यभेदात्कल्पितद्वतिमंतव्यं तत्रस्थूलसूक्ष्मक्रमेणविप्रतिपत्तीरूप न्यस्यतिदेहमात्रमित्यादिनाशास्त्रज्ञानशून्याः प्राकृताः वेदबाह्यम तान्युक्त्वातार्किकादिमतमाह अस्तीतिसांख्य मतमाह भोक्तेति किमात्मादेहादिरूपःउततद्भिन्नइतिविप्रतिपत्तिकोटित्वेनदेहेंद्रियमनोबुद्धि शून्यान्युक्त्वातद्भि

देहमात्रंचैतन्यविशिष्टंआत्मेतिप्राकृताजनालोकायतिकाश्चप्रतिपंनाः इंद्रियाण्येवचेतनान्यात्मे त्यपरेमनइत्यन्येविज्ञानमात्रंक्षणिकमित्येकेशून्यमित्यपरे अस्तिदेहादिव्यतिरिक्तःसंसारीक र्ताभोक्तेत्यपरेभोक्तैवकेवलंनकर्तेत्येकेअस्तितद्व्यतिरिक्तईश्वरः सर्वज्ञःसर्वशक्तिरितिकेचित् ॥

भोपिकर्तृत्वादिमान्नवेतिविप्रतिपत्तिकोटित्वेनतार्किकसांख्यपक्षावुपन्यस्याकर्तापीश्वराद्भिन्नोनन्नेतिविवादकोटित्वेन योगिमतमाह अस्तितद्व्यतिरिक्तइति निरतिशयसत्वंगृहीत्वाईश्वरःसर्वज्ञत्वादिसंपन्नइतियोगिनोवदंति ॥ ॥

भेदकोटिमुक्त्वासिद्धांतकोटिमाह आत्मासभोक्तरिति भोक्तुर्जीवस्याकर्तुः साक्षिणः सईश्वरः आत्मास्वरूपमित्तिवेदां-
तिनोवदंतीत्यर्थः विप्रतिपत्तीरुपसंहरति एवंबहवइति विप्रतिपत्तीनांप्रपंचोनिरासश्चविवरणोपन्यासेदर्शितःकरव
बोधायेतीहउपरम्यते तत्रश्रुतिवाक्याश्रयाः सिद्धांतिनः जीवोब्रह्मैवात्मत्वात् इत्यादियुक्तेः तत्वमसीत्यादिश्रुते
श्चाबाधितायाःसत्वात् अन्येतु देहादिरात्माहंप्रत्ययगोचरत्वात् व्यतिरेकेणघटादिवत् इत्यादियुक्त्याभासंसवा

आत्मासभोक्तुरित्यपरे एवंबहवोविप्रतिपन्नायुक्तिवाक्यतदाभाससमाश्रयाःसंतः

एषपुरुषोन्नरसमयः इंद्रियसंवादेचक्षुरादयः तेहवाचमूचुः मनउवाच योयंविज्ञानमयः असदेवेदमग्रआसीत्
कर्ताभोक्ता अनश्नन्नन्यः आत्मानमंतरोयमयतीतिवाक्याभासंचाश्रिताइतिविभागः देहादिः अनात्माभौतिकत्वा
त् दृश्यत्वादित्यादिन्यायैरानंदमयोभ्यासादित्यादिसूत्रैश्चाभासत्वंवक्ष्यते॥

नन्विदं सूत्रं शास्त्राद्बहिःस्थित्वा शास्त्रमारंभयति अंतर्भूत्वा वा आद्ये तस्य हेयता शास्त्रासंबंधात् द्वितीये तस्यारंभकं वाच्यं नच स्वयमेवारंभकं स्वस्मात्स्वोत्पत्तेरित्यात्माश्रयात् नचारंभकांतरं पश्यामइति उच्यते अध्ययनविधिनारब्धमिदं सूत्रं शास्त्रांतर्गतमेव शास्त्रारंभं प्रतिपादयति यथाध्ययनविधिर्वेदांतर्गत एव कृत्स्नवेदस्याध्ययने प्रयुंक्ते तद्वदित्यनवद्यं प्रथमसूत्रं समाप्तं ॥ प्रथमसूत्रेण शास्त्रारंभमुपपाद्य शास्त्रमारभमाणः पूर्वोत्तराधिकरणयोः संगतिं वक्तुं वृत्तं कीर्तयति ब्रह्मेति मुमुक्षुणा ब्रह्मज्ञानाय वेदांतविचारः कर्तव्य इत्युक्तं ब्रह्मणो विचार्यत्वोक्त्यार्थात्प्रमाणादिविचाराणां प्रतिज्ञातत्वेपि ब्रह्मप्रमाणं ब्रह्मफ

ब्रह्मजिज्ञासितव्यमित्युक्तं किंलक्षणं पुनस्तद्ब्रह्मेति अत आह भगवान्सूत्रकारः जन्माद्यस्य यतइति

लादिरित्यादिविशिष्टविचाराणां विशेषणब्रह्मज्ञानं विना कर्तुमशक्यत्वात्तत्स्वरूपज्ञानाय आदौ लक्षणं वक्तव्यं तन्न संभवतीत्याक्षिप्य सूत्रकृतं पूजयन्नेव लक्षणसूत्रमवतारयति किंलक्षणमिति किमाक्षेपे नास्त्येव लक्षणमित्यर्थः आक्षेपेणास्योत्थानादाक्षेपसंगतिः लक्षणद्योतिवेदांतानां स्पष्टब्रह्मलिंगानां लक्ष्यब्रह्मणि समन्वयोक्तेः श्रुतिशास्त्राध्यायपादसंगतयः तथाहि यतोवाइमानि भूतानि जायंते इत्यादिवाक्यं विषयः ॥

तत्किंब्रह्मणोलक्षणंवक्तिनवेतिसंदेहः तत्रपूर्वपक्षेब्रह्मस्वरूपासिध्यामुक्त्यसिद्धिः फलंसिद्धांतेतत्सिद्धिरितिभेदः यद्यप्या
क्षेपसंगतौपूर्वाधिकरणफलमेवफलमितिकृत्वापृथङ्नवक्तव्यं तदुक्तं आक्षेपेचापवादेचप्राप्त्यांलक्षणकर्मणिप्रयोजनंनवक्त
व्यंयत्रकृत्वाप्रवर्ततेइति तथापिस्पष्टार्थमुक्तमितिमंतव्यं यत्रपूर्वाधिकरणसिद्धांतेनपूर्वपक्षः तत्रापवादिकीसंगतिः प्रासिस्त-
दूर्ध्वचिंतातत्रनवक्तीतिप्राप्तं जन्मादेर्जगद्धर्मत्वेनब्रह्मलक्षणत्वायोगात् नचजगदुपादानत्वेसतिकर्तृत्वंलक्षणमितिवाच्यं क
र्तुरुपादानत्वेदृष्टांताभावेनानुमानाप्रवृत्तेः नचश्रौतस्यब्रह्मणः श्रुत्यैवलक्षणसिद्धेः किमनुमानेनेतिवाच्यं अनुमानस्यश्रु
त्यनुग्राहकत्वेनतदभावेतद्विरोधेवाश्रुत्यर्थासिद्धेः नचजगत्कर्तृत्वमुपादानत्वंवाप्रत्येकंलक्षणमस्त्वितिवाच्यं कर्तृमा
त्रस्योपादानाद्भिन्नस्यब्रह्मत्वायोगात् वस्तुतः परिच्छेदादितिप्राप्तंपुरुषाभ्यूहमात्रस्यानुमानस्याप्रतिष्ठितस्यातींद्रिया
र्थेस्वातंत्र्यायोगात् अपौरुषेयतयानिर्दोषश्रुत्युक्तोभयकारणत्वंस्यरुवादिदृष्टांतेनसंभावयितुंशक्यत्वात्तदेवलक्षणमितिसि
द्धांतयति जन्माद्यस्ययतइतीति अत्रयद्यपिजगज्जन्मस्थितिलयकारणत्वंलक्षणंप्रतिपाद्यते तथाप्यग्रेप्रकृतिश्चेत्यधि
करणेतत्कारणत्वंनकर्तृत्वमात्रंकिंतुकर्तृत्वोपादानत्वोभयरूपमिति वक्ष्यमाणंसिद्धवत्कृत्योभयकारणत्वंलक्षणमित्यु-
च्यतइतिनपौनरुक्त्यं ननुजिज्ञास्यनिर्गुणब्रह्मणः कारणत्वंकथंलक्षणमितिचेत् उच्यते यथारजतंशुक्तेर्लक्षणंयद्रजतंसाशु- १८
क्तिरिति तथायज्जगत्कारणंतद्ब्रह्मेतिकल्पितंकारणत्वम् तटस्थंसदेवब्रह्मणोलक्षणमित्यनवद्यम् ॥ ५ ॥ ॥

सूत्रं व्याचष्टे जन्मेत्यादिना बहुव्रीहौ अन्यपदार्थः सर्ववाक्यार्थस्यान्यप दार्थस्यविशेषणानि यथाचित्रगोर्देवदत्तस्यचित्र गावः तद्वदत्रापिजन्मादीतिनपुंसकैकवचनद्योतितस्यसमाहारस्यजन्मस्थितिभंगस्यजन्मविशेषणं तथाचजन्मनः समासार्थै कदेशस्यगुणत्वेनसंविज्ञानंयस्मिन् बहुव्रीहौसतद्गुणसंविज्ञानइत्यर्थः तत्रयज्जन्मकारणं तत् ब्रह्मेति ब्रह्मत्वविधानमयु क्तंस्थितिलयकारणाद्भिन्नत्वेनज्ञातेब्रह्मत्वस्यज्ञातुमशक्यत्वात् अतोजन्मस्थितिभंगैर्निरूपितानित्रीणिकारणत्वानि

जन्मोत्पत्तिरादिरस्येति तद्गुणसंविज्ञानोबहुव्रीहिः जन्मस्थितिभंगंसमासार्थः जन्मनश्चादित्वं-श्रुतिनिर्देशापेक्षंवस्तुवृत्तापेक्षंच श्रुतिनिर्देशस्तावत् यतोवाइमानिभूतानिजायंतेइत्यस्मि-न्वाक्येजन्मस्थितिप्रलयानां क्रम दर्शनाद्वस्तुवृत्तमपिजन्मनालब्धसत्ताकस्यधर्मिणः स्थिति प्रलयसंभवात्

मिलितान्येवलक्षणमितिमत्वासूत्रेसमाहारोद्योतितइतिध्येयं नन्वादित्वंजन्मनःकथंज्ञातव्यंसंसारस्यानादित्वादि-त्यतआह जन्मनश्चेतिमूलश्रुत्यावस्तुगत्याचादित्वंज्ञातत्वातदपेक्ष्यसूत्रकृताजन्मनआदित्वमुक्तमित्यर्थः ॥ ॥

इदमः प्रत्यक्षार्थमात्रवाचित्वमाशंक्योपस्थितसर्वकार्यवाचित्वमाह अस्येतीति वियदादिजगतोनित्यत्वान्नजन्मादि संबंधइत्यतआह षष्ठीति वियदादिमहाभूतानांजन्मादिसंबंधोवक्ष्यतइतिभावः ननुजगतोजन्मादेर्वाब्रह्मसंबंधाभा वान्नलक्षणत्वमित्याशंक्यतत्कारणत्वंलक्षणमितिपंचम्यर्थमाहयतइतीति यच्छब्देनसत्यंज्ञानमनंतं आनंदरूपंवस्तू च्यते आनंदाध्येवेतिनिर्णीतत्वात तथाचस्वरूपलक्षणसिद्धिरितिमंतव्यंपदार्थमुक्त्वापूर्वसूत्रस्थब्रह्मपदानुषंगेणतच्छ

अस्येतिप्रत्यक्षादिसंनिधापितस्यधर्मिण इदमानिर्देशः षष्ठी जन्मादिधर्मसंबंधार्थायतइतिकारण निर्देशः अस्यजगतोनामरूपाभ्यांव्याकृतस्य॥

ब्दाध्याहारेणचसूत्रवाक्यस्यार्थमाह अस्येत्यादिनाकारणस्यसर्वज्ञत्वादिसंभावनार्थानिजगतोविशेषणानियथाकुंभका रः प्रथमंकुंभशब्दाभेदेनविकल्पितंपृथुबुध्नोदराकारस्वरूपंबुद्धावालिख्यतदात्मनाकुंभंव्याकरोति बहिःप्रकटयति - तथापरमकारणमपिस्वेक्षितनामरूपात्मनाव्याकरोति इत्यनुमीयतइतिमत्वाह नामरूपाभ्यामिति इत्थंभावेतृतीया- आद्यकार्यंचेतनजन्यंकार्यत्वात् कुंभवदितिप्रधानशून्ययोर्निरासः॥ ॥ ॥ ॥ ॥

२९

हिरण्यगर्भादि जीवजन्यत्वं निरस्यति अनेकेति भाष्ये वैश्वानरे श्र्यादौ पितापुत्रयोः कर्तृभोक्त्रोर्भेदात्पृथगुक्तिः यो ब्रह्माणं विदधाति पूर्वं सर्व आत्मनो व्युच्चरंतीति श्रुत्यास्थूलसूक्ष्मदेहोपाधिद्वारा जीवानां कार्यत्वेन जगन्मध्यपातित्वान्न जगत्कारणत्वमित्यर्थः कारणस्य सर्वज्ञत्वं संभावयति प्रतिनीयतेति प्रतिनियतानि व्यवस्थितानि देशकालनिमित्तानि येषां क्रियाफलानां तदाश्रयस्येत्यर्थः स्वर्गस्य क्रियाफलस्य मेरुपृष्ठं देशः देहपाताद्‍र्ध्वकाल उत्तरायणमरणादि निमित्तं च प्रतिनियतं एवं राज

अनेककर्तृभोक्तृसंयुक्तस्य प्रतिनियतदेशकालनिमित्तक्रियाफलाश्रयस्य मनसाप्यचिंत्यरचनारूपस्य जन्मस्थितिभंगं यतः सर्वज्ञात्सर्वशक्तेः कारणाद्भवति तद्ब्रह्मेति वाक्यशेषः अन्येषामपि भावविकाराणां त्रिष्वेवांतर्भाव इति जन्मस्थितिनाशानामिह ग्रहणम् ॥

सेवाफलग्रामादेर्देशादिव्यवस्थासेवा तथा च यथा सेवाफलं देशाद्यभिज्ञदातृकं तथा कर्मफलं फलत्वादिति सर्वज्ञत्वसिद्धिरिति भावः सर्वशक्तित्वं संभावयति मनसापीति नन्वन्येपि विपरिणामादयो भावविकाराः संतीति किमिति जन्मादीत्यादिपदेन न गृह्यंते तत्राह अन्येषामिति वृद्धिपरिणामयोर्जन्मनि अपक्षयस्य नाशेंतर्भाव इति भावः

देहोजायतेस्तिविपरिणमतेवर्धते अपक्षीयतेविनश्यतीतियास्कमुनिवाक्यं. एतत्सूत्रमूलंकिंनस्यादित्यतआहयास्केति यास्कमुनिः किलमहाभूतानामुत्पंनानांस्थितिकाले भौतिकेषुप्रत्यक्षेण जन्मादिषड्कमुपलभ्यनिरुक्तवाक्यंचकारतन्मूलीकृत्यजन्मादिषड्क-कारणत्वंलक्षणंसूत्रार्थ इतिग्रहणेसूत्रकृताब्रह्मलक्षणंनसंगृहीतं किंतुमहाभूतानांलक्षणमुक्तमितिशंकास्यात्सामाभूदितिये श्रुत्युक्ता जन्मादयस्त एवगृह्यंतइत्यर्थः यदिनिरुक्तस्यापिश्रुतिर्मूलमितिमहाभूतजन्मादिकमर्थस्तर्हिसाश्रुतिरेवसूत्रस्यमूल-मस्तुकिमंतर्गड्नानिरुक्तेनेतिभावः यदिजगतोब्रह्मातिरिक्तं कारणंस्यात् तदाब्रह्मलक्षणस्य तत्राति व्याप्त्यादिदोषस्यात् अत

यास्कपरिपठितानांतुजायतेस्तीत्यादीनांग्रहणेतेषांजगतस्थितिकालेसंभाव्यमानत्वात्मूलकारणादुत्पत्तिस्थिति नाशाज्जगतोनगृहीताःस्युरित्याशंक्येततन्माशंकीतियोत्पत्तिर्ब्रह्मणस्तत्रैवस्थितिःप्रलयश्चतेगृह्यंतेनयथोक्तवि-शेषणस्यजगतोयथोक्तविशेषणमीश्वरंमुत्कान्यतःप्रधानादचेतनादणुभ्योभावात्संसारिणोवाउत्पत्यादिसंभावयितुंशक्यम्

स्तन्निरासायलक्षणसूत्रेणब्रह्मविनाजगज्जन्मादिकंनसंभवतिकारणांतरासंभवादितियुक्तिःसूचितासातर्कपादेविस्तरेणवक्ष्यते - अथनासंक्षेपेणतांदर्शयति नयथोक्तेत्यादिनानामरूपाभ्यां व्याकृतस्येत्यादीनांचतुर्णांजगद्विशेषणानां व्याख्यानावसरे प्रधानशून्य योःसंसारिणश्चनिरासोदर्शितःपरमाणूनामचेतनानांस्वतःप्रवृत्त्ययोगाज्जीवान्यस्यज्ञानशून्यत्वनियमेनानुमानात्सर्वज्ञेश्वरासिद्धौतेषां प्रेरकाभावात् जगदारंभकत्वासंभवइतिभावः॥ ॥ ३०

स्वभावादेवविचित्रंजगदितिलोकायतस्तंप्रत्याह नचेति जगदुत्पत्त्यादिसंभावयितुंनशक्यमित्यन्वयः किंस्वयमेवस्वस्यहेतुरि
तिस्वभावः उत्तकारणानपेक्षत्वंनाद्यः आत्माश्रयात् नद्वितीयइत्याह विशिष्टेति विशिष्टान्यसाधारणानिदेशकालनिमित्ता
नि तेषांकार्यार्थिभिरुपादीयमानत्वात् कार्यस्यकारणानपेक्षत्वंनयुक्तमित्यर्थः अनपेक्षत्वेधान्यार्थिनांभूविशेषेवर्षादिकालेबी
जादिनिमित्तेचप्रवृत्तिर्नस्यादितिभावः पूर्वोक्तसर्वज्ञत्वादिविशेषणकमीश्वरंमुक्त्वाजगतउत्पत्त्यादिकंनसंभवतीतिभाष्येचकर्ता

नचस्वभावतोविशिष्टदेशकालनिमित्तानामिहोपादानात् एतदेवानुमानंसंसारिव्यतिरिक्तेश्वरास्तित्वादिसा
धनंमन्यंतेईश्वरकारणिनः॥

रंविनाकार्यंनास्तीतिव्यतिरेकउक्तः तेनयत्कार्यंतत्सकर्तृकंइतिव्याप्तिर्ज्ञायते एतदेवव्याप्तिज्ञानंजगतिपक्षेकर्तारंसाधयत् सर्वज्ञेश्वरं
साधयति किंप्रकृत्येति तार्किकाणांभ्रांतिमुपन्यस्यति एतदेवेति एतदेवानुमानमेवसाधनंनश्रुतिरितिमन्यंतइतियोजना अथवा
एतद्व्याप्तिज्ञानमेवश्रुत्यनुग्राहकयुक्तिमात्रत्वेनास्मत्संमतंसदनुमानंस्वतंत्रंइतिमन्यंतइत्यर्थः॥ ७ ६ ५

सर्वज्ञत्वमादिशब्दार्थःयद्वाव्याप्तिज्ञानसहकृतमेतल्लक्षणमेवानुमानंमन्यंतइत्यर्थः तत्रायंविभागः व्याप्तिज्ञानाज्जगतः कर्तास्तीत्यस्ति त्वसिद्धिःपश्चात्सकर्तासर्वज्ञः जगत्कारणत्वाद्व्यतिरेकेणकुलालादिवदितिसर्वज्ञत्वसिद्धिर्लक्षणादिति अत्रमन्यंतइत्यनुमानस्याभासत्वंसूचितं तथाहिअंकुरादौतावज्जीवः कर्तानभवतिजीवाद्भिन्नस्यघटवदचेतनत्वनियमादन्यःकर्तानास्त्येवेतिव्यतिरेकनि-श्चयाद्यत्कार्यंतत्सकर्तृकमितिव्याप्तिज्ञानासिद्धिःलक्षणलिंगकानुमानेतुबाधः अशरीरस्यजन्यज्ञानायोगाद्यज्ज्ञानंतन्मनोजन्यमिति

नन्विहापितदेवोपन्यस्तंजन्मादिसूत्रे॥

व्याप्तिविरोधेननित्यज्ञानासिद्धेर्ज्ञानाभावनिश्चयात् तस्मादतींद्रियार्थेश्रुतिरेवशरणंश्रुत्यर्थसंभावनार्थत्वेनानुमानंक्व किमात्रंनस्वतंत्रमितिभावः नन्विदमयुक्तंश्रुतेरनुमानांतर्भावमभिप्रेत्यभवदीयसूत्रकृता अनुमानस्यैवोपन्यस्तत्वादितिवैशेषिकःशंकते न- न्विति ततोमन्यंतइत्यनुमानस्याभासोक्तिरयुक्तेतिभावः

यदिश्रुतीनांस्वतंत्रमानत्वंनस्यात्तर्हितत्तुसमन्वयादित्यादीनातासांतात्पर्यंसूत्रकृन्नविचारयेत् तस्मादुत्तरसूत्राणांश्रुतिविचारार्थत्वा
ज्जन्माद्यादिसूत्रेपिश्रुतिरेवस्वातंत्र्येणविचार्यतेनानुमानमितिपरिहरति नेति किंचमुमुक्षोर्ब्रह्मावगतिरभीष्टायदर्थमस्यशास्त्रस्या
रंभः साचनानुमानात् तंत्वौपनिषदमितिश्रुतेः अतोनानुमानंविचार्यमित्याह वाक्यार्थेति वाक्यस्यतदर्थस्यचविचाराद्यदध्य

नवेदांतवाक्यग्रथनार्थत्वात् सूत्राणांवेदांतवाक्यानिहिसूत्रैरुदाहृत्यविचार्यंते ॥ वाक्यार्थ
विचारणाध्यवसाननिर्वृत्ताहिब्रह्मावगतिःनानुमानादिप्रमाणांतरनिर्वृत्ता ॥ ५ ॥ ॥

वसानंतात्पर्यनिश्चयः प्रमेयसंभवनिश्चयश्चतेनजाताब्रह्मावगतिर्मुक्तयेभवतीत्यर्थः संभवोबाधाभावः ॥ ॥ श्रीरामसमर्थः
॥ ५ ॥ ॥ श्रीमुकुंदकमलाश्रयोस्ति ॥ ५ ५ ५ ५ ५ ५ ५ ५

नुनु किमनुमानमनपेक्षितमेव नेत्याह सत्कत्विति विमतमभिन्ननिमित्तोपादानकं कार्यत्वात् ऊर्णनाभिवत् विमतं चेतनप्रकृतिकं
कार्यत्वात्सुखादिवदिति अनुमानं श्रुत्यर्थदार्ढ्यायापेक्षितमित्यर्थः दार्ढ्यं संशयविपर्यासनिवृत्तिः मंतव्य इति श्रुतार्थस्तर्केण सं
भावनीय इत्यर्थः यथा कश्चिद्गांधारदेशीयश्चोरैरन्यत्रारण्ये बद्धनेत्र एव त्यक्तः केनचिन्मुक्तबंधः तदुक्तमार्गग्रहणसमर्थः पंडि

सत्कृतु वेदांतवाक्येषु जगतो जन्मादिकारणवादिषु तदर्थग्रहणदार्ढ्यायानुमानमपि वेदांतवाक्याविरोधि प्रमाणं-
भवन्न निवार्यते श्रुत्यैव च सहायतया तर्कस्याभ्युपेतत्वात् श्रोतव्यो मंतव्य इति श्रुतिः पंडितो मेधावी गांधारानेवोप
संपद्यते एवमेवेहाचार्यवान्पुरुषो वेदेति च पुरुषबुद्धिसाहाय्यमात्मनो दर्शयति॥ ५ ५ ५ ५

तः स्वयं तर्ककुशलो मेधावी स्वदेशानेव प्राप्नुयादेवमेवेहाविद्याकामकर्मादिभिः स्वरूपानंदात् प्रच्याव्यास्मिन्नगहने संसारे क्षिप्तः केनचि
द्दयापरवशेनाचार्येण नासि त्वं संसारी किंतु तत्त्वमसीत्युपदिष्टस्वरूपः स्वयं तर्ककुशलश्चेत्स्वरूपं जानीयान्नान्यथेति श्रुतिः पुरुषमति ३२
रूपतर्कापेक्षां दर्शयतीत्याह पंडित इति आत्मनः श्रुतेरित्यर्थः॥ ॥ ५ ॥ ॥ ५ ॥ ॥ ५ ॥ ॥ ५ ॥ ॥ ५ ॥

ननुब्रह्मणोमननाद्यपेक्षानयुक्ता वेदार्थत्वात्धर्मवत् किंतुश्रुतिलिंगवाक्यादय एवापेक्षिताइत्यतआह नेति जिज्ञास्यधर्मइवजिज्ञा-
स्येब्रह्म णी ति व्याख्येयं अनुभवोब्रह्मसाक्षात्काराख्येविद्वदनुभवः आदिपदान्मननिदिध्यासनयोर्ग्रहः तत्र हेतुमाह अनुभ
वेति मुक्त्यर्थंब्रह्मज्ञानस्यशाब्दस्यसाक्षात्कारावसानत्वापेक्षणात् प्रत्यग्भूतसिद्धब्रह्मगोचरत्वेनसाक्षात्कारफलकत्वसंभवा
त्तदर्थंमननाद्यपेक्षायुक्ता धर्मेतुनित्यपरोक्षेसाध्येसाक्षात्कारस्यानपेक्षितत्वादसंभवाच्चश्रुत्यानिर्णयमात्रमनुष्ठानायापेक्षितंलिं
गादयस्तुश्रुत्यंतर्भूताएवश्रुतिद्वारानिर्णयोपयोगित्वेनापेक्ष्यंतेनमननादयः अनुपयोगादित्यर्थः निरपेक्षःशब्दः श्रुतिःशब्द

नधर्मजिज्ञासायामिवश्रुत्यादयएवप्रमाणंब्रह्मजिज्ञासायां किंतुश्रुत्यादयोऽनुभवादयश्चयथासंभवमिहप्रमाणमनु-
भवावसानत्वात्भूतवस्तुविषयत्वाच्चब्रह्मज्ञानस्यकर्तव्येहिविषयेनानुभवापेक्षास्तीतिश्रुत्यादीनामेवप्रामाण्यंस्यात्

स्यार्थप्रकाशनसामर्थ्यंलिंगंपदंयोग्यतरपदाकांक्षंवाक्यंअंगवाक्यसापेक्षंप्रधानवाक्यंप्रकरणंक्रमपठितानामर्थानां क्रमपठितेर्यथा
क्रमंसंबंधःस्थानंयथाऐंद्राग्नादयइष्टयोदशक्रमेणपठिताःदशमंत्राश्चैंद्राग्नीरोचनादिवइत्याद्यास्तत्रप्रथमेष्टौप्रथममंत्रस्यविनियोग
इत्याद्यूहनीयंसंज्ञासाम्यंसमाख्या यथाध्वर्यवसंज्ञिकानांमंत्राणामाध्वर्यवसंज्ञकेकर्मणिविनियोगइतिविवेकः॥ ॥१॥ ।४। ॥

धर्मस्यसाध्यत्वमुपपाद्यतत्रविध्यादियोग्यतामाह विधीति विधिप्रतिषेधाश्चविकल्पादयश्चधर्मेसाध्येयेर्थवंतः सावकाशाभवंति तेब्रह्मण्यपिस्फुरित्यर्थः यजेतनसुरांपिबेदित्यादयोविधिनिषेधाः व्रीहिभिर्यवैर्वायजेतेतिसंभावितोविकल्पः ग्रहणाग्रहणयोरैच्छिकः उदितानुदितहोमयोर्व्यवस्थितविकल्पः नहिंस्यादित्युत्सर्ग अग्नीषोमीयंपशुमालभेतेत्यपवादः तथाआह

विधिप्रतिषेधाश्चात्रार्थवंतःस्फुः विकल्पोत्सर्गापवादाश्चनतुवस्त्वेवंनैवंअस्तिनास्तीतिवाविकल्प्यते॥

वनीयेजुहोतित्युत्सर्गः अश्वस्यपदेपदेजुहोतीत्यपवादइतिविवेकः एतेब्रह्मणिस्फुरित्यत्रेष्टापत्तिंवारयति नत्वित्यादि नाभूतवस्तुविषयत्वादित्यंतेन इदंवस्तु एवंनैवंघटः पटोवेतिप्रकारविकल्पः अस्तिनास्तिवेतिसत्तास्वरूपविकल्पः॥ ॥

ननुवस्तुन्यपि आत्मादौवादिनामस्तिनास्तीत्यादिविकल्पादृश्यंतेतत्राह विकल्पनास्त्विति अस्तित्वादिकोटिस्मरणंपुरुष
बुद्धिस्तन्मूलामनस्पंदितमात्राःसंशयविपर्यय विकल्पानप्रमारूपाइत्यक्षरार्थःअयंभावःधर्मोहियथायथाज्ञायतेतथा
तयाकर्तुंशक्यतइतियथाशास्त्रंपुरुषबुध्यपेक्षाविकल्पाःसर्वेप्रमाणरूपाएवभवंतितत्साम्येब्रह्मण्यपिसर्वेविकल्पायथा
र्थाःस्फुरितितत्राप्येवमितिवदंतंप्रत्याह नेति यदिसिद्धवस्तुज्ञानमपिसाध्यज्ञानवत्पुरुषबुद्धिमपेक्ष्य जायेततदासिद्धेविकल्पायथा

विकल्पनास्तुपुरुषबुध्यपेक्षाःनवस्तुयाथात्म्यज्ञानंपुरुषबुध्यपेक्षंकिंतर्हिवस्तुतंत्रमेवतत् नहिस्थाणावेक-
स्मिन्स्थाणुर्वापुरुषोवान्योवेतितत्वज्ञानंभवति तत्रपुरुषोन्योवेतिमिथ्याज्ञानंस्थाणुरेवेतितत्वज्ञानंवस्तुतं
त्रत्वात् एवंभूतवस्तुविषयाणांप्रमाण्यंवस्तुतंत्रम्॥ ॥५॥ ॥७॥ ॥३॥ ॥५॥

र्थास्फुः नसिद्धवस्तुज्ञानंपौरुषंकिंतर्हिप्रमाणवस्तुजन्यं तथाचवस्तुनएकरूपत्वादेकमेवज्ञानंप्रमाअन्येविकल्पाअयथार्थाएवे-
त्यर्थःअत्रदृष्टांतमाहनहिस्थाणाविितिस्थाणुरेवेत्यवधारणेसिद्धेसर्वेविकल्पायथार्थानभवंतीत्यर्थःतत्रयद्वस्तुतंत्रंज्ञानंतद्यथार्थं १४
यत्पुरुषतंत्रंतन्मिथ्येति विभजते तत्रेति स्थाणावित्यर्थःस्थाणावुक्तन्यायंघटादिष्वतिदिशति॥ एवमिति॥ ५ ५ ५

प्रकृतमाह तत्रैवंसतीति सिद्धेर्थेज्ञानप्रमात्वस्यवस्त्वधीनत्वेसति ब्रह्मज्ञानमपिवस्तुजन्यमेवयथार्थंनपुरुषतंत्रंभूतार्थविषय त्वात् स्थाणुज्ञानवदित्यर्थः अतः साध्येर्थेसर्वेविकल्पाः पुंतंत्राअयथार्थाः नसिद्धेर्थइतिवैलक्षिण्यात् नधर्मसाम्यंब्रह्मणइतिम ननाद्यपेक्षासिद्धेतिभावः ननुतर्हिब्रह्मप्रत्यक्षादिगोचरंधर्मविलक्षणत्वात् घटादिवत् तथाचजन्मादिसूत्रेजगत्कारणत्वानु- मानंविचार्यंसिद्धार्थेतस्यमानत्वात् नश्रुतिःसिद्धार्थेतस्याप्रमानत्वेनतद्विचारस्यनिष्फलत्वादितिशंकतेनन्वितिप्रमाणांत

तत्रैवंसतिब्रह्मज्ञानमपिवस्तुतंत्रमेवभूतवस्तुविषयत्वात् ननुभूतवस्तुत्वेब्रह्मणःप्रमाणांतरविषयत्वमेवे तिवेदांतवाक्यविचारणाअनर्थिकैवप्राप्तानेंद्रियाविषयत्वेनसंबंधाग्रहणात् स्वभावतोवि षयविषयाणिइं द्रियाणि नब्रह्मविषयाणि॥

रविषयत्वमेवप्राप्तमितिकृत्वाप्रमाणांतरस्यैवविचारप्राप्तावितिशेषः अत्रपूर्वपक्षीप्रष्टव्यः किंयत्कार्यंतत्ब्रह्मजमित्यनुमा- नंब्रह्मसाधकंकिंवायत्कार्यंतत्सकारणमितिनाद्यः व्याप्त्यसिद्धेरित्याहनेतिब्रह्मणइंद्रियाग्राह्यत्वात्प्रत्यक्षेणव्याप्तिग्रहायोगान्नप्रमा- णांतरविषयत्वमित्यर्थः इंद्रियाग्राह्यत्वंकुतइत्यतआहस्वभावतइति परांचिखानिव्यतृणत्स्वयंभूरितिश्रुतेर्ब्रह्मणोरूपादिहीन- त्वाच्चेत्यर्थः ॥ ॥६७॥

इंद्रियाग्राह्यत्वेपिव्याप्तिग्रहः किंनस्यादित्यतआह सतिहीति तन्नास्तीतिशेषः इदंकार्यंब्रह्मजमिति व्याप्तिप्रत्यक्षंब्रह्मणोतीं
द्रियत्वान्नसंभवतीत्यर्थः द्वितीयेकारणसिद्धावपिकारणस्यब्रह्मत्वंश्रुतिंविनाज्ञातुमशक्यमित्याह कार्यमात्रमितिसंबधंकृतंय
स्मात्कृतिमंतरेणजगत्कारणंब्रह्मेतिनिश्चयालाभस्तस्मात् तल्लाभायश्रुतिरेवप्राधान्येनविचारणीया अनुमानंतूपादानत्वादि

सतिहींद्रियविषयत्वेब्रह्मणइदंब्रह्मणासंबद्धंकार्यमितिगृह्येतकार्यमात्रमेवगृह्यमाणंकिंब्रह्मणासंबद्धंकिमन्ये
नकेनचिद्वासंबद्धमितिनशक्यंनिश्चेतुं तस्माज्जन्मादिसूत्रंनानुमानोपन्यासार्थंकिंतर्हिवेदांतवाक्य
प्रदर्शनार्थंकिंपुनस्तद्वेदांतवाक्यंसूत्रेणेहलिलक्षयिषितं॥ ५ ५ ५ ५ १

सामान्यद्वारामृदादिवत्ब्रह्मणः स्वकार्यात्मकत्वादिश्रौतार्थसंभावनार्थंगुणतयाविचार्यमित्युपसंहरति तस्मादिति एतत्सूत्रस्य
विषयवाक्यंपृच्छति किंपुनरितिइहब्रह्मणिलक्षणार्थत्वेनविचारयितुमिष्टंवाक्यंकिमित्यर्थः॥ ५॥ श्रीरामः॥ ५॥ ॥

अत्रहिप्रथमसूत्रेविशिष्टाधिकारिणोब्रह्मविचारंप्रतिज्ञायब्रह्मज्ञातुकामस्यद्वितीयसूत्रेलक्षणमुच्यते तथैवक्रतावपिमुमुक्षोर्ब्रह्म-ज्ञातुकामस्यजगत्कारणत्वस्वरूपलक्षणानुवादेनब्रह्मज्ञाप्यतइतिश्रौतार्थक्रमानुसारित्वंसूत्रस्यदर्शयितुंसोपक्रमंवाक्यंप ठति भृगुरिति अधीहिस्मारयउपदिशेत्यर्थः अन्वयेनेत्येकत्वंविवक्षितं नानात्वेब्रह्मत्वविधानायोगात् यज्जगत्कारणंतदेकमित्य-वांतरवाक्यंयदेकंकारणंतद्ब्रह्मेतिवायत्कारणंतदेकंब्रह्मेतिवामहावाक्यमितिभेदः किंवाहिस्वरूपलक्षणमित्याशंक्यवाक्यशे

भृगुर्वैवारुणिः वरुणंपितरमुपससार अधीहिभगवोब्रह्मेतीत्युपक्रम्याह यतोवाइमानिभूतानिजायंते येन जातानिजीवंति यत्प्रयंत्यभिसंविशंति तद्विजिज्ञासस्वतद्ब्रह्मेति तस्यचनिर्णायकंवाक्यं आनंदाध्येवख ल्विमानिभूतानिजायंते आनंदेनजातानिजीवंति आनंदंप्रयंत्यभिसंविशंतीति अन्यान्यप्येवंजातीय कानिनित्यशुद्धबुद्धमुक्तस्वभावसर्वज्ञस्वरूपकारणविषयाण्युदाहर्तव्यानि॥

षंनिर्णीयतः शब्दार्थः सत्यज्ञानानंद इत्याह तस्येचेति यः सर्वज्ञः सर्ववित् तस्मादेतद्ब्रह्मनामरूपमन्नंचजायतेविज्ञानमा नंदंब्रह्मेत्यादिशाखांतरवाक्यान्यप्यस्यविषयइत्याह अन्यान्यपीति एवंजातीयकत्वमेवाह नित्येति तदेवंसर्वासुशाखासु लक्षणद्वयवाक्यानिजिज्ञास्येब्रह्मणिसमन्वितानि तद्द्वयामुक्तिरितिसिद्धम् ॥ ५॥ ५ ५ ५ ५

यस्यनिश्वसितंवेदाः सर्वार्थज्ञानशक्तयः श्रीरामंसर्ववेत्तारं वेदवेद्यमहंभजे वृत्तानुवादेनसंगतिं वदन्नुत्तरसूत्रमवतारयति जगदि
ति चेतनस्य ब्रह्मणो जगत्कारणत्वोक्त्यासर्वज्ञत्वमर्थात् प्रतिज्ञातंसूत्रकृता चेतनसृष्टेर्ज्ञानपूर्वकत्वात् तथाचब्रह्मसर्वज्ञंसर्वका
रणत्वात् योयत्कर्तासतत्ज्ञः यथाकुलालइतिस्थितं तदेवार्थिकं सर्वज्ञत्वं प्रधानादिभिरासाय वेदकर्तृत्वहेतुनादृढयन्नाहेत्यर्थः
हेतुद्वयस्यैकार्थसाधनत्वादेकविषयत्वमवांतरसंगतिः यद्वावेदस्यनित्यत्वात्ब्रह्मणः सर्वहेतुतानास्तीत्याक्षेपसंगत्यावेदहेतुत्वमु
च्यते अस्यमहतोभूतस्यनिश्वसितमेवैतद्यदृग्वेदोयजुर्वेदः सामवेदोथर्वांगिरसइतिवाक्यंविषयः तत्किंवेदहेतुत्वेनब्रह्मणः

जगत्कारणत्वप्रदर्शनेनसर्वज्ञंब्रह्मेत्युपक्षिप्तंतदेवदृढयन्नाह शास्त्रयोनित्वादितिमहतऋग्वेदादेः शास्त्रस्याने
कविद्यास्थानोपबृंहितस्य ॥ ५ ५ ५ ५ ५ ५ ५॥॥

सर्वज्ञत्वंसाधयतिउतनसाधयतीतिसंदेहः तत्रव्याकरणादिवद्वेदस्यपौरुषेयत्वेमूलप्रमाणसापेक्षत्वेनाप्रामाण्यापातान्नसाध
यतीतिपूर्वपक्षेजगद्धेतोश्चेतनत्वासिद्धिः फलंसिद्धांतेतत्सिद्धिः अस्यवेदांतवाक्यस्यस्पष्टब्रह्मलिंगस्यवेदकर्तरिसमन्वयोक्तेः ३६
श्रुतिशास्त्राध्यायपादसंगतयः॥ ॥५॥ ॥५॥ ॥५॥ ॥५॥ ॥५॥ ॥५॥ ॥

एवमापादं श्रुत्यादिसंगतयः उल्या: वेदेहिसर्वार्थप्रकाशनशक्तिरुपलभ्यते सात दुपादानब्रह्मगतशक्तिपूर्विका तद्भूतावाप्रका
शनशक्तित्वात् कार्यगत शक्तित्वा द्दाप्रदीपशक्तिवदितिवेदोपादानत्वेनब्रह्मणः स्वसंबद्धाशेषार्थप्रकाशनसामर्थ्यरूपंसर्व
साक्षित्वंसिध्यति यद्वायथा अध्येतारः पूर्वक्रमंज्ञात्वावेदंकुर्वंति तथा विचित्रगुणमायासहायेनानाप्तानंदस्वप्रका
शचिन्मात्रः परमेश्वरः स्वकृतपूर्वकल्पीयक्रमसजातीयक्रमवंतंवेदराशिंतदार्थांश्चयुगपज्ज्ञानव्वेवकरोतीतिनवेदस्यपौरु
षेयता यत्रत्वर्थज्ञानपूर्वकंवाक्यज्ञानंवाक्यसृष्टौकारणं तत्रपौरुषेयता अत्रचयोगपद्यात् नसा अतोवेदकर्तावेदाभिवत
दर्थमपिस्वसंबद्धंनांतरीयकतयाजानातीति सर्वज्ञ इतिसिद्धांतयति शास्त्रेति शास्त्रंप्रतिहेतुत्वात् ब्रह्मसर्वज्ञंसर्वकारणंचेति
संगतिद्वयानुसारेणसूत्रयोजनामभिप्रेत्यपदानिव्याचष्टेमहतइति हेतोः सर्वज्ञत्वसिद्ध्यर्थेवेदस्यविशेषणानितत्रग्रंथतोर्थ
तश्चमहत्वंहितशासनोत्शास्त्रत्वं शास्त्रशब्दः शब्दमात्रोपलक्षणार्थइतिमत्वाह अनेकेति पुराणन्यायमीमांसाधर्मशास्त्रा
णि शिक्षाकल्पव्याकरणनिरुक्तछंदोज्योतिषाणिषडंगानि इतिदशविद्यास्थानानिवेदार्थज्ञानहेतवः तैरुपकृतस्येत्यर्थः
॥ श्रीरामायनमोनमः ॥ ॥ २ ॥ ॥ ७ ॥ ॥ ५ ॥ ॥ ६ ॥ ॥ १ ॥

अनेनमन्वादिभिः परिगृहीतत्वेनवेदस्यप्रामाण्यंसूचितं अबोधकत्वाभावादपिप्रामाण्यमित्याह प्रदीपवदितिसर्वार्थप्रकाशन
शक्तिमत्वेप्यचेतनत्वात्सर्वज्ञकल्पत्वंयोनिरुपादनंकर्तृच नन्नुसर्वज्ञस्ययोगुणःसर्वार्थज्ञानशक्तिमत्वंवेदस्यतदन्वितत्वेपितद्योनेः
सर्वज्ञत्वंकुतइत्यतआह नहीतिउपादानेतच्छक्तिंविनाकार्येतिदयोगादृदोपादानस्यसर्वज्ञत्वं अनुमानंतुपूर्वंदर्शितं नचाविद्य
यास्तद्यापत्तिः शक्तिमत्वेप्यचेतनत्वादितिभावः वेदः स्वविषयादधिकार्थज्ञानवज्जन्यः प्रमाणवाक्यत्वात् व्याकरणरामाय
णादिवदित्यनुमानांतरं तत्रव्याप्तिमाह यद्यदिति विस्तरः शब्दाधिक्यं अनेनार्थतोल्पत्वंवदन्कर्तुर्ज्ञानस्यार्थाधिक्यंसूचयति
प्रदीपवत्सर्वार्थविद्योतिनःसर्वज्ञकल्पस्ययोनिः कारणंब्रह्मनहीदृशस्यशास्त्रस्यऋग्वेदादिलक्षणस्यसर्वज्ञगुणा
न्वितस्यसर्वज्ञादन्यतःसंभवोस्ति यद्यद्विस्तरार्थंशास्त्रंयस्मात्पुरुषविशेषात्संभवतियथाव्याकरणादिपाणिन्यादेः
ज्ञेयैकदेशार्थमपिसततोप्यधिकतरविज्ञानइतिप्रसिद्धंलोकेकिमुवक्तव्यंअनेकशाखाभेदभिन्नस्यदेवतिर्य
ङ्मनुष्यवर्णाश्रमादिप्रविभागहेतोः ऋग्वेदाद्याख्यस्यसर्वज्ञानाकरस्य॥

दर्शयतेचार्थवादाधिक्यंवेदेअत्रैषाक्षरयोजना
यच्छास्त्रंयस्मात्पुरुषात्संभवतिसततःशास्त्रादधिकार्थज्ञा इतिप्रसिद्धंयथाशब्दसाधुत्वादिज्ञेयैकदेशार्थयस्यतदपिव्याकरणादि
पाणिन्यादेरधिकार्थज्ञात्संभवतियदल्पार्थमपिशास्त्रमधिकार्थज्ञात्संभवतितदाअस्यमहतइत्यादिश्रुतेर्यस्मान्महतोपरिच्छिन्नाद्भू
तात्सत्याद्योनेःसकाशादनेकशाखेत्यादिविशिष्टस्यवेदस्यपुरुषनिश्वासवदप्रयत्नेनैवसंभवः तस्यसर्वज्ञत्वंसर्वशक्तिमत्वंचेतिकिमुवक्तव्यंइति॥

तत्र वेदस्य पौरुषेयत्वशंकानिरासार्थं श्रुतिस्थनिश्वसितपदार्थमाह अप्रयत्नेनेति प्रमाणांतरेणार्थज्ञानप्रयासं विना निमेषादिन्यायेनेत्यर्थः अत्रानुमानेन यः सर्वज्ञ इति श्रुत्युक्तसर्वज्ञत्ववदाकार्यपाणिन्यादिवद्वेदकर्तरि अधिकार्थज्ञानसत्वमात्रं साध्यते न त्वर्थज्ञानस्य वेदहेतुत्वं निश्वसितश्रुतिविरोधात् वेदज्ञानमात्रेणाध्येतृवद्वेदकर्तृत्वोपपत्तेश्च इयान्विशेषः अध्येता परापेक्षः ईश्वरस्तु स्वकृतवेदानुपूर्वं स्वयमेव स्मृत्वा तथैव कल्पादौ ब्रह्मादिष्वाविर्भावयन्नना वृतज्ञानत्वात् तदर्थमप्यवर्जनीयतया जानातीति सर्वज्ञ इत्यनवद्यं अधुनात्र

अप्रयत्नेनैव लीलान्यायेन पुरुषनिश्वासवद्यस्मान्महतो भूताद्योनेः संभवः अस्य महतो भूतस्य निश्वसितमेवैतदृग्वेद इत्यादिश्रुतेस्तस्य महतो भूतस्य निरतिशयं सर्वज्ञत्वं सर्वशक्तिमत्वं चेति अथवा ॥

ह्मणो लक्षणानंतरं ब्रह्मप्रमाणजिज्ञासायां वर्णकांतरमाह अथवेति लक्षणप्रमाणयोर्ब्रह्मनिर्णयार्थत्वादेकफलकत्वं संगतिः तं त्वौपनिषदं पुरुषमिति श्रुतिर्ब्रह्मणो वेदैकवेद्यत्वं ब्रूते न वेति संशये कार्यलिंगेनैव लाघवात्कर्तुरेकस्य सर्वज्ञस्य ब्रह्मणः सिद्धेर्न ब्रूत इति प्राप्ते वेदप्रमाणकत्वात् ब्रह्मणो न प्रमाणांतरवेद्यत्वमिति सिद्धांतयति शास्त्रयोनित्वादिति

श्रु·भा· तद्व्याचष्टे यथोक्तमिति सर्वत्रपूर्वोत्तरपक्षफलद्वयंसंशयबीजंद्रष्टव्यं अत्रपूर्वपक्षेअनुमानस्यैवविचार्यतासिद्धिः फलंसिद्धांतेवे- अ·प्र·पा·
३८ दांतानामितिभेदः अनुमानादिनाब्रह्मासिद्धिः पूर्वसूत्रेप्रसंगान्निरस्ता किंचविचित्रप्रपंचस्यप्रासादादिवदेककर्तृकताबाधान्नला १
घवावतारः नचसर्वज्ञत्वात्कर्तुरेकत्वसंभवःएकत्वज्ञानात्सर्वज्ञत्वज्ञानंततस्तदित्यन्योन्याश्रयमभिप्रेत्याह शास्त्रादेवेति किंतच्छा
स्त्रमितितदाहशास्त्रमितिपृथगारंभमाक्षिपति किमर्थमितियेनहेतुनादर्शितंततः किमर्थमित्यर्थः जन्मादिलिंगकानुमानस्यसा

यथोक्तमृग्वेदादिशास्त्रंयोनिःकारणंप्रमाणमस्यब्रह्मणोयथावत्स्वरूपाधिगमेशास्त्रादेवप्रमाणात्जगतोजन्मादिका
रणंब्रह्माधिगम्यतइत्यभिप्रायःशास्त्रमुदाहृतंपूर्वसूत्रेयतोवाइमानिभूतानिजायंतइत्यादिकिमर्थमिदंसूत्रंया
वतापूर्वसूत्रएवैवंजातीयकंशास्त्रमुदाहरताशास्त्रयोनित्वंब्रह्मणोदर्शितं उच्यते तत्रसूत्राक्षरेणस्पष्टंशास्त्रस्या
नुपादानात् जन्मादिकेवलमनुमानमुपन्यस्तमित्याशंक्येततामाशंकांनिवर्तयितुमिदंसूत्रंप्रववृतेशास्त्रयोनित्वा
दितिकथंपुनर्ब्रह्मणःशास्त्रप्रमाणकत्वमुच्यते॥ " " " " " "

तंत्रेणोपन्यासशंकानिरासार्थंपृथक्सूत्रमित्याह उच्यत इति वेदांताः सिद्धब्रह्मपराःउतकार्यपराइतिनिष्फलत्वसापेक्षत्वयोः ३८
प्रसंगाप्रसंगाभ्यांसंशयेपूर्वसूत्रेद्वितीयवर्णकेनाक्षेपसंगत्यापूर्वपक्षमाह कथंपुनरित्यादिना॥ " " "

सदेवसौम्येत्यादीनांसर्वात्मत्वादिस्पष्टब्रह्मलिंगानांब्रह्मणिसमन्वयोक्तेः श्रुत्यादिसंगतश्चः पूर्वपक्षेवेदांतेषुमुमुक्षुप्रवृत्त्यसिद्धिः
सिद्धांतेतत्सिद्धिरितिविवेकः कथमित्याक्षेपेहेतुः यावतेति यतोजैमिनिसूत्रेणशास्त्रस्यवेदस्यक्रियापरत्वंदर्शितं अतोक्रि
यार्थत्वाद्वेदांतानांआनर्थक्यंफलवदर्थशून्यत्वंप्राप्तमित्यन्वयः सूत्रस्यायमर्थः प्रथमसूत्रेतावद्वेदस्याध्ययनकरणकभावनाविधि-
भाव्यस्यफलवदर्थपरत्वमुक्तंचोदनालक्षणोर्थोधर्मइतिद्वितियसूत्रेधर्मेकार्येचोदनाप्रमाणमितिवेदप्रामाण्यव्यापकंकार्यपरत्वमवसि

यावताम्नायस्यक्रियार्थत्वादानर्थक्यमतदर्थानामिति ॥ ७१ ॥ ॥

तंतत्रवायुर्वैक्षेपिष्टेत्याद्यर्थवादानांधर्मेप्रामाण्यमस्तिनवेतिसंशये आम्नायप्रामाण्यस्यक्रियार्थत्वेनव्याप्तत्वादर्थवादेषुधर्मस्याप्र-
तीतेरक्रियार्थानांतेषामानर्थक्यंनिष्फलार्थत्वं नचाध्ययनविध्युपात्तानांनिष्फलेसिद्धेर्थेप्रामाण्यंयुक्तं तस्मादनित्यमेषांप्रामा
ण्यमुच्यते व्यापकाभावाद्व्याप्यंप्रामाण्यंनास्त्येवेतियावत् ॥ ॥ ७१ ॥ ॥ ७१ ॥ ॥ ७१ ॥ ॥ ७१ ॥

एवंपूर्वपक्षेविधिनालेकवाक्यत्वात्स्तुत्यर्थेनविधीनांस्युरितिसूत्रेणसिद्धांतमाह क्रियापरत्वमिति अनित्यमिति भासे दर्शितमित्य
र्थः वायुर्वैक्षिप्रतमगामिनीदेवदनातद्देवताकंकर्मक्षिप्रमेवफलंदास्यतीत्येवंविधेयार्थानांस्तुतिरूपार्थेनद्वारेणवायव्यंश्वेतमा
लभेतेत्यादिविधिवाक्यैनैकवाक्यत्वादर्थवादाःसफलाःस्युःस्तुतिलक्षणयासफलकार्यपरत्वात्प्रमाणमर्थवादाइतियावत् नन्व
ध्ययनविधिगृहीतानांवेदांतानामानर्थक्यंनयुक्तमित्यत आहकर्तृति नवयंवेदांतानां आनर्थक्यंसाधयामः किंतुलोके सिद्धस्यमानां

क्रियापरत्वंशास्त्रस्यप्रदर्शितं अतोवेदांतानामानर्थक्यंअक्रियार्थत्वात् कर्तृदेवतादिफलप्रकाशनार्थत्वेनवा
क्रियाविधिशेषत्वमुपासनादिक्रियांतरविधानार्थत्वंवा ॥

तरवेद्यत्वान्निष्फलत्वाच्चसिद्धब्रह्मपरत्वेतेषांमानांतरसापेक्ष
त्वनिष्फलत्वयोःप्रसंगादप्रामाण्यापातात्कार्यशेषकर्तृदेवताफलानांप्रकाशनद्वाराकार्यपरत्वंवक्तव्यमितिब्रूमः तत्रत्वंतत्पदार्थ
वाक्यानांकर्तृदेवतास्तावकत्वंविविदिषादिवाक्यानांफलस्तावकत्वं ननु कर्मविशेषमनारभ्यप्रकरणांतराधीतानांवेदांतानांकथंत
च्छेषत्वंमानाभावादित्यरुच्यापक्षांतरमाह उपासनेति मोक्षकामोसद्ब्रह्माभेदमारोप्याहंब्रह्मास्मीत्युपासीतेत्युपासनाविधिः आदि ३९
शब्दाच्छ्रवणादयः तत्कार्यपरत्वंवावक्तव्यमित्यर्थः ॥ ५ ५ ५ ५ ५ ५ ५

ननुभूतं ब्रह्मविहायाभूतकार्यपरत्वं किमर्थं वक्तव्यमिति तत्राह नहीति परितः समंतान्निश्चयेन स्थितं परिनिष्ठितं भूतमनपेक्षंसिद्ध मितियावत् तस्य प्रतिपादनमज्ञातस्य वेदेन ज्ञापनं तत् नसंभवति मानांतरयोग्येर्थे वाक्यस्य संवादे सत्यनुवादकत्वादाग्नेर्हिमस्य भेषजमिति वाक्यवत् विसंवादेत्वाबोधकत्वादादित्योयूपइति वाक्यवदित्यर्थः सिद्धोनवेदार्थः मानांतरयोग्यत्वात् घटवदित्यर्थः का निष्फलत्वाच्चतथेत्याहतदिति सिद्धज्ञाने हेयोपादेयागोचरे फलाभावाच्चतन्नसंभवतीत्यर्थः फलंहिसुखावाप्तिर्दुःखहानं च तच्च

नहिपरिनिष्ठितवस्तुस्वरूपप्रतिपादनंसंभवति प्रत्यक्षादिविषयत्वात्परिनिष्ठितवस्तुनः तत्प्रतिपादने च हेयोपादेयरहिते पुरुषार्थाभावात् अतएव सोरोदीदित्येवमादीनां आनर्थक्यंमाभूदिति विधिनालेकवाक्यत्वात् स्तुत्यर्थेनविधीनांस्युरितिस्तावकत्वेनार्थवत्वमुक्तम् ॥

प्रवृत्तिनिवृत्तिभ्यांसाध्यं तेचोपादेयस्य प्रवृत्तिप्रयत्नकार्यस्य हेयस्य निवृत्तिप्रयत्नकार्यस्य ज्ञानाभ्यां जायेते न सिद्धज्ञानादिति भावः तर्हि सिद्धबोधिवेदवादानां साफल्यं कथमित्याशंक्यान्मायस्येत्यादिसंग्रहवाक्यं विवृणोति अतएवेति सिद्धज्ञानात्फलाभावादेवेत्यर्थः देवैर्निरुद्धः सोग्निररोदीदिति वाक्यस्याश्रुजत्वेन रजतस्यनिंदाद्वारा बर्हिषि न देयमिति सफलनिषेधशेषत्ववद्वेदांतानांविध्यादिशेषत्वंवाच्यमित्यर्थः ॥ ॥ ५ ॥ ॥ ५ ॥ ॥ ५ ॥ ॥ ५ ॥ ॥ ५ ॥

ननुतेषांमंत्रवत्त्वात्तन्न्यमस्तुनार्थवादवद्विध्येकवाक्यत्वमित्याशंक्यदृष्टांतासिद्धिमाह मंत्राणां चेतिप्रमाणलक्षणेर्थवादचिंतानंतरं
मंत्रेषुचिंताकृता इषेत्वेतिमंत्रेछिनद्मीत्यध्याहारात् शाखाच्छेदनक्रियाप्रतीतेरग्निर्मूर्धेत्यादौचक्रियासाधनदेवतादिप्रतीतेर्मंत्राः
स्तुत्यादिभिः क्रतौविनियुक्ताः तेकिमुच्चारणमात्रेणादृष्टंकुर्वंतः क्रतावुपकुर्वंतिउतदृष्टेनैवार्थस्मरणेनेतिसंदेहे चितादिनाध्य
ध्ययनकालावगतमंत्रार्थस्यस्मृतिसंभवाददृष्टार्थामंत्राइतिप्राप्तेसिद्धांतः अविशिष्टस्तुवाक्यार्थइतिलोकवेदयोर्वाक्यार्थस्यावि
शेषान्मंत्रवाक्यानांदृष्टेनैवस्वार्थप्रकाशनेनक्रतूपकारकत्वसंभवात् दृष्टेसंभवति अदृष्टकल्पनानुपपत्तेः फलवदनुष्ठानायापे

मंत्राणांचेषेत्वेत्यादीनांक्रियातत्साधनाभिधायित्वेनकर्मसमवायित्वमुक्तंन क्वचिदपिवेदवाक्यानांविधिसंस्पर्शमंतरेणार्थवत्तादृष्टा॥

क्षितेनक्रियातत्साधनस्मरणेनद्वारेणमंत्राणांकर्मांगत्वं मंत्रैरेवमंत्रार्थः स्मर्तव्यइतिनियमस्त्वदृष्टार्थइतितथाचार्थवादानांस्तुतिपदार्थद्वारापदैकवाक्यत्वंविधिभिर्मंत्राणांतुवाक्यार्थज्ञानद्वारातैर्वाक्यैरेकवाक्यत्वमितिविभागः नन्वस्तुकर्मप्रकरणस्थवाक्यानांविध्येकवाक्यत्वंवेदांतानांतुसिद्धेप्रामाण्यंकिंनस्यादितितत्राह नक्वचिदितिवेदांताः विध्येकवाक्यत्वेनैवार्थवंतः सिद्धार्थबोधकत्वान्मंत्रार्थवादादिवदित्यर्थः॥ ५ ५ ५ ॥५॥

अन्यत्रादृष्टापि वेदांतेषु कल्प्यतामिति तत्राह उपपन्नावेति नेत्यनुषंगः सिद्धे फलाभावस्योक्तत्वादिति भावः तर्हि ब्रह्मण्येव स्वार्थे विधिः कल्प्यतां कृतं वेदांतानां विध्यंतरशेषत्वेनेत्यत आह नचेति ननु दध्ना जुहोतीति सिद्धे दधिनि विधिर्दृष्टस्तत्राह क्रियेति दध्नः क्रियासाधनस्य प्रयुज्यमानतया साध्यत्वाद्विधेयता निष्क्रिय ब्रह्मणः कथमप्यसाध्यत्वान्न विधेयत्वमित्यर्थः भा

उपपन्नावान च परिनिष्ठिते वस्तुस्वरूपे विधिः संभवति क्रियाविषयत्वाद्विधेः तस्मात्कर्मापेक्षितकर्तृस्वरूपदेवतादिप्रकाशनेन क्रियाविधिशेषत्वं वेदांतानां अथ प्रकरणांतरभयान्नैतदभ्युपगम्यते तथापि स्ववाक्यगतोपासनादिकर्मपरत्वं तस्मान्न ब्रह्मणः शास्त्रयोनित्वमिति प्राप्ते उच्यते तत्तु समन्वयात् तुशब्दः पूर्वपक्षव्यावृत्त्यर्थः तद्ब्रह्म सर्वज्ञं सर्वशक्ति जगदुत्पत्तिस्थितिविलयकारणं वेदांतशास्त्रादवगम्यते कथम्

ष्टमतमुपसंहरति तस्मादिति स्वयमेवारुचिं वदन्पक्षांतरमाह अथेति सिद्धांतसूत्रं व्याचष्टे तुशब्द इति तद्ब्रह्म वेदांतप्रमाणकं इति प्रतिज्ञातार्थे हेतुं पृच्छति कथमिति ॥ ॥ ६ ॥ ॥ ६ ॥ ॥ ६ ॥ ॥ ६ ॥

हेतुमाहसमिति अन्वयस्तात्पर्यविषयत्वं तस्मादित्येवहेतुः तात्पर्यस्यसम्यक्तं अखंडार्थविषयकत्वं सूचयितुंसंपदंप्रतिज्ञां
तर्गतमेव तथाचाखंडंब्रह्मवेदांतजप्रमाविषयः वेदांततात्पर्यविषयत्वात् योयद्वाक्यतात्पर्यविषयः सतद्वाक्यप्रमेयः यथा
कर्मवाक्यप्रमेयोधर्मइतिप्रयोगः वाक्यार्थस्याखंडत्वं असंसृष्टत्वंवाक्यस्यचाखंडार्थकत्वंस्वपदोपस्थापितायेपदार्थास्तेषां
यःसंसर्गः तदगोचरप्रमाजनकत्वं नन्वेदमप्रसिद्धंप्रकृष्टप्रकाशश्चंद्रइत्यादेर्लक्षणयाचंद्रादिव्यक्तिमात्रप्रमाहेतुत्वात् सर्व

समन्वयात् सर्वेषुहिवेदांतेषुवाक्यानितात्पर्येणैतस्यार्थस्यप्रतिपादकत्वेनसमनुगतानि॥ ॥४॥ ॥४॥

पदलक्षणाच्चाविरुद्धा सर्वैरर्थवादपदैरेकस्याःस्तुतेर्लक्ष्यत्वांगीकारात् तथाचसत्यज्ञानादिपदैरखंडंब्रह्म भातीति-
नपक्षासिद्धिः नापिहेत्वसिद्धिः उपक्रमादिलिंगैर्वेदांतानां अद्वितियाखंडब्रह्मणितात्पर्यनिश्चयात्॥ ॥ ४१
तत्रच्छांदोग्यषष्ठेउपक्रमंदर्शयति सदेवेति उद्दालकःपुत्रमुवाच हेसोम्यप्रियदर्शन ॥ ४ ४ ४

इदंसर्वंजगत् अग्रेउत्पत्तेःप्राक्कालेसदबाधितंब्रह्मैवासीत् एवकारेणजगतः पृथक्सत्ताभिषिध्यते सजातीयविजातीयस्वग
तभेदनिरासार्थमेकमेवाद्वितीयमितिपदत्रयं एवमद्वितीयंब्रह्मोपक्रम्यैतदात्म्यमिदंसर्वमित्युपसंहरति इदमुपक्रमोपसं
हारैकरूप्यंतात्पर्यलिंगंतथा तत्वमसीतिनवकृत्वोभ्यासः रूपादिहीनाद्वितीयब्रह्मणोमानांतरायोग्यत्वात् अपूर्वत्वमुक्तं
अत्र वावकिल सत्सोंम्यनभिमालयसे इतिसंघातेस्थितंप्रत्यग्ब्रह्मनजानासीत्यर्थः तस्यतावदेवचिरं यावन्नविमोक्ष्ये अथसंप

सदेवसौम्येदमग्रआसीत् एकमेवाद्वितीयम् ॥ ७॥ ॥ ७॥

त्स्यइतिब्रह्मज्ञानात्फलमुक्तं विदुषस्तस्ययावत्कालंदेहोनविमोक्ष्यते तावदेवदेहपातपर्यंतोविलंबः अथदेहपातानंतरंवि-
द्वान्ब्रह्मसंपत्स्यतेविदेहकैवल्यमनुभवतीत्यर्थः अनेनजीवेनात्मनानुप्रविश्येत्यादि अद्वितीयज्ञानार्थोर्थःवादःमृदादिदृष्टां
तैःप्रकृत्यतिरेकेण विकारोनास्तीत्युपपत्तिरुक्ता ॥ ॥ ७॥ ॥ ७॥ ॥ ७॥ ॥ ७॥

एवंषड्विधानितात्पर्यलिंगानिव्यस्तानिसमस्तानिवाप्रतिवेदांतंदृश्यंतेइत्यभिप्रेत्यैतरेयोपक्रमवाक्यंपठति आत्मावाइति बृहदारण्यकमधुकांडोपसंहारवाक्यंसदात्मनोनिर्विशेषत्वार्थमाह तदेतदिति मायाभिर्बहुरूपंतत्ब्रह्म एतदपरोक्षं अपूर्वं-कारणशून्यंअनपरंकार्यरहितं अं तरं अस्यनास्तीत्यनंतरं एकरसमित्यर्थः अबाह्यंअद्वितीयंतस्यापरोक्षत्वमुपपादयति अयमिति सर्वमनुभवतीतिसर्वानुभूः चिन्मात्रमित्यर्थः ऋग्यजुःसामवाक्यान्युक्त्वाआथर्वणवाक्यमाह ब्रह्मैवेदमितिच

आत्मावाइदमेकएवाग्रआसीत् तदेतद्ब्रह्मापूर्वमनपरमनंतरमबाह्यमयमात्माब्रह्मसर्वानुभूः ब्रह्मैवेदममृतंपुरस्तादित्यादीनितत्त्वतद्गतानांपदानांब्रह्मस्वरूपविषयेनिश्चितेसमन्वयेवगम्यमानेर्थांतरकल्पनायुक्ताश्रुतहान्यश्रुतकल्पनाप्रसंगात्

त्पुरस्तात्पूर्वदिग्वस्तुजातमिदमब्रह्मैवाविदुषांभातितदमृतंब्रह्मैववस्तुतइत्यर्थः आदिपदेनसत्यंज्ञानमित्यादिवाक्यानिगृह्यंतेनन्वस्तुब्रह्मणस्तात्पर्यविषयत्वंवेदांतानांकार्यमेवार्थः किंनस्यादितितत्राह नचेति वेदांतानांब्रह्मणितात्पर्येनिश्चीयमाने कार्यार्थत्वंनयुक्तं यत्परःशब्दःसशब्दार्थ इतिन्यायादित्यर्थः॥

यदुक्तं अर्थवादन्यायेनवेदांतानांकर्त्रादिस्तावकत्वमितितत्राह नचतेषामिति तेषांकर्मशेषस्तावकत्वं नभातिकिंतुज्ञानद्वा
राकर्मतत्साधननाशकत्वमेवतत्रविद्याकालेकः कर्ताकेनकरणेनकंविषयंपश्येदितिश्रुतेरित्यर्थः अर्थवादानांतुस्वार्थेफलाभा
वात् स्तुतिलक्षणेतिभावः यदुक्तंसिद्धत्वेनमानांतरवेद्यंब्रह्मनवेदार्थइतितत्राह नचपरीति तत्वमसीतिशास्त्रमंतरेणेतिसं

नचतेषांकर्तृस्वरूपप्रतिपादनपरतावसीयते तत्केनकंपश्येदित्यादिक्रियाकारकफलनिराकरणश्रुतेः न-
चपरिनिष्ठितवस्तुस्वरूपत्वेपिप्रत्याक्षादिविषयत्वं तत्वमसीति ब्रह्मात्मभावस्यशास्त्रमंतरेणानवगम्यमा
नत्वात् यत्तुहेयोपादेयरहितत्वादुपदेशानर्थक्यमिति नैषदोषः हेयोपादेयशून्यब्रह्मात्मावगमादेवसर्व
क्लेशप्रहाणात्पुरुषार्थसिद्धेः ॥

बंधः धर्मोनिवेदार्थः साध्यत्वेनपाकवन्मानांतरवेद्यत्वात् यदिवेदंविनाधर्मस्यानिर्णयान्नमानांतरवेद्यतातदाब्रह्मण्यपितु
ल्यंयच्चोक्तंनिष्फलत्वाद्ब्रह्मनवेदार्थइति तदनूद्यपरिहरतियत्वित्यादिनारहितत्वाद्भिन्नत्वाद्ब्रह्मण इतिशेषः ॥

यद्यप्युक्तं उपासनापरत्वं वेदांतानामिति तत्र किं प्राणपंचाग्न्यादिवाक्यानां उत सर्वेषामिति तत्राद्यमंगीकरोति देवतादीति ज्येष्ठत्वा
दिगुणाः फलं चादिशब्दार्थः न द्वितीयः विधिशून्यानां सत्यं ज्ञानमित्यादीनां स्वार्थे फलवतामुपासनापरत्वकल्पनायोगात् किंच
तदर्थस्य ब्रह्मणस्तच्छेषत्वं ज्ञानात्प्रागूर्ध्वं वा आद्ये ध्येयत्वगुणवत्त्वस्य तच्छेषत्वेपि न द्वितीय इत्याह न तु तथेति प्राणादिदेवताव
दित्यर्थः अहं ब्रह्मास्मीत्येकत्वे ज्ञाते सति हेयोपादेयशून्यतया ब्रह्मात्मनः फलाभावादुपास्योपासकद्वैतज्ञानस्य कारणस्य नाशाच्च

देवतादिप्रतिपादनस्य तु स्ववाक्यगतोपासनार्थत्वेपि न कश्चिद्विरोधः न तु तथा ब्रह्मण उपासनाविधिशेषत्वं सं-
भवति एकत्वे हेयोपादेयशून्यतया क्रियाकारकादिद्वैतविज्ञानोपमर्दोपपत्तेः न ह्येकत्वविज्ञानेनोन्मथितस्य
द्वैतविज्ञानस्य पुनः संभवोस्ति येनोपासनाविधिशेषत्वं ब्रह्म प्रतिपद्येत यद्यप्यन्यत्र वेदवाक्यानां विधिसं-
स्पर्शमंतरेण प्रमाणत्वं न दृष्टम्॥

नोपासनाशेषत्वमित्याह एकत्व इति द्वैतज्ञानस्य संस्कारबलात्पुनरुदये विधानमिति
नेत्याह नहीति दृढस्येति शेषः भ्रांतित्वानिश्चयो दार्ढ्यं संस्कारोत्थं तु भ्रांतित्वेन निश्चितं न विधिनिमित्तं इति भावः येनेति उपास
नायां कारणस्य सत्वेनेत्यर्थः वेदप्रामाण्यस्य व्यापकं क्रियार्थकत्वमनुवदति यद्यपीति कर्मकांडे अर्थवादादीनामित्यर्थः तथा च व्या
पकाभावाद्वेदांतेषु व्याप्याभावानुमानमिति भावः॥ ४३

वेदांतानस्वार्थेमानं अक्रियार्थत्वात्सोरोदीदित्यादिवदिति अनुमानेनिष्फलार्थत्वमुपाधिरित्याह तथापीति अर्थवादानांनि-
ष्फलस्वार्थमानत्वेपीत्यर्थः तद्विषयस्यतत्करणस्यस्वार्थेब्रह्मात्मनीतिशेषः सफलज्ञानकरणत्वेनवेदांतानांस्वार्थेमानत्वसिद्धे
र्नक्रियार्थकत्वंतज्ज्ञापकमितिभावः ननुमाभूद्वेदप्रामाण्यस्यव्यापकंक्रियार्थकत्वंव्याप्यंतुभविष्यति तदभावाद्वेदांतानांप्रामाण्यं

तथाप्यात्मविज्ञानस्यफलपर्यंतत्वात्मतद्विषयस्यशास्त्रस्यप्रामाण्यंशक्यंप्रत्याख्यातुंनचानुमानगम्यंशास्त्रप्रामा
ण्यंयेनान्यत्रदृष्टंनिदर्शनमपेक्षेत॥ ॥७॥

दुर्ज्ञानमितिनेत्याह नचेति येनवेदप्रामाण्यंस्वस्यानुमानगम्यत्वेनान्यत्रक्वचिद्दृष्टम्दृष्टांतमपेक्षेततदेवनास्तीत्यर्थः चक्षुरादि
वद्वेदस्यस्वतःप्रामाण्यज्ञानान्नतद्व्याप्तिलिंगाद्यपेक्षाप्रामाण्यसंशयेतुफलवदज्ञाताबाधितार्थतात्पर्यात्प्रामाण्यनिश्चयोनक्रि
यार्थत्वेननकुपेपत्तेदिति वाक्यव्यभिचारादितिभाव: ॥ ॥ ॥ ॥ ॥ ॥

वर्णकार्थमुपसंहरति तस्मादिति समन्वयादित्यर्थः विधिवाक्यानामपिफलवदज्ञातार्थत्वेन प्रामाण्यं तत्तुल्यं वेदांतानामपीति -
स्थितं एवंपदानांसिद्धेर्थेव्युत्पत्तिमिच्छतां ब्रह्मनास्तिकानां मतं ब्रह्मणोमानांतरायोग्यत्वात्सफलत्वाच्च वेदांतैकमेयत्वमित्यु -
त्त्याभिरस्तं संप्रतिसर्वेषांपदानांकार्यान्वितार्थेशक्तिमिच्छतांविधिशेषत्वेनप्रत्यक् ब्रह्मवेदांतैर्बोध्यतेनस्वातंत्र्येणेतिवदतांवृत्ति -

तस्मात्सिद्धंब्रह्मणःशास्त्रप्रमाणकत्वं अत्रापरेप्रत्यवतिष्ठंतेयद्यपिशास्त्रप्रमाणकंब्रह्म तथापिप्रतिपत्ति
विधिविषयतयैवशास्त्रेणब्रह्मसमर्प्यते॥

काराणांमतनिरासायसूत्रस्यवर्णकांतरमारभ्यते तत्रवेदांताः किमुपासनाविधिशेषत्वेनब्रह्मबोधयंति उतस्वातंत्र्येणेतिसि
त्थेव्यक्तसत्यभावभावाभ्यां संशयेपूर्वपक्षमाह अत्रापर इतिब्रह्मणो वेदांतवेद्यत्वोक्तौवृत्तिकाराः पूर्वपक्षयंतीत्यर्थः उपासना
तोमुक्तिः पूर्वपक्षेफलं तत्त्वज्ञानादेवेतिसिद्धांतेफलंविधिर्नियोगः तस्यविषयःप्रतिपत्तिरुपासना अस्याःकोविषय इत्याकांक्षा ४७
यांसत्यादिवाक्यैर्विधिपरैरेवब्रह्मसमर्प्यतइत्याहप्रतिपत्तीतिविधिविषयप्रतिपत्तिविषय तयेत्यर्थः ॥ ॥

विधिपराद्वाक्यात्तच्छेषत्वाभेदशंतमाह यथेति यूपेपशुंबध्नाति आहवनीयेजुहोतींद्रं यजेति विधिषुकेयूपादय इत्याकां-
क्षायांयूपंतक्षतियूपमष्टाश्री करोतिइत्तितक्षणादिसंस्कृतंदारुयूपः अग्नीनादधीतेत्याधानसंस्कृतोग्निराहवनीयः वज्रह
स्तःपुरंदरइतिविधिपरैरेववाक्यैः समर्प्यंतेतद्वद्ब्रह्मेत्यर्थः विधिपरवाक्यस्यापि अन्यथार्थबोधित्वेवाक्यभेदः स्यादितिशंका
निरासार्थमपिशब्दः मानांतराज्ञातान्यपिशेषतयो च्यंतेनप्रधानत्वेनेतिनवाक्यभेदः प्रधानार्थभेदस्यैववाक्यभेदकत्वादिति

यथायूपाहवनीयादीन्यलौकिकान्यपिविधिशेषतयाशास्त्रेणसमर्प्यंते तद्वत्कुतएतत्प्रवृत्तिनिवृत्तिप्र
योजनत्वाच्छास्त्रस्य तथाहिशास्त्रतात्पर्यविद आहुः

भावः ननूक्तषड्विधलिंगैस्तात्पर्यविषयस्यब्रह्मणः कुतोविधिशेषत्वमितिशंकतेकुतइतिवृद्धव्यवहारेणहिशास्त्रतात्पर्यनि
श्चयःवृद्धव्यवहारेचश्रोतुः प्रवृत्तीनिवृत्ती उद्दिश्यप्रयोगोदृश्यतेअतः शास्त्रस्यापितेएवप्रयोजनेतेचकार्यज्ञानजन्यइतिकार्यपर
त्वंशास्त्रस्यततः कार्यशेषत्वंब्रह्मणइत्याह प्रवृत्तीतिशास्त्रस्यनियोगपरत्वेवृद्धसंमतिमाह तथा हीत्यादिना ॥

क्रियाकार्यंनियोगोविधिः धर्मोपूर्वमिति अनर्थांतरं कोवेदार्थइत्याकांक्षायांभाष्यकृतोक्तं दृष्टोहीति तस्यवेदस्यकार्यंवेदार्थ इत्यत्र चोदनासूत्रस्यंभाष्यमाह चोदनेति क्रियायांनियोगस्यज्ञानद्वाराप्रवर्तकंवाक्यंचोदनेत्युच्यतइत्यर्थः शबरस्वामिसंमतिमुक्त्वा-जैमिनिसंमतिमाह तस्यज्ञानमिति तस्यधर्मस्यज्ञापकं अपौरुषेयंविधिवाक्यमुपदेशः तस्यधर्मेणाव्यतिरेकादित्यर्थः पदानांकार्यान्वितार्थेशक्तिरित्यत्रसूत्रंपठति तद्भूतानामिति तत्रवेदेभूतानांसिद्धार्थनिष्ठानांपदानांक्रियार्थेनिकार्यवाचिनालिङादिपदेन

दृष्टोहितस्यार्थः कर्मविबोधनंनामचोदनेतिक्रियायाःप्रवर्तकंवचनंतस्यज्ञानमुपदेशः तद्भूतानांक्रियार्थेनसमाम्नायःआम्नायस्यक्रियार्थत्वादानर्थक्यमतदर्थानामितिच अतःपुरुषं कंचिद्विषयविशेषे प्रवर्तयत्कुतश्चिद्विषयविशेषान्निवर्तयच्चार्थवच्छास्त्रम् तच्छेषतयाचान्यदुपयुक्तं तत्सामान्याद्वेदांतानामपितथैवार्थवत्वंस्यात्

समाम्नायः सहोच्चारणं कर्तव्यंपदार्थज्ञानस्य वाक्यार्थरूपकार्यधीनिमित्तार्थत्वादित्यर्थः कार्यान्वितार्थेशक्तानिपदानिकार्यवाचिपदेनसहपदार्थस्मृतिद्वाराकार्यमेववाक्यार्थंबोधयंतीतिभावः फलितमाह अतइतियतोवृद्धाएवमाहुः अतोविधिनिषेधवाक्यमेवशास्त्रं अर्थवादादिकंतुतच्छेषतयोपक्षीणंतेनकर्मशास्त्रेणसामान्यंशास्त्रत्वं तस्माद्वेदांतानांकार्यपरत्वेनैव अर्थवत्वं-स्यादित्यर्थः ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥

ननुवेदांतेषुनियोज्यस्यविधेयस्यचादर्शनात्कथंकार्येविधिरितितत्राह सतिचेति ननुधर्मब्रह्मजिज्ञासासूत्रकाराभ्यामिहकांडद्वयेऽ
र्थभेदः उक्तः एककार्यार्थित्वेशास्त्रभेदानुपपत्तेः तत्रकांडद्वयेजिज्ञास्यभेदेसतिफलवैलक्षण्यंवाच्यं तथाचनमुक्तिफलायज्ञानस्य
विधेयता मुक्तेर्विधेयक्रियाजन्यत्वेकर्मफलादविशेषप्रसंगात् अविशेषेजिज्ञास्यभेदासिद्धेः अतः कर्मफलविलक्षणत्वान्नित्यसि
द्धमुक्तेस्तद्व्यंजकज्ञानविधिरयुक्तइतिशंकते नन्विहेतिमुक्तेः कर्मफलाद्वैलक्षण्यमसिद्धमितितदर्थंज्ञानंविधेयं नचतर्हिसफ

सतिचविधिपरत्वेयथास्वर्गादिकामस्याग्निहोत्रादिसाधनंविधीयते एवममृतत्वकामस्यब्रह्मज्ञानंविधीयते
नन्विहजिज्ञास्यवैलक्षण्यमुक्तंकर्मकांडेभव्योधर्मोजिज्ञास्यइहतुभूतंनित्यनिर्वृतंब्रह्मजिज्ञास्यंइति तत्रध-
र्मज्ञानफलादनुष्ठानापेक्षाद्विलक्षणंब्रह्मज्ञानफलंभवितुमर्हति नार्हत्येवंभवितुंकार्यविधिप्रयुक्तस्यैवब्रह्मणः
प्रतिपाद्यमानत्वात् ॥

लंकार्यमेववेदांतेष्वपिजिज्ञास्यमितितद्भेदासिद्धिरितिवाच्यं इष्टत्वात् नचब्रह्मणोजिज्ञास्यत्वसूत्रविरोधः ज्ञानविधिशेषत्वेन
सूत्रकृताब्रह्मप्रतिपादनादिति परिहरति नेति॥ ॥ ५॥ ॥ ५॥ ॥ ५॥ ॥ ५॥

ब्रह्मणोविधिप्रयुक्तत्वंस्फुटयति आत्मावाइति लोकंज्ञानस्वरूपंब्रह्मवेदेत्यत्रब्रह्मभावकामोब्रह्मवेदनंकुर्यादितिविधिःपरिणं
म्यतइतिद्रष्टव्यं वेदांतानेवार्थतोदर्शयति नित्यइति ननुकिंविधिफलमिति तदाहतदुपासनादिति प्रत्यग्ब्रह्मोपासनात् ब्रह्म

आत्मावा अरेद्रष्टव्यइतिय आत्मापहतपाप्मासोन्वेष्टव्यःसविजिज्ञासितव्यःआत्मेत्येवोपासीतआत्मानमे-
वलोकमुपासीतब्रह्मवेदब्रह्मैवभवति इत्यादिविधानेषुसत्सुकोसावात्माकिंब्रह्मेत्याकांक्षायांतत्स्वरूप
समर्पणेनसर्वेवेदांताउपयुक्ताःनित्यःसर्वज्ञःसर्वगतोनित्यतृप्तोनित्यशुद्धबुद्धमुक्तस्वभावोविज्ञानमानंदं
ब्रह्मेत्येवमादयःतदुपासनाच्चशास्त्रदृष्टोदृष्टोमोक्षःफलंभविष्यतिकर्तव्यविध्यननुप्रवेशेतुवस्तुमात्र
कथनेहानोपादानासंभवात्ससद्वीपावसुमतीराजासौगच्छतीत्यादिवाक्यवद्वेदांतवाक्यानामानर्थक्यमे
वस्यात्॥

विदाप्नोतिपरमितिशास्त्रोक्तोमोक्षःस्वर्गवल्लोकाप्रसिद्धःफलमित्यर्थःब्रह्मणःकर्तव्योपासनाविषयकविधिशेषत्वानंगीकारेबाधकमाह
कर्तव्येति विध्यसंबंधिसिद्धबोधेप्रवृत्त्यादिफलाभावाद्वेदांतानां वैफल्यंस्यादित्यर्थः॥ ॥श्रीरामजयरामजयजयरामः॥ ॥४॥

नन्वितिशंकास्पष्टोर्थः दृष्टांतवैषम्येन परिहरति स्यादिति एतदर्थवत्त्वमेवं चेत्स्यादित्यार्थः एवंशब्दार्थमाह यदीति किंच यदि ज्ञानादेव मुक्तिस्तदा श्रवणजन्यज्ञानानंतरं मननादिविधिर्न स्यात् तद्विधेश्च कार्यसाध्या मुक्तिरित्याह श्रोतव्येति शब्दानां कार्यान्वितशक्तेः

ननु वस्तुमात्रकथनेपि रज्जुरियं नायं सर्प इत्यादौ भ्रांतिजनितभीतिनिवर्तनेनार्थवत्त्वं दृष्टं तथेहाप्यसंसार्यात्मवस्तुकथनेन संसारित्वभ्रांतिनिवर्तनेनार्थवत्त्वं स्यात् स्यादेतदेवं यदि रज्जुस्वरूपश्रवण इव सर्पभ्रांतिः संसारित्वभ्रांतिः ब्रह्मस्वरूपश्रवणमात्रेण निवर्तेत न तु निवर्तते श्रुतब्रह्मणोपि यथापूर्वं सुखदुःखादि संसारधर्मदर्शनात् श्रोतव्यो मंतव्यो निदिध्यासितव्य इति च श्रवणोत्तरकालयोर्मनननिदिध्यासनयोर्दर्शनात् तस्मात्प्रतिपत्तिविधिविषयतयैव शास्त्रप्रमाणकं ब्रह्माभ्युपगंतव्यमिति अत्राभिधीयते ॥ ॥ ॥ ॥

प्रवृत्त्यादिफलस्यैव शास्त्रत्वात् सिद्धेफलाभावान्मननादिविधेश्च कार्यपरा वेदांता इति पूर्वपक्षमुपसंहरति तस्मादिति वेदांतान विधिपराः स्वार्थे फलवत्त्वे सति नियोज्यविधुरत्वात् नायं सर्प इति वाक्यवत् सोरोदीत् स्वर्गकामो यजेतेति वाक्ययोर्निरासाय हेतौ विशेषणद्वयमिति सिद्धांतयति अत्रेति ॥ ५ ५ ५ ५

यदुक्तंमोक्षकामस्यनियोज्य ज्ञानंविधेयमितितन्नेत्याह नेति मोक्षोनाविधिजन्यः कर्मफलविलक्षणत्वादात्मवदित्यर्थःउक्तेहे
तुज्ञानायकर्मतत्फलेप्रपंचयति शारीरमित्यादिना वर्णितंसंसाररूपं अनुवदतीत्यंतेन अथवेदाध्ययनानंतरं अतोवेदस्यफ
लवदर्थपरत्वात् धर्मनिर्णयायकर्मवाक्यविचारः कर्तव्यइतिसूत्रार्थः नकेवलंधर्माख्यं कर्मकिंतुअधर्मोपीत्याह अधर्मोपीति –

नकर्मब्रह्मविद्याफलयोर्वैलक्षण्यात् शारीरंवाचिकंमानसंचकर्मश्रुतिस्मृतिसिद्धंधर्माख्यंयद्विषयाजिज्ञासा अथा
तोधर्मजिज्ञासेतिसूत्रिता अधर्मोपिहिंसादिःप्रतिषेधचोदनालक्षणत्वात्जिज्ञास्यःपरिहारायतयोश्चोदनालक्षणयो
रर्थानर्थयोर्धर्माधर्मयोः फलेप्रत्यक्षेसुखदुःखेशरीरवाङ्मनोभिरेवोपभुज्यमानेविषयेंद्रियसंयोगजन्येब्रह्मादि-
स्थावरांतेषुप्रसिद्धे ॥ ॥

निषेधवाक्यप्रमाणकत्वादित्यर्थः कर्मोत्थफलमाह तयोरिति मोक्षस्तु अतींद्रियोविशोकः शारीराद्यभोग्योविषयाद्यजन्योना
त्मवित्स्वप्रसिद्धइतिवैलक्षण्यज्ञानायप्रत्यक्षत्वादीनिविशेषणानि ॥ ॥ ॥ ॥ ॥

सामान्येनकर्मफलमुक्त्वाधर्मफलंपृथक्प्रपंचयति मनुष्यत्वादीति सएकोमानुषआनंदस्ततःशतगुणोगंधर्वादीनामितिश्रुते
रनुभवानुसारित्वमनुशब्दार्थः ततश्चेति स्फरवतारतम्यादित्यर्थः मोक्षस्तुनिरतिशयस्तत्साधनंचतत्वज्ञानमेकरूपमितिवैल
क्षण्यं किंचसाधनचतुष्टयसंपंनएकरूपएवमोक्षविद्याधिकारीकर्मणितुनानाविधइतिवैलक्षण्यमाह धर्मेति गम्यते नकेवलं

मनुष्यत्वादारभ्यब्रह्मांतेषुदेहवत्सुस्फरवतारतम्यमनुश्रूयते ततश्चतद्धेतोधर्मस्यापितारतम्यंगम्यते ॥धर्मता
रतम्यादधिकारितारतम्यंप्रसिद्धंचार्थित्वसामर्थ्यैर्दीप्तत्वमधिकारितारतम्यं ॥

किंतुप्रसिद्धंचेत्यर्थः अर्थित्वं फलकामित्वं सामर्थ्यंलौकिकमपुत्रादि आदिपदाद्विद्वत्वंशास्त्रानिंदितत्वंच॥ ॥

किंचकर्मफलंमार्गप्राप्यंमोक्षस्तुनित्यास्सइतिभेदमाह तथेति उपासनायांचित्तस्थैर्यप्रकर्षादर्चिरादिमार्गेणब्रह्मलोकगमनंते
अर्चिषमित्यादिनाश्रुयतइत्यर्थः अग्निहोत्रंतपःसत्यंवेदानामनुपालनंआतिथ्यंवैश्वदेवंचइष्टमित्यभिधीयते वापीकूपतटाग
दिदेवतायतनानिच ॥ अंनप्रदानमारामःपूर्तमित्यभिधीयते॥ शरणागतसंत्राणंभूतानांचाप्यहिंसनं बहिर्वेदिचयद्दानंदत्त

तथाचयागाद्यनुष्ठायिनामेवविद्यासमाधिविशेषादुत्तरेणपथागमनंकेवलैरिष्टापूर्तदत्तसाधनैर्धूमादिक्रमेणदक्षिणेनप-
थागमनंतत्रापिसुखतारतम्यं- -तत्साधनतारतम्यंचशास्त्राद्यावत्संपातमुषित्वेत्यस्माद्गम्यते-
तथामनुष्यादिषुनारकस्थावरांतेषुसुखलवश्चोदनालक्षणधर्मसाध्यएवेतिगम्यते तारतम्येनवर्तमानस्तथोर्ध्वग
तेष्वधोगतेषुचदेहवत्सुदुःखतारतम्यदर्शनात्तद्धेतोरधर्मस्यप्रतिषेधचोदनालक्षणस्यतदनुष्ठायिनांचतारतम्यं
गम्यते ॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥

मित्यभिधीयते तत्रापिचंद्रलोकेपीत्यर्थः संपततिगच्छति अस्माल्लोकादमुंलोकमनेनेतिसंपातः कर्मयावत्कर्मभोक्तव्यंतावत्
स्थित्वापुनरायांतीत्यर्थः मनुष्यत्वादूर्ध्वगतेषुसुखस्यतारतम्यमुक्त्वाधोगतेषुतदाह तथेति इदानींदुःखतद्धेतुतदनुष्ठायिनांतार
तम्यंवदन् अधर्मफलंप्रपंचयति तथोर्ध्वगतेष्विति ॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥

द्विविधंकर्मफलंमोक्षस्यतद्विलक्षण्यज्ञानायप्रपंचितमुपसंहरति एवमिति अस्मिताकामक्रोधाभिनिवेशाआदिशब्दार्थः तेतंभुक्त्वा स्वर्गलोकंविशालमित्याद्यास्मृतिःकाष्ठोपचयाज्वालोपचयदर्शनात्फलतारतम्येनसाधनतारतम्यानुमानंन्यायःश्रुतिमाह तथाचेति मोक्षोनकर्मफलंकर्मफलविरुद्धातींद्रियत्वविशोकत्वशरीराद्यभोग्यत्वादिधर्मवत्वात् व्यतिरेकेणस्वर्गादिवदितिन्यायानुग्राह्यांश्रु

एवमविद्यादिदोषवतांधर्माधर्मतारतम्यनिमित्तंशरीरोपादानपूर्वकंसुखदुःखतारतम्यमनित्यंसंसाररूपंश्रुतिस्मृति न्यायप्रसिद्धंतथाचश्रुतिःनहवैसशरीरस्यसतःप्रियाप्रिययोरपहतिरस्तीतियथावर्णितंसंसाररूपमनुवदत्यश रीरंवावसंतंनप्रियाप्रियेस्पृशतइतिप्रियाप्रियस्पर्शनप्रतिषेधाच्चोदनालक्षणधर्मकार्यत्वंमोक्षाख्यस्यअशरी रत्वस्यप्रतिषिध्यतइतिगम्यते धर्मकार्यत्वेहिप्रियाप्रियस्पर्शनप्रतिषेधोनोपपद्यते॥

तिमाह अशरीरमितिवावेत्यवधारणेतत्वतोविदेहंसंतमात्मानंवैषयिकेसुखदुःखेनैवस्पृशतइत्यर्थःमोक्षश्चेदुपासनारूप धर्मफलंतर्हितदेवप्रियमस्तीतितन्निषेधायोगइत्याह धर्मकार्यत्वेहीति॥ ॥५॥ ॥९॥ ॥६॥

ननु प्रियं नामैवैषयिकं स्फुरं तन्निषिध्यते मोक्षस्तु धर्मफलमेव कर्मणां विचित्रफलदानसामर्थ्यादिति शंकते अशरीरत्वमेवेति आ- त्मनो देहासंगित्वमशरीरत्वं तस्यानादित्वान्न कर्मसाध्यतेत्याह नेति अशरीरं स्थूलदेहशून्यं देहेष्वनेकेषु अनित्येषु एकं नित्यम वस्थितं महांतं व्यापिनं आपेक्षिकमहत्त्वं वारयति विभुमिति तमात्मानं ज्ञात्वा धीरः सन् शोकोपलक्षितं संसारं नानुभवतीत्यर्थः सूक्ष्म देहाभावे श्रुतिमाह अप्राण इति प्राणमनसोः क्रियाज्ञानशक्त्योर्निषेधात् तदधीनानां कर्मज्ञानेंद्रियाणां निषेधो हि यतः अतः शुभ्रः

अशरीरत्वमेव धर्मकार्यमिति चेन्न तस्य स्वाभाविकत्वादशरीरं शरीरेष्वनवस्थेष्ववस्थितं महांतं विभुमात्मानं मत्वा धी रो न शोचति अप्राणो ह्यमनाः शुभ्रो ऽसंगो ह्ययं पुरुष इत्यादिश्रुतिभ्यो ऽत एवानुष्ठेयफलविलक्षणं मोक्षाख्यमशरी रत्वं नित्यं इति सिद्धं तत्र किंचित्परिणामि नित्यं यस्मिन्विक्रियमाणेपि तदेवेदमिति बुद्धिर्न विहन्यते यथा पृथिव्यादि जगन्नित्यत्ववादिनां यथा च सांख्यानां गुणाः

शुद्ध इत्यर्थः देहद्वयाभावे श्रुतिरसंगो हीति निर्देहात्मस्वरूपमोक्षस्यानादिभावत्वे सिद्धे फलितमाह अत एवेति नित्यत्वेपि परिणा मितया धर्मकार्यत्वं मोक्षस्येत्याशंक्य नित्यं द्वेधा विभजते तत्र किंचिदिति नित्यवस्तु मध्य इत्यर्थः परिणामि च तन्नित्यं चेति परिणामि- नित्यं॥ ४९

आत्मातु कूटस्थनित्यइ इविनकर्मसाध्यइत्याह इदंत्विति परिणामिनोनित्यत्वं प्रत्यभिज्ञाकल्पितंमिथ्येवकूटस्थस्यतु नाशकाभावा न्नित्यत्वंपारमार्थिकं कूटस्थत्वसिध्यर्थंपरिस्पंदाभावमाह व्योमवदिति परिणामाभावमाह सर्वविक्रियारहितंफलानपेक्षत्वान्नफ लार्थापिविक्रियेत्याह नित्यतृप्तमिति तृप्तिरनपेक्षत्वं विशोकंस्फुरत्वंवानिरवयवत्वान्नक्रियातस्यभानार्थमपिनक्रियास्वयंज्योति ष्ट्वात् अतः कूटस्थत्वान्नकर्मसाध्योमोक्षइत्युक्तंकर्मतत्कार्यासंगित्वाच्चतथेत्याहयत्रेतिकालानवच्छिन्नत्वाच्चेत्याहकालेतिका

इदंतुपारमार्थिकंकूटस्थनित्यंव्योमवत्सर्वव्यापिसर्वविक्रियारहितंनित्यतृप्तंनिरवयवंस्वयंज्योतिःस्वभावंयत्रधर्मा धर्मौसहकार्येणकालत्रयंचनोपावर्तेते तदशरीरंमोक्षाख्यमन्यत्रधर्मादन्यत्राधर्मादन्यत्रास्मात्कृताकृतात् अन्यत्रभूताच्चभव्याच्चयत्तत्स्वरूपसितद्वदेत्यादिभ्यः॥ ॥ ॥ ॥ ॥ ॥

लत्रयंचनोपावर्ततइतियोग्यतयासंबंधनीयं धर्माद्यनवच्छेदेमानमाह अन्यत्रेति अन्यादित्यर्थः कृतात्कार्यात् अकृताच्चकारणा त्भूताद्भव्याच्च चकाराद्वर्तमानाच्च अन्यद्यत्पश्यसितद्वदेत्यर्थः॥ ॥५॥ ॥५॥ ॥५२॥

ननुउक्ताःश्रुतयःब्रह्मणःकूटस्थासंगित्वंवदंतुमोक्षस्यतुनियोगफलत्वंकिंनस्यादितितत्राह अतइति तत्कैवल्यंब्रह्मैवकर्मफलवि
लक्षणत्वादित्यर्थः ब्रह्माभेदान्मोक्षस्यकूटस्थत्वंधर्माद्यसंगित्वंचेतिभावः यद्वायज्जिज्ञास्यंतत्ब्रह्म अतः पृथक्जिज्ञास्यत्वात्ध
र्माद्यस्पृष्टमित्यर्थः अतः शब्दाभावपाठेप्ययमेवार्थः ब्रह्मणोविधिस्पर्शेशास्त्रपृथक्त्वंनस्यात्कार्यविलक्षणानधिगतविषयालाभा
त् नहिब्रह्मात्मैक्यंभेदप्रमाणेजाग्रतिविधिपरवाक्याल्लब्धुंशक्यंनवातद्विनाविधेरनुपपत्तिः योषिदग्न्यैक्योपास्तिविधिदर्शनादिति

अतस्तद्ब्रह्मयस्येयंजिज्ञासाप्रस्तुता तद्यदिकर्तव्यशेषत्वेनोपदिश्येत तेनचकर्तव्येनसाध्यश्चेन्मोक्षोभ्युपगम्येत
अनित्यएवस्यात्तत्रैवंसतियथोक्तकर्मफलेष्वेवतारतम्यावस्थितेष्वनित्येषुकश्चिदतिशयोमोक्षइतिप्रसज्येत-
नित्यश्चमोक्षःसर्वैर्मोक्षवादिभिरभ्युपगम्यते अतोनकर्तव्यशेषत्वेनब्रह्मोपदेशोयुक्तः॥ " "

भावः अथवामोक्षस्यनियोगासाध्यत्वेफलितंसूत्रार्थमाह अतइति यदत्रजिज्ञास्यंब्रह्मतत्स्वतंत्रमेववेदांतैरुपदिश्यतेसमन्व
यादित्यर्थः विपक्षेदंडंपातयति तद्यदीति तत्रैवंसतीतिमोक्षेसाध्यत्वेनानित्येसतीत्यर्थः अतइतिमुक्तेर्नियोगासाध्यत्वेनानि ५०
योज्यालाभात्कर्तव्यनियोगाभावादित्यर्थः॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥

प्रदीपात्तमोनिवृत्तिवज्ज्ञानादज्ञाननिवृत्तिरूपमोक्षस्यदृष्टफलत्वाच्चननियोगसाध्यत्वमित्याह अपिचेति योब्रह्माहमितिवेदसब्र
ह्मैवभवतिपरंकारणमवरंकार्यंतद्रूपेतदधिष्ठानेतस्मिन्दृष्टेसतिअस्यद्रष्टुरनारब्धफलानिकर्माणिनश्यंतिब्रह्मणःस्वरूपमानंदं
विद्वान्निर्भयोभवतिद्वितीयाभावात् अभयंब्रह्मप्राप्तोसि अज्ञानहानात् तज्जीवाख्यंब्रह्मगुरूपदेशादात्मानमेवाहंब्रह्मास्मीत्यवे

अपिचब्रह्मवेदब्रह्मैवभवति क्षीयंतेचास्यकर्माणितस्मिन्दृष्टेपरावरे आनंदंब्रह्मणोविद्वान्नबिभेतिकुतश्चन
अभयंवैजनकप्राप्तोसितदात्मानमेवावेदाहंब्रह्मास्मीतितस्मात्तत्सर्वमभवत्तत्रकोमोहःकःशोकएकत्वमनुप
श्यतइति एवमाद्याःश्रुतयोब्रह्मविद्यानंतरंमोक्षंदर्शयंत्योमध्येकार्यांतरंवारयंति॥ ॥ ॥ ॥

दविदितवत् तस्माद्वेदनात्तद्ब्रह्मपूर्णमभवत्परिच्छेदभ्रांतिहानादेकत्वमहंब्रह्मेत्यनुभवतः तत्रानुभवकालेमोहशोकौनस्तइति
श्रुतीनामर्थः तासांतात्पर्यमाहब्रह्मेतिविद्यातत्फलयोर्मध्यइत्यर्थः मोक्षस्यविधिफलत्वेस्वर्गादिवत्कालांतरभावित्वंस्यात्-
तयाचश्रुतिबाधइतिभावः ॥ ॥४॥ ॥४॥ ॥४॥ ॥४॥

K-1796

शा·भा·
५१

इतश्च मोक्षोविधोनेत्याह तथेति तद्धैतत्सत्यगस्मीतिपश्यन् तस्मात् ज्ञानात् वामदेवोमुनीद्रः शुद्धं ब्रह्म प्रतिपेदेह तत्रज्ञानेतिष्ठन् दृष्टवानात्ममंत्रान्स्वस्य सर्वात्मत्वप्रकाशकानहंमनुरित्यादीन् ददर्शेत्यर्थः यद्यपि स्थितिगानक्रियाद्यालक्षणंब्रह्मदर्शनंतु ब्रह्मप्रतिपत्तिक्रियायाहेतुरितिवैषम्यमस्तितथापिलक्षणहेत्वोः क्रियायाइतिसूत्रेणक्रियांप्रतिलक्षणहेत्वोरर्थयोर्वर्तमानाद्धातोः परस्यलटः शतृशानचावादेशौभवतइतिविहितशतृप्रत्ययसामर्थ्यात्तिष्ठन् गायतीत्यत्रतत्कर्तृकंकार्यांतरंमध्येनभातीत्येतावतापश्यन्प्रतिपेदेइत्यस्यदृ-

तथातद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदेहंमनुरभवंसूर्यश्चेतिब्रह्मदर्शनसर्वात्मभावयोर्मध्येकर्तव्यांतरवारणायोदाहार्यं यथातिष्ठन् गायतीतितिष्ठतिगायत्योर्मध्येतत्कर्तृकंकार्यांतरंनास्तीतिगम्यते त्वंहिनः पितायोस्माकमविद्यायाः-परंपारंतारयसि ॥

ष्टांतमाह यथेतिकिंचज्ञानादज्ञाननिवृत्तिः श्रूयतेज्ञानस्यविधेयत्वेकर्मत्वादविद्यानिवर्तकत्वंनयुक्तं अतोबोधकाएववेदांताः नविधायकाइत्याह त्वंहीति भारद्वाजादयः षडृषयः पिप्पलादंगुरुंपादयोः प्रणम्योचिरेत्वंखल्वस्माकंपितायस्त्वमविद्यामहोदधेःपरंपुनरावृत्तिशून्यंपारंब्रह्मविद्याप्लवेनास्मांस्तारयसिप्रापयसिज्ञानेनाज्ञानंनाशयसीतियावत् ॥ ॥ ॥

अ·प्र·पा·
१
५१

प्रश्नवाक्यमुक्त्वा छांदोग्यमाह श्रुतमिति अत्र तारयत्वित्यंतमुपक्रमस्थं शेषमुपसंहारस्थमिति भेदः आत्मविच्छोकं तरतीति भगवत्तुल्येभ्यो मया श्रुतमेव हि न दृष्टं सोहमज्ञत्वात् हे भगवः शोचामि तं शोचंतं मां भगवानेव ज्ञानप्लवेन शोकसागरस्य पारं प्रापयत्विति नारदेनोक्तः सनत्कुमारस्तस्मै तपसा दग्धकिल्बिषाय नारदाय तमसः शोकनिदानाज्ञानस्य ज्ञानेन निवृत्तिरूपं पारं ब्रह्म दर्शितवानित्यर्थः एतद्योवेद सो विद्यायंथिं विकिरतीति वाक्यमादिशब्दार्थः एवं श्रुतेस्तत्त्वज्ञमा मुक्तिहेतुर्न कर्मेत्युक्तं तत्राक्षपाद

श्रुतं ह्येव मे भगवद्दृशेभ्यस्तरति शोकमात्मविदिति सोहं भगवः शोचामि तं मा भगवांछोकस्य परं पारं तारयतु तस्मै मृदितकषायाय तमसः पारं दर्शयति भगवान्सनत्कुमार इति न्वेवमाद्याः श्रुतयो मोक्षप्रतिबंधनिवृत्तिमात्रमेवात्मज्ञानस्य फलं दर्शयंति तथा चाचार्यप्रणीतन्यायोपबृंहितं सूत्रं दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनंतरापायादपवर्ग इति ॥

गौतममुनिसंमतिमाह तथा चेति गौरोहमिति मिथ्याज्ञानस्यापाये रागद्वेषमोहादिदोषाणां नाशः दोषापायाद्धर्माधर्मरूपप्रवृत्तेरपायः प्रवृत्त्यपायात्पुनर्देहप्राप्तिरूपजन्मापायः एवं पाठक्रमेणोत्तरोत्तरस्य हेतुनाशान्नाशे सति तस्य प्रवृत्तिरूपहेतोरनंतरस्य कार्यस्य जन्मनोपायात्दुःखध्वंसरूपोपवर्गोभिवतीत्यर्थः ॥ ६ ॥ ॥ ६ ॥ ॥ ६ ॥ ॥ ६ ॥ ॥ ६

ननुपूर्वसूत्रेतत्वज्ञानान्निःश्रेयसाधिगम इत्युक्ते सतीतरपदार्थभिन्नात्मतत्वज्ञानं कथं मोक्षं साधयतीत्याकांक्षायां मिथ्याज्ञाननिवृत्तिद्वारे
णेति वक्तुमिदं सूत्रं प्रवृत्तं तथाच भिन्नात्मज्ञानान्मुक्तिं वदत्सूत्रं संमतं चेत्परमतानुज्ञा स्यादित्यत आह मिथ्येति तत्वज्ञानान्मुक्तिरित्यं
शे संमतिरुक्ता भेदज्ञानं तु यत्र हि द्वैतमिव भवतीति श्रुत्या भ्रांतित्वान्मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यतीति श्रुत्या अनर्थहे
तुत्वाच्च न मुक्तिहेतुरिति भावः ननु ब्रह्मात्मैकत्वविज्ञानमपि भेदज्ञानवन्न प्रमा संपदादिरूपत्वेन भ्रांतित्वादित्यत आह नचेदमि

मिथ्याज्ञानापायश्च ब्रह्मात्मैकत्वविज्ञानाद्भवति नचेदं ब्रह्मात्मैकत्वविज्ञानं संपद्रूपं यथानंतं वै मनोनंता वै विश्वे
देवा अनंतमेव स तेन लोकं जयतीति

त्यादिना अल्पालंबनतिरस्कारेणोत्कृष्टवस्त्वभेदध्यानं संपद्यथा मनः स्ववृत्त्यानंत्यादनंतं तत उत्कृष्टा विश्वेदेवा अप्यनंता इत्यनं
तत्वसाम्याद्विश्वेदेवा एव मन इति संपत्तया नंतफलप्राप्तिर्भवति तथा चेतनत्वसाम्याज्जीवे ब्रह्माभेदः संपदिति न चेत्यर्थः॥ ॥ ॥

आलंबनस्यप्राधान्येनध्यानंप्रतीकोपास्तिरध्यासः यथाब्रह्मदृष्ट्यामनस आदित्यस्यवाध्यानं तथाहंब्रह्मेति ज्ञानमध्यासोनेत्याह नचेति आदेशः उपदेशः क्रियाविशेषोविशिष्टक्रियातयायोगोनिमित्तं यस्यध्यानस्यतत्तथायथाप्रलयकालेवायुरग्न्यादीन् संवृणोतिसंहरतीतिसंवर्गः स्वापकालेप्राणोवागादीन् संहरतीतिसंहारक्रियायोगात्संवर्गइतिध्यानंछांदोग्येविहितंतथावृत्तिक्रियायोगा

नचाध्यासरूपंयथामनोब्रह्मेत्युपासीतादित्योब्रह्मेत्यादेशइतिच मन आदित्यादिषुब्रह्मदृष्ट्यध्यासोनापिविशिष्टक्रियायोगनिमित्तंवायुर्वावसंवर्गः प्राणोवावसंवर्गइतिवन्नाप्याज्यावेक्षणादिवत्कर्मांगसंस्काररूपं ॥ ॥

ज्जीवोब्रह्मेतिज्ञानमितिनेत्याह नापीति यथापत्न्यवेक्षितमाज्यंभवतीतिउपांशुयागाद्यंगस्य आज्यस्यसंस्कारकमवेक्षणंविहितं तथाकर्मणिकर्तृत्वेनांगस्यात्मनः संस्कारार्थंब्रह्मज्ञानंनेत्याह ॥ नाप्याज्येति ॥ ५ ५ ५ ५

प्रतिज्ञाचतुष्टयेहेतुमाहसंपदादीतिउपक्रमादिलिंगै र्ब्रह्मात्मैकत्वेवस्तुनिप्रमितिहेतुर्यः समानाधिकरणवाक्यानांपदनिष्ठः सम
न्वयः वासर्यैनिश्चितंतत्पीडयेत किंच एकत्वज्ञानादाज्ञानिकहृदयस्यांतः करणस्ययोरागादिग्रंथिश्चिन्मनस्तादात्म्यरूपाहंकारग्रं
थिर्वानिश्यतीत्यज्ञाननिवृत्तिफलवाक्यबाधः स्यात्संपदादिज्ञानस्याप्रमात्वेनाज्ञानानिवर्तकत्वात् किंच जीवस्यब्रह्मत्वसंपदाकथं

संपदादिरूपेहिब्रह्मात्मैकत्वविज्ञानेभ्युपगम्यमानेतत्वमस्यहंब्रह्मास्म्ययमात्माब्रह्मेत्येवमादीनांवाक्यानांब्रह्मात्मैक
त्ववस्तुप्रतिपादनपरः पदसमन्वयः पीडयेत भिद्यतेहृदयग्रंथिश्छिद्यंतेसर्वसंशयाइतिचैवमादीनिअविद्यानिवृत्ति
फलश्रवणान्युपरुध्येरन्ब्रह्मवेदब्रह्मैवभवतीतिचैवमादीनितद्भावापत्तिवचनानिसंपदादिपक्षेनसामंजस्ये-
नोपपद्येरन्तस्मान्नसंपदादिरूपंब्रह्मात्मैकत्वविज्ञानं अतोन्पुरुषव्यापारतंत्राब्रह्मविद्या किंतर्हिप्रत्यक्षा
दिप्रमाणविषयवस्तुज्ञानवद्वस्तुतंत्रैवैवंभूतस्यब्रह्मणः तज्ज्ञानस्यवानकयाचिद्युक्त्याशक्यः कार्यानुप्रवेशः
कल्पयितुं

तद्भावः पूर्वस्वरूपेस्थितेनष्टेवान्यात्मतायोगात् तस्मान्नसंपदादिरूपमित्यर्थः संपदादिरूपत्वाभावेफलि
तमाह अतइतिप्रमात्वान्नकृतिसाध्याकिंतर्हिनित्यैवनप्रमाणसाध्येत्यर्थः उक्तरीत्यासिद्धब्रह्मस्वरूपमोक्षस्यकार्यसाध्यत्वंतज्ज्ञानस्य ५३
नियोगविषयत्वंचनकल्पयितुंशक्यंकृत्यसाध्यत्वादित्याह एवंभूतस्येति॥

ननुब्रह्मकार्यंगिंकारकत्वात्पत्न्यवेक्षणकर्मकारकान्यवदितिचेत् किंज्ञानेब्रह्मणः कर्मकारकत्वंउतोपासनायांनाद्यइत्याह नत्वेति
शाब्दज्ञानंविदिक्रियाशब्दार्थःविदितंकार्यं अविदितंकारणंतस्मादधि अन्यदित्यर्थः येनात्मनाइदंसर्वंदृश्यंलोकोजानातितंकेन
करणेनजानीयात् तस्मादविषयआत्मेत्यर्थः नद्वितीयइत्याह तथेति यन्मनसानमनुतइतिश्रुत्यालोकोमनसायत् ब्रह्मनजाना
तीत्यविषयत्वमुक्त्वातदेवावेद्यंब्रह्मत्वंविधियत्तूपाधिविशिष्टंदेवतादिकमिदमित्युपासतेजनाः नेदंब्रह्मेत्युक्तमित्यर्थःब्रह्मणःशा

नन्वविदिक्रियाकर्मत्वेनकार्यानुप्रवेशोब्रह्मणः अन्यदेवतद्विदितादथोअविदितादधीति विदिक्रियाकर्मत्वप्रतिषे-
धाद्येनेदंसर्वंविजानातितंकेनविजानीयादितिचंतथोपास्तिक्रियाकर्मत्वप्रतिषेधोपिभवतियद्वाचानभ्युदितं
येनवागभ्युद्यतइत्यविषयत्वंब्रह्मणउपन्यस्यतदेवब्रह्मत्वंविधिनेदंयदिदमुपासतइति अविषयत्वेब्रह्म
णःशास्त्रयोनित्वानुपपत्तिरितिचेन्नाविद्याकल्पितभेदनिवृत्तिपरत्वाच्छास्त्रस्य ॥ ॥ ६ ॥ ॥

द्बोधाविषयत्वेप्रतिज्ञाहानिरितिशंकते अविषयत्व इतिवेदांतजन्यवृत्तिकृताविद्यानिवृत्तिफलशालितयाशास्त्रप्रमाणकत्वंवृत्ति
विषयत्वेपिस्वप्रकाशब्रह्मणोवृत्त्यभिव्यक्तस्फुरणाविषयत्वादप्रमेयत्वमितिपरिहरतिनेति परत्वात्फलजनकत्वादित्यर्थः
निवृत्तिरूपब्रह्मतासयीदितिवार्थः॥

उक्तं विवृणोति नहीति निर्विषयत्वमिदंत्वं अविषयतया अदृश्यत्वेऽश्रुतिमाह तथाचेति यस्य ब्रह्म अमतं चैतन्याविषय इति निश्चय स्तेन सम्यगवगतं यस्य त्वज्ञस्य ब्रह्म चैतन्यविषय इति मतं स न वेद उक्तमेव दार्ढ्यार्थमनुवदति अविज्ञातमिति अविषयतया ब्रह्म विजानतामविज्ञातमदृश्यमिति पक्षः अज्ञानां तु ब्रह्म विज्ञातं दृश्यमिति पक्ष इत्यर्थः दृष्टेर्द्रष्टारं चाक्षुषमनोवृत्तेः साक्षिणं अनया दृश्यया दृष्ट्या

नहि शास्त्रमिदंतया विषयभूतं ब्रह्म प्रतिपादयिषति किंतर्हि प्रत्यगात्मत्वेनाविषयतया प्रतिपादयदविद्याकल्पितं वेद्यवेदितृवेदनादिभेदमपनयति तथाच शास्त्रं यस्यामतं तस्य मतं मतं यस्य न वेद सः अविज्ञातं विजानतां विज्ञातमविजानतां न दृष्टेर्द्रष्टारं पश्येर्न विज्ञातेर्विज्ञातारं विजानीया इति चैवमादि अतोऽविद्याकल्पितसंसारित्व निवर्तनेन नित्यमुक्तात्मस्वरूपसमर्पणान्न मोक्षस्यानित्यत्वदोषः ॥ ॥ ॥ ॥

नपश्येर्विज्ञातेर्बुद्धिवृत्तेःनिश्चयरूपायाः साक्षिणं तया नविषयीकुर्या इत्याह नेति नन्वविद्यादिनिवर्तकत्वेन शास्त्रस्य प्रामाण्येपि निवृत्तेरागंतुकत्वान्मोक्षस्यानित्यत्वं स्यादिति नेत्याह - अत इति तत्त्वज्ञानादित्यर्थः ध्वंसस्य नित्यत्वादात्मरूपत्वाच्च नानित्यत्वप्रसंग इत्यर्थः ॥ ॥ ॥ ॥ ॥ ५४

उत्पत्तिविकाराप्तिसंस्काररूपं चतुर्विधमेव क्रियाफलं तद्भिन्नत्वान्मोक्षस्य नोपासनासाध्यत्वमित्याह यस्येत्यादिना तस्मात् ज्ञानमेकं मुक्तेः साधनं तेन तयोः साध्यत्ववद् विकार्यत्वे चापेक्ष्यत इति फलमित्यन्वयः दूषयति तयोरिति स्थितस्यावस्थान्तरं विकारः नन्वनित्यत्वनिरासाय क्रियया स्थितस्यैव ब्रह्मणो ग्रामवदाप्तिरस्तु नेत्याह न चेति ब्रह्मजीवाभिन्नं न वा उभयथाप्याप्तत्वात् न क्रियापेक्षेत्याह स्वात्मेत्यादिना-

यस्य तूत्पाद्यो मोक्षस्तस्य मानसं वाचिकं कायिकं वा कार्यमपेक्ष्यत इति युक्तं तथा विकार्यत्वेऽपि तयोः पक्षयोर्मोक्षस्य ध्रुवमनित्यत्वं नहि दध्यादि विकार्यमुत्पाद्यं वा घटादि नित्यं दृष्टं लोके न चाप्यत्वेनापि कार्यापेक्षा स्वात्मस्वरूपत्वे सत्यनाप्यत्वात् स्वरूपव्यतिरिक्तत्वेऽपि ब्रह्मणो नाप्यत्वं सर्वगतत्वेन नित्याप्तस्वरूपत्वात् सर्वेण ब्रह्मण आकाशस्येव नापि संस्कार्यो मोक्षो येन व्यापारं अपेक्षेत संस्कारो नाम संस्कार्यस्य गुणाधानेन वा स्याद्दोषापनयेन वा न तावद्गुणाधानेन संभवत्यनाधेयातिशयब्रह्मस्वरूपत्वात् मोक्षस्य नापि दोषापनयेन नित्यशुद्धबुद्धब्रह्मस्वरूपत्वान्मोक्षस्य॥

यथा व्रीहीणां संस्कार्यत्वेन प्रोक्षणापेक्षा तथा मोक्षस्य नेत्याह नापीत्यादिना गुणाधानं व्रीहिषु प्रोक्षणादिना क्षालनादिना वस्त्रादौ मलापनयः॥ ॥५॥ ॥५॥ ॥५॥ ॥५॥ ॥५॥

शंकते स्वात्मधर्म इति ब्रह्मात्मस्वरूप एव मोक्षः नाद्यविद्यामलावृतः उपासनया मले नष्टे भिव्यज्यत इत्यत्र दृष्टांतः यथेति संस्कारो मलनाशः किमात्मनि मलः सत्यः कल्पितो वा द्वितीये ज्ञानादेव तन्नाशो न क्रियया आद्ये क्रिया किमात्मनिष्ठा अन्यनिष्ठा वा नाद्य इत्याह न क्रियेति अनुपपत्तिं स्फुटयति यदीति क्रिया हि स्वाश्रये संयोगादिविकारमकुर्वती न जायत इत्यर्थः तच्च वाक्यबाधनं न

स्वात्मधर्म एव संस्तिरोभूतो मोक्षः क्रिययात्मनि संस्क्रियमाणे भिव्यज्यते यथादर्शे निघर्षणक्रियया संस्क्रियमाणे भास्वरत्वं धर्म इति चेन्न क्रियाश्रयत्वानुपपत्तेरात्मनो यदाश्रया क्रिया तमविकुर्वती नैवात्मानं लभते यद्यात्मा स्वाश्रयक्रियया विक्रियेतानित्यत्वमात्मनः प्रसज्येताविकार्योयमुच्यत इति चैवमादीनि वाक्यानि बाध्येरन् तच्चानिष्टं तस्मान्न स्वाश्रया क्रियात्मनः संभवति अन्याश्रयायास्तु क्रियाया अविषयत्वान्न तयात्मा संस्क्रियते ॥ ॥

द्वितीय इत्याह अन्येति अविषयत्वात् क्रियाश्रयद्रव्यासंयोगित्वादिति यावत् दर्पणं तु सावयवं क्रियाश्रयेष्टकाचूर्णादिद्रव्यसंयोगित्वात्संस्क्रियत इति भावः ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ५५

अन्यक्रिययान्योनसंस्क्रियतइत्यत्रव्यभिचारंशंकते नन्विति आत्मनोमूलाविद्याप्रतिबिंबितत्वेनगृहीतस्यनरोहमितिभ्रांत्यादेहतादात्म्यमापंनस्यक्रियाश्रयत्वभ्रांत्यासंस्कार्यत्वभ्रमान्नव्यभिचार इत्याह नेतिकश्चिदिति अनिश्चितब्रह्मात्मस्वरूपइत्यर्थः तत्रात्मनिविषये आरोग्यबुध्दिरुत्पद्यते तस्यदेहसंहतस्यैवारोग्यफलमित्यन्वयः ननुदेहाभिन्नस्यकथंसंस्कारः तस्यामुष्मिकफलभोक्तृत्वायोगादित्यतआह तेनेति देह संहतेनैवांतःकरणप्रतिबिंबात्मनाकर्ताहमितिभासमानेनप्रत्यया ःकामादयोमनस्तादात्म्याद

ननुदेहाश्रयया स्नानाचमनयज्ञोपवीतादिकयाक्रियया देहीसंस्क्रियमाणोदृष्टः नदेहादिसंहतस्यैवाविद्यागृहीतस्यात्मनः संस्क्रियमाणत्वात् प्रत्यक्षंहिस्नानाचमनादेर्देहसमवायित्वं तयादेहाश्रयया तत्संहतएवकश्चिदविद्ययात्मत्वेनपरिगृहीतः संस्क्रियतइतियुक्तं यथादेहाश्रयचिकित्सानिमित्तेन धातुसाम्येनतत्संहतस्यतदभिमानिनआरोग्यफलमहमरोगइतियत्रबुध्दिरुत्पद्यते एवंस्नानाचमनयज्ञोपवीतादिनाहंशुद्धः संस्कृतइतियत्रबुद्धिरुत्पद्यतेससंस्क्रियतेसचदेहेनसंहतएवतेनैवत्वहंकर्त्राहंप्रत्ययविषयेणप्रत्ययिनासर्वाः क्रियानिर्वर्त्यते तत्फलंचसएवाश्नाति

स्यसंतीतिप्रत्ययिनाक्रियाफलंभुज्यतइत्यर्थःमनोविशिष्टस्यामुष्मिकभोक्तुः संस्कारोयुक्तइतिभावः ॥ ॥९॥ ॥९॥

विशिष्टस्यभोक्तृत्वंनकेवलस्यसाक्षिणइत्यत्रमानमाह तयोरिति प्रमातृसाक्षिणोर्मध्येसत्वसंसर्गमात्रेणकल्पितकर्तृत्वादिमा -
न्प्रमातापिप्पलंकर्मफलंभुंक्तेसएवशोधितत्वेनान्यःसाक्षितयाप्रकाशतइत्यर्थः आत्मादेहः देहादियुक्तंप्रमात्रात्मानमित्यर्थः ए
वंसोपाधिकस्यचिद्धातोर्मिथ्यासंस्कार्यत्वमुक्त्वानिरुपाधिकस्यासंस्कार्यत्वेमानमाह एकइति सर्वभूतेष्वद्वितीयएकःदेवःस्व
प्रकाशः तथापिमायावृतत्वान्नप्रकाशतइत्याह गूढइति ननुजीवेनासंबंधाद्भिन्नत्वाद्वादेवस्याभानंनतुमायागूहनादितिनेत्या

तयोरन्यःपिप्पलंस्वाद्वत्त्यनश्नन्नन्योअभिचाकशीतीतिमंत्रवर्णादात्मेंद्रियमनोयुक्तंभोक्तेत्याहुर्मनीषिणइतिच
तथाएकोदेवःसर्वभूतेषुगूढःसर्वव्यापीसर्वभूतांतरात्माकर्माध्यक्षःसर्वभूताधिवासःसाक्षी

ह सर्वव्यापीसर्वभूतांतरात्मेतिदेवस्यविभुत्वात्सर्वप्राणिप्रत्यक्त्वाच्चावरणादेवाभानमित्यर्थःप्रत्यक्त्वेकर्तृत्वंस्यादितिचेन्नकर्माध्य
क्षःक्रियासाक्षीत्यर्थःतर्हिसाक्ष्यमस्तीतिद्वैतापत्तिःनसर्वभूतानां अधिष्ठानंभूत्वासाक्षीभवति साक्ष्यमधिष्ठानेसाक्षिणिकल्पितमितिभावः

साक्षिशब्दार्थमाह चेताकेवलइति बोद्धृत्वेसत्यकर्तासाक्षीतिलोकप्रसिद्धं चकारोदोषाभावसमुच्चयार्थः निर्गुणत्वान्निर्दोषत्वाच्चगुणोदोषनाशोवासंस्कारोनेत्यर्थः सइत्कपञ्चमात्‌सुक्रादिशब्दाः पुंस्त्वेनवाच्याः सआत्मापरिसर्वमगात् व्यासःसुक्रोदीप्तिमान् अकायोलिंगशून्यः अव्रणःअक्षतः अस्नाविरःशिराविधुरः अनश्वरइतिवा आभ्यांपदाभ्यांस्थूलदेहशून्यत्वमुक्तं शुद्धोरागादिमलशून्यः अपापविद्धः पुण्यपापाभ्यामस्पृष्टइत्यर्थः अतइतिउत्पत्त्याप्तिविकारसंस्कारेभ्योन्यंसंचमंक्रियाफलंनास्ति-

चेताकेवलोनिर्गुणश्चेति सपर्यगात् शुक्रमकायमव्रणमस्नाविरंशुद्धमपापविद्धमितिचैतौमंत्रावनाधेयातिशयतां नित्यशुद्धतांचब्रह्मणोदर्शयतः ब्रह्मभावश्चमोक्षः तस्मान्नसंस्कार्योपिमोक्षः अतोन्यन्मोक्षंप्रतिक्रियानुप्रवेश द्वारंनशक्यंकेनचिद्दर्शयितुंतस्माज्ज्ञानमेकंमुक्त्वाक्रियायागंधमात्रस्यानुप्रवेशइहनोपपद्यते ननुज्ञानं नाम मानसी क्रियानवैलक्षण्यात्

यन्मोक्षस्यक्रियासाध्यत्वेद्वारंभवेदित्यर्थः ननुमोक्षस्यासाध्यत्वेशास्त्रारंभोवृथानज्ञानार्थत्वादित्याह तस्मादिति द्वाराभावादित्यर्थः व्याघातंशंकते नन्विति तथाचमोक्षेक्रियानुप्रवेशोनास्तीति व्याहतमितिभावः मानसमपिज्ञानं नविधियोग्याक्रियावस्तुतंत्रत्वात्कृत्यसाध्यत्वाच्चेत्याह नेति

वैलक्षण्यं प्रपंचयति क्रियाहीति यत्रविषयेतदनपेक्षैवयाचोद्यते तत्रसाहिक्रियेति योजनाविषयवस्त्वनपेक्षात्कृतिसाध्याचक्रियेत्य

त्रदृष्टांतमाह यथेति गृहीतमध्वर्युणेतिशेषः वषट्करिष्यन्होतासंध्यायेद्देवतांइतिचैवमादिवाक्येषुयथायादृशीध्यानक्रियावस्त्वन
पेक्षापुंतंत्राचचोद्यतेतादृशीक्रियेत्यर्थः ध्यानमपिमानसत्वात् ज्ञानवन्नक्रियेत्यतआह ध्यानमित्यादिनातथापिक्रियैवेतिशेषः

क्रियाहिनामसायत्रवस्तुस्वरूपनिरपेक्षैवचोद्यतेपुरुषचित्तव्यापाराधीनाचयथायस्यैदेवतायेहविर्गृहीतंस्यात्तांध्या
येद्वषट्करिष्यन्नितिसंध्यांमनसाध्यायेदितिचैवमादिषुध्यानंचिंतनंयद्यपिमानसंतथापिपुरुषेणकर्तुमकर्तुमन्य
थावाकर्तुंशक्यंपुरुषतंत्रत्वात् ज्ञानंतुप्रमाणजन्यंप्रमाणंचयथाभूतवस्तुविषयमतोज्ञानंकर्तुमकर्तुमन्यथावाकर्‌-
तुमशक्यंकेवलंवस्तुतंत्रमेवतत्‌नचोदनातंत्रं नापिपुरुषतंत्रं तस्मान्मानसत्वेपि ज्ञानस्यमहद्वैलक्षण्यम्

कृत्यसाध्यत्वमुपाधिरितिभावः ध्यानक्रियासुक्तातत्तोवैलक्षण्यंज्ञानस्यस्फुटयति ज्ञानंत्विति अतःप्रमात्वान्नचोदनातंत्रंनविधेर्विष ५७
यःपुरुषःकृति द्वारातंत्रं हेतुर्यस्यतत्पुरुषतंत्रंतस्माद्वस्तु व्यभिचारादपुंतंत्रत्वाच्चध्यानात् ज्ञानस्यमहान्भेदइत्यर्थः

भेदमेवदृष्टांतांतरेणाह यथाचेति अभेदासत्वेपिविधितोध्यानं कर्तुंशक्यंनज्ञानमित्यर्थः ननुप्रत्यक्षज्ञानस्यविषयजन्यतयातत्तंत्रत्वे पिशाब्दबोधस्यतदभावद्विधेयक्रियात्वमितिनेत्याह एवंसर्वेति शब्दानुमानाद्यर्थेष्वपिज्ञानमविधेयक्रियात्वेनज्ञातव्यं तत्रापिमानादेव-ज्ञानस्यप्राप्तेर्विध्ययोगादित्यर्थः तत्रैवंसतिलोकेज्ञानस्याविधेयत्वेसतीत्यर्थः यथाभूतत्वमाबाधितत्वंनन्वात्मानंपश्येत्ब्रह्मत्वंविध्यात्माद्र ष्टव्यइतिविज्ञानेलिङ्लोट्तव्यप्रत्ययाःविधायकाः श्रूयंतेअतोज्ञानंविधेयमित्यतआह तद्विषयइतितस्मिन्ज्ञानरूपेविषयेविधयः पु-

यथाचपुरुषोवावगौतमाग्निर्योषावावगौतमाग्निरित्यत्रयोषित्पुरुषयोरग्निबुद्धिर्मानसीभवतिकेवलचोदनाजन्यत्वात् - क्रियैवसापुरुषतंत्राच यातुप्रसिद्धेग्नावग्निबुद्धिः नसाचोदनातंत्रानापिपुरुषतंत्राकिंतर्हिप्रत्यक्षविषयवस्तुतंत्रैवेति ज्ञानमेवतन्नक्रियैवंसर्वप्रमाणविषयवस्तुषुवेदितव्यंतत्रैवंसतियथाभूतब्रह्मात्मविषयमपिज्ञानंनचोदनातंत्रं अतः तद्विषयेलिङादयःश्रूयमाणाअप्यनियोज्यविषयत्वात्कुंठीभवंत्युपलादिषुप्रयुक्तक्षुरतैक्ष्ण्यादिवत् अहेयानु-पादेयवस्तुविषयत्वात्

रूपंप्रवर्तयितुं अशक्ताभवंतिअनियोज्यं कृत्यसाध्यंनियोज्यशून्यंवाज्ञानंतद्विषयकत्वादित्यर्थः ममा यंनियोगइतिबोद्धानियोज्योविषयश्चविधेर्नास्तीतिभावः तर्हिज्ञेयंब्रह्मविधीयतांनेत्याह अहेयेतिवस्तुस्वरूपेविषयत्वात्ब्रह्मणोनि रतिशयस्यासाध्यत्वान्नविधेयत्वमित्यर्थः उदासीनवस्तुविषयकत्वाच्चज्ञानंनविधेयंप्रवृत्त्यादिफलाभावादित्यर्थः ॥

विधिपदानांगतिंपृच्छतिकिमर्थानीतिविधिच्छायानिप्रसिद्धयागादिविधितुल्यानीत्यर्थः विधिप्रत्ययैरात्म ज्ञानंपरमपुरुषार्थसाधनमिति
सूच्यतेस्तत्कृत्या आत्यंतिकेष्टहेतुलभ्भांत्याया विषयेषुप्रवृत्तिः आत्मश्रवणादिप्रतिबंधिकातंनिवृत्तिफलानिविधिपदानीत्याह स्वाभाविके
ति विवृणोतियोहीत्यादिना तत्रविषयेषुसंघातस्ययाप्रवृत्तिः तद्गोचराच्छब्दादेरित्यर्थः स्रोतश्चित्तवृत्तिप्रवाहः प्रवर्तयंतिज्ञानसाधन-

किमर्थानितर्ह्यात्मावाअरेद्रष्टव्यः श्रोतव्यइत्यादीनिविधिच्छायानिवचनानिस्वाभाविकप्रवृत्तिविषयविमुखीकरणार्थानिइति
ब्रूमः योहिबहिर्मुखः प्रवर्ततेपुरुषइष्टंमेभूयादनिष्टंमाभूदिति नचतत्रात्यंतिकंपुरुषार्थंलभते तमात्यंतिकपुरुषार्थवांछिनंस्वा
भाविककार्यकरणसंघातप्रवृत्तिगोचराद्विमुखीकृत्यप्रत्यगात्मस्रोतस्तयाप्रवर्तयंत्यात्मावाअरेद्रष्टव्यइत्यादीनितस्या-
त्मान्वेषणायप्रवृत्तस्याहेयमनुपादेयंचात्मतत्वमुपदिश्यतेइदंसर्वंयदयमात्मायत्रत्वस्यसर्वमात्मैवाभूत्तत्केनकंपश्येत्त-
त्केनकंविजानीयाद्विज्ञातारमरेकेनविजानीयादयमात्माब्रह्मेत्यादिभिः यदप्यकर्तव्यप्रधानमात्मज्ञानंहानायोपादानाय
वानभवतीतितत्तथैवेत्युपगम्यते अलंकारोह्ययमस्माकं यत्ब्रह्मात्मावगतौसत्यांसर्वकर्तव्यताहानिः कृतकृत्यताचेति॥ ॥

श्रवणादाविति शेषः श्रवणस्वरूपमाह तस्येति अन्वेषणंज्ञानंयदिदंजगत्तत्सर्वंआत्मैवेत्यनात्मबाधेनात्माबोध्यते अद्वितीयादृश्यात्मबोधे ५८
कृविधितपस्वीद्वैतवनोपजीवनः स्थास्यतीतिभावः॥ ॥ ॥ ॥

आत्मज्ञानिनः कर्तव्याभावेमानमाह तथाचेति अयंस्वयंप्रभानंदः परमात्माहमस्मीति यदिकश्चित्पुरुष आत्मानंजानीयात्तदाकिंफलमिच्छ -
न्कस्यवाभोक्तुः प्रीतयेशरीरंतप्यमानमनुसंज्वरेत्तप्येत भोक्तृभोग्यद्वैताभावात् कृतकृत्यआत्मविदित्यभिप्रायः ज्ञानदौर्लभ्यार्थश्चेच्छ -
ब्दः एतद्बुद्ध्यतमंतत्वं वृत्तिकारमतनिरासमुपसंहरति तस्मादिति प्राभाकरोक्तमुपन्यस्यति यदपिकेचिदिति कर्तात्मालोकसिद्धत्वान्न

तथाचश्रुतिः आत्मानंचेद्विजानीयादयमस्मीतिपूरुषः किमिच्छन्कस्यकामायशरीरमनुसंज्वरेदिति एतद्बुद्ध्वाबुद्धिमां
स्यात्कृतकृत्यश्चभारतेतिस्मृतिः तस्मान्नप्रतिपत्तिविधिविषयतयाब्रह्मणः समर्पणं यदपिकेचिदाहुः प्रवृत्तिनिवृ
त्तिविधितच्छेषव्यतिरेकेणकेवलवस्तुवादीवेदभागोनास्तीति॥ ॥ ॥

वेदांतार्थः तदन्यत्ब्रह्मनास्त्येव वेदस्यकार्यपरत्वेनमानाभावादित्यर्थः मानाभावोऽसिद्ध इत्याह तन्नेति अज्ञातस्यफलस्वरूप
स्यात्मनउपनिषदेकवेद्यस्याकार्यशेषत्वात्॥ ॥ ॥ ॥

कृत्स्नवेदस्यकार्यपरत्वमसिद्धं नचप्रवृत्तिनिवृत्तिलिंगाभ्यांश्रोतुस्तद्धेतुकार्यबोध मनुमायवक्तृवाक्यस्यकार्यपरत्वंनिश्चित्यवा-
क्यस्थपदानांकार्यान्वितेशक्तिग्रहान्नसिद्धस्यापदार्थस्यवाक्यार्थत्वमितिवाच्यं पुत्रस्तेजातइतिवाक्यश्रोतुःपितुर्हर्षलिंगेनेष्टं
पुत्रजन्मानुमायपुत्रादिपदानांसिद्धेसंगतिग्रहात्कार्यान्वितापेक्षयान्वितार्थेशक्तिरित्यंगीकारेलाघवात्सिद्धस्यापिवाक्यार्थत्वादित्यलंकिं
चब्रह्मणःनास्तित्वादेवकृत्स्नवेदस्यकार्यपरत्वंउतवेदांतेषुतस्याभानात् अथवाकार्यशेषत्वात् किंवालोकसिद्धत्वाद्वाहोस्वित्मानांतर

तन्नोपनिषदस्यपुरुषस्यानन्यशेषत्वाद्योसावुपनिषत्स्वेवाधिगतःपुरुषासंसारीब्रह्मोत्पाद्यादिचतुर्विधद्रव्य
विलक्षणःस्वप्रकरणस्थोनन्यशेषोनासौनास्तिनाधिगम्यतइतिवाशक्यंवदितुंसएषनेतिनेत्यात्मेत्यात्मशब्दा-
दात्मनश्चप्रत्याख्यानस्याशक्यत्वात्यएवनिराकर्तातस्यैवात्मत्वात

विरोधात् तत्राद्यंपक्षत्रयंनिराचष्टे योसाविति अनन्यशेषत्वार्थमसंसारीत्यादिविशेषणंनास्तित्वाभावेहेतुंवेदांतमानसिद्धत्वमुक्त्वा ५१
हेत्वंतरमात्मत्वमाहसएषइति इतिरिदमर्थेइदंनइदंनेतिसर्वदृश्यनिषेधेनयआत्माउपदिष्टःसएषइत्यर्थः॥ ॥ ॥

चतुर्थं शंकते नन्वात्माहमिति आत्मनोऽहंकारादिसाक्षित्वे नाहंधीविषयत्वस्य निरस्तत्वान्न लोकसिद्धतेत्याह नेतियं तीर्थकरा अपि
न जानंतितस्यालौकिकत्वं किमु वाच्यमित्याह नहीति समस्तारतम्यवर्जितः तत्तन्मते आत्मानधिगतिद्योतकानि विशेषणानि पंच
मं निरस्यति अत इति केनचिद्धादिना प्रमाणेन वेत्यर्थः अगम्यत्वान्न मानांतरविरोध इति भावः साक्षिकर्मांगं चेतनत्वात् कर्तृवदिति त
त्राह विधीति अज्ञातसाक्षिणोऽनुपयोगाज्ज्ञातस्य व्याघातकत्वान्न कर्मशेषत्वमित्यर्थः साक्षिणः सर्वशेषित्वाद्धेयानुपादेयत्वा-

नन्वात्माहंप्रत्ययविषयत्वादुपनिषत्स्वेव विज्ञायत इत्यनुपपन्नं न तत्साक्षित्वेन प्रत्युक्तत्वान्न ह्यहंप्रत्ययविषय
कर्तृव्यतिरेकेण तत्साक्षी सर्वभूतस्थः सम एकः कूटस्थनित्यः पुरुषो विधिकांडे तर्कसमये वा केनचिदधिगतः -
सर्वस्यात्मा अतः स न केनचित्प्रत्याख्यातुं शक्यो विधिशेषत्वं वा नेतुं आत्मत्वादेव च सर्वेषां न हेयो नाप्युपादेयः सर्वं
हि विनश्यद्विकारजातं पुरुषांतं विनश्यति पुरुषो विनाशहेत्वभावादविनाशी विक्रियाहेत्वभावाच्च कूटस्थनित्योऽत
एव नित्यशुद्धमुक्तस्वभावः तस्मात्पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिः ॥

च्च न कर्मशेषत्वमित्याह आत्मत्वादिति अनित्य
त्वेनात्मनो हेयत्वमाशंक्याह सर्वं हीति परिणामित्वेन हेयतां निराचष्टे विक्रियेति उपादेयत्वं निराचष्टे अत एवेति निर्विकारित्वादित्यर्थः उपादे
यत्वं हि साध्यस्य न त्वात्मनः नित्यसिद्धत्वादित्यर्थः परप्राप्त्यर्थं आत्मा हेय इत्यत आह तस्मात्पुरुषान्न परं किंचिदिति काष्ठा सर्वस्यावधिः ॥

एवमात्मनोनन्यशेषत्वादबाध्यत्वादपूर्वत्वाद्वेदांतेषु स्फुटंभानात् चवेदांतैकवेद्यत्वमुक्तं तत्रश्रुतिमाह तंत्वेति तंसकारणसूत्रस्याधिष्ठानंपुरुषंपूर्णंहिशाकल्यत्वात्वांपृच्छामीत्यर्थः अतइति उक्तलिंगैः श्रुत्याचवेदांतानामात्मवस्तुपरत्वनिश्चयादित्यर्थः पूर्वोक्तिमनुवदतियदपीति वेदस्यनैरर्थक्यमेशंकिते तस्यार्थवित्तापरमिदंभाष्यं दृष्टोहीति तत्रफलवदर्थावबोधनमितिवक्तव्येधर्मविचारप्रक्रमात्कर्मावबोधनमित्युक्तं नैतावतावेदांतानांब्रह्मपरत्वनिरासः अतएवानुपलब्धेर्थेतत्प्रमाणमितिसूत्रकारोधर्मस्यफलवदज्ञातत्वेनैव

तंत्वौपनिषदंपुरुषंपृच्छामीतिचौपनिषदत्वविशेषणंपुरुषस्योपनिषत्सुप्राधान्येनप्रकाश्यमानत्वेउपपद्यते अतोभूतवस्तुपरोवेदभागोनास्तीतिवचनंसाहसमात्रं यदपिशास्त्रतात्पर्यविदामनुक्रमणं दृष्टोहितस्यार्थः कर्मावबोधनमित्येवमादितत्धर्मजिज्ञासाविषयत्वाद्विधिप्रतिषेधशास्त्राभिप्रायंद्रष्टव्यं॥ ॥ ॥

वेदार्थतांदर्शयिति तच्चाविशिष्टंप्रसज्यणइतिनवृत्त्थवाक्यैर्विरोधइत्याह तद्धर्मेति निषेधशास्त्रस्यापिनिवृत्तिकार्यपरत्वंअस्ति तत्सूत्रभाष्यवाक्यजातंकर्मकांडस्यकार्यपरत्वाभिप्रायमित्यर्थः वस्तुतस्तु लिङर्थेकर्मकांडस्यतात्पर्येलिङर्थश्चलोकेप्रवर्तकज्ञानगोचरत्वेन क्लृप्तंयागादिक्रियागतमिष्टसाधनत्वमेवनक्रियातोतिरिक्तंकार्यंतस्यकूर्मलोमवदप्रसिद्धत्वादितितस्यापिपराभिमतकार्यविलक्षणेसिद्धेप्रामाण्यं किमुतज्ञानकांडस्येतिमंतव्यं ॥ ॥ ॥ ॥

किंचवेदांताः सिद्धवस्तुपराः फलवद्भूतशब्दत्वाद्दध्यादिशब्दवदित्याह अपि चेति किमक्रियार्थकशब्दानामानर्थक्यमभिधेयाभा
वः फलाभावो वा आद्य आह आम्नायस्येति इति न्यायेन एतदभिधेयराहित्यं नियमेनांगीकुर्वतां सोमेन यजेत दध्ना जुहोतीत्या
दिवाक्येषु दधिसोमादिशब्दानां अर्थशून्यत्वं स्यादित्यर्थः ननु केनोक्तमभिधेयराहित्यं इत्याशंक्याह प्रवृत्तीति कार्यातिरेकेण भ
व्यार्थत्वेन कार्यशेषत्वेन दध्यादिशब्दो भूतं वक्ति चेत् तर्हि सत्यादिशब्दः कूटस्थं न वक्तीत्यत्र को हेतुः किं कूटस्थस्याक्रियात्वादु
ताक्रियाशेषत्वादिति प्रश्नः ननु दध्यादेः कार्यान्वयित्वेन कार्यत्वादुपदेशः न कूटस्थस्याकार्यत्वादित्याद्यमाशंक्य निरस्यति नहीति

अपि चाम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानामित्येतदेकांतेनाभ्युपगच्छतां भूतोपदेशानर्थक्यप्रसंगः प्रवृत्तिनिवृ
त्तिविधितच्छेषव्यतिरेकेण भूतं चेद्वस्तूपदिशति भव्यार्थत्वेन कूटस्थनित्यं भूतं नोपदिशतीति को हेतुः नहि भू
तमुपदिश्यमानं क्रियाभवति अक्रियात्वेपि भूतस्य क्रियासाधनत्वात् क्रियार्थ एव भूतोपदेश इति चेत् नैष दोषः -
क्रियार्थत्वेपि क्रियानिर्वर्तनशक्तिमद्वस्तूपदिष्टमेव ॥

त्ति दध्यादेः कार्यत्वे कार्यशेषत्वहानिः अतो भूतस्य कार्याभिन्नस्य शब्दार्थत्वं लब्धमिति भावः द्वितीयं शंकते अक्रियात्वेपीति
क्रियार्थः कार्यशेषपरः कूटस्थस्य तत्कार्यशेषत्वान्नोपदेश इति भावः भूतस्य कार्यशेषत्वं शब्दार्थत्वाय फलाय वा नाद्य इत्याह नै
ष दोष इति दध्यादेः कार्यशेषत्वे सत्यपि शब्देन वस्तुमात्रमेवोपदिष्टं न कार्यान्वयी शब्दार्थः अन्वितार्थमात्रे शब्दानां शक्तिग्रहणादित्यर्थः

शा॰भा॰ ६१ द्वितीयमंगीकरोतिक्रियार्थत्वंत्विति तस्यभूतविशेषस्यदध्यादेः क्रियाशेषत्वंफलमुद्दिश्यांगीक्रियतइत्यर्थः नतुब्रह्मणइतितुश- अ॰प्र॰पा॰ १
ब्दार्थः ननुभूतस्यकार्यशेषत्वांगीकारेस्वातंत्र्येणकथंशब्दार्थतेतितत्राह नचेति फलार्थशेषत्वांगीकारमात्रेणशब्दार्थत्वभं
गोनास्तिशेषत्वस्यशब्दार्थतायामप्रवेशादित्यर्थः आनर्थक्यंफलाभावइति पक्षंशंकते यदीति यद्यपिदध्यादिस्वतोनिष्फलमपि
क्रियाद्वारासफलत्वादुपदिष्टं तथापितदकूटस्थब्रह्मवादिनः क्रियाद्वाराभावात्तेनदृष्टांतेनकिंफलंस्यादित्यर्थः भूतस्यसाफल्ये

क्रियार्थत्वंतुप्रयोजनंतस्यनचैतावतावस्त्वनुपादिष्टंभवतियदिनामोपदिष्टंकिंतनतेनस्यादित्युच्यते अनवग
तात्मवस्तूपदेशश्चतथैवभवितुमर्हति तदवगत्यामिथ्याज्ञानस्यसंसारहेतोर्निवृत्तिः प्रयोजनंक्रियतइत्यवि
शिष्टमर्थवत्वंक्रियासाधनवस्तूपदेशेन

क्रियैवद्वारमितिननियमः रज्ज्वाज्ञानमात्रेणसाफल्यदर्शनादित्याह उच्यतइति तथैवदध्यादिवदेवेत्यर्थः दध्यादेः क्रियाद्वारासा ६१
फल्यंब्रह्मणस्तुस्वतंइति विशेषेसत्यपिवेदांतानांसफलभूतार्थकत्वमात्रेणदध्याद्युपदेशसाम्यमित्यनवद्यम्॥ "६१"

इदानीं वेदांतानां निषेधवाक्यवत्सिद्धार्थपरत्वमित्याह अपिचेति नञः प्रकृत्यर्थेन संबंधात् हननाभावो नञर्थः इष्टसाधनत्वं तव्यादिप्रत्ययार्थः इष्टश्चात्र नरकदुःखाभावः तत्परिपालको हननाभाव इति निषेधवाक्यार्थः हननाभावो दुःखाभावहेतुरित्युक्तावर्थाद्धननस्य दुःखसाधनत्वधिया पुरुषो निवर्तते नात्र नियोगः कश्चिदस्ति तस्य क्रियात्तत्साधन दध्यादिविषयत्वात् नच हननाभावरूपा नञ्वाच्या निवृत्तिः क्रिया अभावत्वान्नापि क्रियासाधनं अभावस्य भावाय हेतुत्वाभ्दावा र्थासत्वायोगश्चेत्यर्थः अतो निषेध

अपिच ब्राह्मणो न हंतव्य इतिचैवमाद्या निवृत्तिरुपदिश्यते नच सा क्रिया नापि क्रियासाधनमक्रियार्थानामुपदेशो नर्थकश्चेत् ब्राह्मणो न हंतव्य इत्यादि निवृत्त्युपदेशानामानर्थक्यं प्राप्तं तच्चानिष्टं ॥ ॥ ॥

शास्त्रस्य सिद्धार्थे प्रामाण्यमिति भावः विपक्षे दंडमाह अक्रियेति ॥ ॥ ननु स्वभावतो रागतः प्राप्तेन हंत्यर्थेनानुरागेण नञः संबंधेन हेतुना हननक्रियाविरोधिनी संकल्पक्रिया बोध्यते सा च न अर्थरूपा तत्र प्राप्तत्वाद्धियीयते अहननं कुर्यादिति तथा च कार्यार्थकमिदं वाक्यमित्याशंक्य निषेधति ॥ " " " "

नन्वेति औदासीन्यंपुरुषस्यस्वरूपंतच्च हननक्रियानिवृत्त्युपलक्षितं निवृत्त्यौदासीन्यंहननाभावइतियावत् तद्व्यतिरेकेणनञः क्रियार्थत्वंकल्पयितुंनचशक्यमितियोजना मुख्यार्थस्याभावस्य नञर्थत्वसंभवे तद्विरोधिक्रियालक्षणायाः न्याय्यत्वात् निषेधवाक्यस्यापि कार्यार्थत्वे विधिनिषेधभेदविप्लवापत्तेश्चेतिभावः ननु तदभाववत्तदन्यत्वतद्विरुद्धयोरपिनञः शक्तिः किंनस्यात् - अब्राह्मणः अधर्म इति प्रयोगदर्शनादितिचेत् न अनेकार्थत्वस्यान्याय्यत्वादित्याह नचेश्चेतिगवादिशब्दानांतु अगत्यानानार्थत्वं स्वर्गेषुवाग्वज्रादीनां शक्यपशुसंबंधाभावेनलक्षणानवतारात् अन्यविरुद्धयोस्तु लक्ष्यत्वंयुक्तं शक्यसंबंधात् ब्राह्मणाद

नचस्वभावप्राप्तहंत्यर्थानुरागेणनञः शक्यमप्राप्तक्रियार्थत्वंकल्पयितुं हननक्रियानिवृत्त्यौदासीन्यव्यतिरेकेणनञश्चैषस्वभावोयत्स्वसंबंधिनोभावं बोधयति ॥ ॥ ॥ ॥

-न्यस्मिन् क्षत्रियादौधर्मविरुद्धेवापापेब्राह्मणाद्यभावस्यनञ्शक्यस्यसंबंधात्प्रकृतेच आख्यातयोगात् नञ् प्रसज्यप्रतिषेधक एवनपर्युदासलक्षक इतिमंतव्यं यद्वानञः प्रकृत्यानसंबंधः प्रकृतेः प्रत्ययार्थोपसर्जनत्वात्प्रधानसंबंधाच्चाप्रधानानां किंतु प्रकृत्यर्थान्विष्टेनप्रत्ययार्थेनेष्टसाधनत्वेनसंबंधोनञः इष्टंदस्वापेक्षयाबलवदनिष्टाननुबंधियत्तदेव नतात्कालिकसुखमात्रंविषसंपृक्तान्नभोजनस्यापिइष्टत्वापत्तेः तथाचनहंतव्यः हननं बलवदनिष्टासाधनत्वेसति इष्टसाधनंनभवतीत्यर्थः ॥ आख्यातैकदेशधातुयोगात् ॥ ६२

अत्रचहंतव्यइतिहननेविशिष्टेष्टसाधनत्वंभ्रांतिप्राप्तमनूद्यनंत्यभावबोधनंबलवदनिष्टसाधनंहननमितिबुद्धिर्भवतिहननेतात्कालिके
ष्टसाधनत्वरूपविशेष्यसत्वेनविशिष्टाभावबुद्धेर्विशेषणाभावपर्यवसानात् विशेषणंचबलवदनिष्टसाधनत्वमितितदभावोबलवद
निष्टसाधनत्वंन अर्थइतिपर्यवसंनंतद्बुद्धिरौदासीन्यपरिपालिकेत्याह अभावेति चोप्यर्थः पक्षांतरद्योतीमद्रूत्यर्थाभावबुद्धिवत्प
त्ययार्थाभावबुद्धिरपीत्यर्थः बुद्धेः क्षणिकत्वात्तदभावेसत्यौदासीन्यात्प्रच्युतिरूपहननादौप्रवृत्तिःस्यात् इतितत्राह साचेति यथा

अभावबुद्धिश्चौदासीन्यकारणंसाचदग्धेंधना ग्निवत्स्वयमेवोपशाम्यति ॥ ॥

ग्निरिंधनंदग्ध्वाशाम्यतिएवंसानञर्थाभावबुद्धिः हननादाविष्टसाधनत्वभ्रांतिमूलंरागेंधनंदग्ध्वैवस्वयंशाम्यतीत्यक्षरार्थः रागना
शेकुतःप्रच्युतिरितिभावः यद्वारागतःप्राप्तासाक्रियारागनाशेस्वयमेवशाम्यतीत्यर्थः परपक्षेतुहननविरोधिक्रियाकार्येत्युक्तेपि
हननस्येष्टसाधनत्वभ्रांत्यनिरासात्प्रच्युतिर्दुर्वारा॥ ॥५१॥ ॥५१॥ ॥५१॥

तस्मात्तदभावएवनअर्थइत्युपसंहरति तस्मादितिभावार्याभिवेनतद्विषयककृत्यभावात्कार्याभावस्तच्छब्दार्थः यद्वेत्यक्तपक्षेनिवृत्त्यप लक्षितमौदासीन्यंयस्माद्विशिष्टाभावायत्तमेवेति व्याख्येयंस्वतःसिद्धस्यौदासीन्यस्यनञर्थसाध्यत्वोपपादनार्थंनिवृत्त्युपलक्षितत्वमिति ध्येयंतस्यवटोर्व्रतमित्यनुष्टेयक्रियावाचिव्रतशब्देनकार्यमुपक्रम्यनेक्षेतोद्यंतमादित्यमितिप्रजापतिव्रतमुक्तंअतउपक्रमबलात्तत्र नञः ईक्षणविरोधिसंकल्पक्रियालक्षणांगीकृताएवमगोरस्फराअधर्मइत्यादौनामधात्वर्थयोर्युक्तस्यनञः प्रतिषेधवाचित्वायोगात्

तस्माद्ब्रह्मसक्तक्रियानिवृत्त्यौदासीन्यमेवब्राह्मणोनहंतव्यइत्यादिषुप्रतिषेधार्थंमन्यामहे अन्यत्रप्रजापतिव्रतादिभ्यः तस्मात्पुरुषार्थानुपयोग्युपाख्यानादिभूतार्थवादविषयमानर्थक्याभिधानंद्रष्टव्यं

अन्यविरुद्धलक्षकत्वं एतेभ्यः प्रजापतिव्रतादिभ्योन्यत्राभावमेवनञर्थंमन्यामहइत्यर्थःदुःखाभावफलकेनअर्थसिद्धेर्निषेधशास्त्र मानत्ववद्वेदांतानांब्रह्मणिमानत्वमितिभावःतर्ह्यक्रियार्थानामानर्थक्यमितिसूत्रंकिंविषयमितितत्राह तस्मादिति वेदांतानां स्वार्थेफलवत्वाद्यर्थकथाविषयंतदित्यर्थः ६२

यदपीत्यादिस्पष्टार्थश्रवणज्ञानमात्रात्संसारनिवृत्तावपिसाक्षात्काराज्जीवत एवमुक्तिर्दुरुपन्ह्वेतिसदृष्टांतमाह अत्रोच्यतइत्यादिना ब्र

यदप्युक्तंकर्तव्यविध्यनुप्रवेशमंतरेणवस्तुमात्रमुच्यमानमनर्थकंस्यात्सप्तद्वीपावसुमतीत्यादिवदितितत्परिहृ
तंरज्जुरियंनायंसर्पइतिवस्तुमात्रकथनेपिप्रयोजनस्यदृष्टत्वात् ननुश्रुतब्रह्मणोपियथापूर्वंसंसारित्वदर्शनात्
नरज्जुस्वरूपकथनवदर्थवत्त्वमितिउक्त अत्रोच्यते नावगतब्रह्मात्मभावस्यय थापूर्वंसंसारित्वंशक्यंदर्शयितुं
वेदप्रमाणजनितब्रह्मात्मभावविरोधात् नहिशरीराद्यात्माभिमानिनोदुःखभयादिमत्त्वंदृष्टमितितस्यैववेदप्रमा
णजनितब्रह्मात्मावगमेतदभिमाननिवृत्तौ तदेवमिथ्याज्ञाननिमित्तंदुःखभयादिमत्त्वंभवतीतिशक्यंकल्पयितुं
नहिधनिनोगृहस्थस्यधनाभिमानिनोधनापहारनिमित्तंदुःखंदृष्टमितितस्यैवप्रव्रजितस्यधनाभिमानरहितस्यत
देवधनापहारनिमित्तंदुःखंभवति नचकुंडलिनःकुंडलित्वाभिमाननिमित्तंसुखंदृष्टमितितस्यैवकुंडलवियुक्त-
स्यकुंडलित्वाभिमानरहितस्यतदेवकुंडलित्वनिमित्तंसुखंभवति तदुक्तंश्रुत्या अशरीरंवावसंतंनप्रियाप्रिये-
स्पृशत इतिशरीरेपतितेऽशरीरत्वंस्यात् नजीवत इतिचेत्

ह्माहमितिसाक्षात्कारविरोधादित्यर्थः तत्त्वविदोजीवन्मुक्तौमानमाह तदुक्तंश्रुत्येति जीवतोशरीरत्वंविरुद्धमिति शंकते शरीरइति –

 आत्मनोदेहसंबंधस्यभ्रांतिप्रयुक्तत्वात्तत्त्वधियातन्नाशरूपंअशरीरत्वंजीवतोपफलमित्याह नेत्यादिनाअसंगात्मस्वरूपत्वशरीरत्वं
भ्रांत्यावृतंतत्त्वधियाजीवतोव्यज्यतइत्याह नित्यमितिदेहात्मनोःसंबंधःसत्यइतिशंकतेतत्कृतेति तन्नाशार्थंकार्यापेक्षेतिभावः
आत्मनःशरीरसंबंधेजातेधर्माधर्मोत्पत्तिःतस्यांसत्यांसंबंधजन्मेत्यन्योन्याश्रयादेकस्यासिद्ध्याद्वितीयस्याप्यसिद्धिःस्यादिति
परिहरतिनेत्यादिना नन्वेतद्देहजन्यधर्माधर्मकर्मणएतद्देहसंबंधहेतुत्वेस्यादन्योन्याश्रयःपूर्वदेहकर्मणएतद्देहसंबंधोत्पत्तिःपूर्व

नसशरीरत्वस्यमिथ्याज्ञाननिमित्तत्वान्नत्वात्मनःशरीरात्माभिमानलक्षणंमिथ्याज्ञानंमुक्त्वाअन्यतःसशरीर
त्वंशक्यंकल्पयितुंनित्यमशरीरत्वंअकर्मनिमित्तत्वादित्यवोचाम तत्कृतधर्माधर्मनिमित्तंसशरीरत्वमिति
चेन्नशरीरसंबंधस्यासिद्धत्वाद्धर्माधर्मयोरात्मकृतत्वासिद्धेःशरीरसंबंधस्यधर्माधर्मयोस्तत्कृतत्वस्यचेतरे
तराश्रयत्वप्रसंगादंधपरंपरैषानादित्वकल्पना॥

देहश्चेत्तत्पूर्वदेहकृतकर्मणइतिबीजांकुरवदनादित्वान्नायंदोषइत्यतआह अंधेति अप्रमाणिकीत्यर्थः नहिबीजादंकुरःततोबी ६४
जांतरंचयथाप्रत्यक्षेणदृश्यतेतद्वदात्मनोदेहसंबंधःपूर्वकर्मकृतःप्रत्यक्षःनाप्यस्तिकश्चिदागमःप्रत्यक्तासंगोहीत्यादिश्रुतिः
सर्वकर्तृत्वंवारयतीतिभावः

तत्रयुक्तिमाहक्रियेति कूटस्थस्यक्रियायोगान्नकर्तृत्वमित्यर्थः स्वतोनिष्क्रियस्यापिकारकसंनिधानात् कर्तृत्वमितिशंकां दृष्टांतवैषम्येणनिरस्यति नेति राजादीनांस्वकृतभृत्यकार्येकर्तृत्वंयुक्तंनात्मनइत्यर्थः देहकर्मणोरविद्याभूमौबीजांकुर वदावर्तमानयोरात्मनासंबंधोभ्रांतिकृतएवेत्याह मिथ्येति ननुयजेतेति विध्यनुपपत्यात्मनःकर्तृत्वमेवेष्टव्यमितित-

क्रियासमवायाभावाद्ध्यात्मनःकर्तृत्वानुपपत्तेःसंनिधानमात्रेणराजप्रभृतीनांदृष्टंकर्तृत्वमितिचेन्नधनदा नाद्युपार्जितभृत्यसंबंधित्वात्तेषांकर्तृत्वोपपत्तेर्नत्वात्मनोधनदानादिवच्छरीरादिभिःस्व स्वामिसंब- धनिमित्तंकिंचिच्छक्यंकल्पयितुंमिथ्याभिमानस्तुप्रत्यक्षःसंबंधहेतुरेतेनयजमानत्वमात्मनोव्याख्या तमत्राहुःदेहादिव्यतिरिक्तस्यात्मनआत्मीयेदेहादावभिमानोगौणोनमिथ्येति॥

त्राह एतेनेति भ्रांतिकृतेनदेहादिसंबंधेनयागादिकर्तृत्वमाब्रह्मबोधाद्व्याख्यातमित्यर्थःअत्राहुःप्राभाकराइत्यर्थः भ्रांत्यभावाद्देहसंबंधादिकंसत्यमितिभावः

भेदज्ञानाभावान्न गौणः इत्याह नेति प्रसिद्धोज्ञातो वस्तुनोर्भेदो येन न तस्य गौणमुख्यज्ञानाश्रयत्वप्रसिद्धिरित्यर्थः यस्य त-
स्य पुंसो गौणौ भवतः इत्यन्वयः शौर्यादिगुणविषयावित्यर्थः तस्यात्विति भेदज्ञानशून्यस्य पुंस इत्यर्थः शब्दप्रत्ययाविति

नप्रसिद्धवस्तुभेदस्य गौणत्वमुख्यत्वप्रसिद्धेर्यस्य हि प्रसिद्धो वस्तुभेदो यथा केसरादिमानाकृतिविशेषोन्वयव्य
तिरेकाभ्यां सिंहशब्दप्रत्ययभाङ्मुख्योन्यः प्रसिद्धस्ततश्चान्यः पुरुषः प्रायकैः क्रौर्यशौर्यादिभिः सिं
हगुणैः संपन्नः प्रसिद्धः तस्य पुरुषे सिंहशब्दप्रत्ययौ गौणौ भवतः नाप्रसिद्धवस्तुभेदस्य तस्य त्वन्यत्रा
न्यशब्दप्रत्ययौ भ्रांतिनिमित्तावेव भवतः न गौणौ यथा मंदांधकारे स्थाणुरयमित्यगृह्यमाणविशेषे पुरु
षशब्दप्रत्ययौ स्थाणुविषयौ यथा वा शुक्तिकायामकस्माद्रजतमिति निश्चितौ शब्दप्रत्ययौ तद्वद्देहा-
दिसंघातेहमिति निरुपचारेण शब्दप्रत्ययावात्मानात्मविवेकेनोत्पद्यमानौ कथं गौणौ शक्यौ वदितुं आत्मा-
नात्मविवेकिनामपि पंडितानामजाविपालानामिवाविविक्तौ शब्दप्रत्ययौ भवतः

शब्दः शब्दबोधश्चेत्यर्थः संशयमूलौ तावुदाहरति यथा मंदेति यदा संशयमूलयोर्न गौणत्वम् तदा भ्रांतिमूलयोः -
किं वाच्यमित्याह यथा वेति अकस्मादिति अतर्कितादृष्टादिना संस्कारोद्बोधे सतीत्यर्थः निरुपचारेण गुणज्ञानं विनेत्यर्थः ॥ ६५

व्यतिरिक्तात्मास्तित्ववादिनामिति देहात्मवादिनांतुभ्रमेत्यभिमान इतिभावः जीवन्मुक्तौ प्रमाणमाह तथाचेति तत्तत्र जीव
न्मुक्तस्य देहे यथा दृष्टांतः अहिर्निर्ल्वयनी सर्पत्वक् व ल्मीकादौ प्रत्यस्ता निक्षिप्ता मृतासर्पेणत्यक्ताभिमानावर्तते एवमेवे
दं विदुषात्यक्ताभिमानं शरीरं तिष्ठति अथतथात्वचानिर्मुक्त सर्पवदेवायं देहस्थो शरीरः विदुषो देहे सर्पस्यत्वचीवाभिमान

तस्माद्देहादिव्यतिरिक्तात्मास्तित्ववादिनां देहादावहंप्रत्ययो मिथ्यैवनगौणस्तस्मान्मिथ्याप्रत्ययनिमि
त्तत्वात्सशरीरत्वस्यसिद्धं जीवतोपि विदुषोशरीरत्वं तथाच ब्रह्मविदि षयाश्रुतिस्तद्यथाहिर्निर्ल्वयि
नी वल्मीके मृता प्रत्यस्ता शयीतैवमेवेदं शरीरं शेते अथायमशरीरो मृतः प्राणो ब्रह्मैव तेजएवेति सचक्ष
रचक्षुरिव सकर्णोकर्णइव सवागवागिव समना अमनाइव सप्राणोप्राणइवेतिच स्मृतिरपिच स्थितप्र-
ज्ञस्यकाभाषाइत्याद्यास्थितप्रज्ञलक्षणान्याचक्षाणाविदुषः सर्वप्रवृत्त्यसंबंधं दर्शयति तस्माभावग
तब्रह्मात्मभावस्य यथापूर्वं संसारित्वं यस्यतु यथापूर्वं संसारित्वं नासावगतब्रह्मात्मभावः

भावादशरीरत्वादमृतः प्राणितीति प्राणो जीवन्नपि ब्रह्मैव किंतद्ब्रह्मतेजः स्वयंज्योतिरानंद एवेत्यर्थः वस्तुतो चक्षुर
पिबाधितचक्षुराद्यनुवृत्त्यास चक्षुरिवेत्यादि योज्यम् ॥

इत्यनवद्यमिति ब्रह्मात्मज्ञानान्मुक्तिरुक्ता भाति सत्यं वेदांतानां प्रामाण्यं हि तच्छासनाच्छास्त्रत्वं च निर्दोषितया स्थितमित्यर्थः ब्रह्मज्ञानमुद्दिश्य श्रवणवन्मनननिदिध्यासनयोरप्यवांतरवाक्यभेदेन विध्यंगीकारान्न ब्रह्मणो विधिशेषत्वमुद्दिश्यज्ञानलभ्यतया-प्राधान्यादित्याह नेति श्रवणं ज्ञानकारणं वेदांतगोचरत्वात् प्रधानं मनननिदिध्यासनयोः प्रमेयगोचरत्वात् तदंगत्वं नियमादृष्टस्य ज्ञाने उपयोगः सर्वापेक्षान्यायादिति मंतव्यं तर्हि ज्ञाने विधिः किमिति त्यक्तस्तत्राह यदिहीति यदि ज्ञाने विधिमंगीकृत्य

इत्यनवद्यं यत्तु पुनरुक्तं श्रवणात्पराचीनयोर्मनननिदिध्यासनयोर्दर्शनाद्विधिशेषत्वं ब्रह्मणो न स्वरूपपर्यवसायित्वमिति नावगत्यर्थत्वात् मनननिदिध्यासनयोः यदि ह्यवगतं ब्रह्मान्यत्र विनियुज्येत भवेत्तदा विधिशेषत्वं न तु तदस्ति मनननिदिध्यासनयोरपि श्रवणवदवगत्यर्थत्वात् तस्मान्न प्रतिपत्तिविधिविषयतया शास्त्रप्रमाणकत्वं ब्रह्मणः संभवतीत्यतः

वेदांतैरवगतं ब्रह्म विधेयज्ञानकर्मकारकत्वेन विनियुज्येत तदा विधिशेषत्वं स्यात् न त्ववगतस्य विनियुक्तत्वमस्ति प्रमावगत्या फललाभे विध्ययोगादित्यर्थः तस्माद्विध्यसंभवात् अतः शेषत्वासंभवात् सत्यादिवाक्यैर्लब्धज्ञानेनाज्ञाननिवृत्तिरूपफललाभे सतीत्यर्थः ६६

सूत्रंयोजयति स्वतंत्रमिति एवंचसतीति चोवधारणेउक्तरीत्याब्रह्मणः स्वातंत्र्येसत्येवभगवतो व्यासस्यपृथक्शास्त्रस्यन्
क्लृप्तिर्युक्ताधर्मविलक्षणप्रमेयत्वाभावात् वेदांतानांकार्यपरत्वंतु प्रमेयाभेदान्नयुक्तेत्यर्थः ननुमानसधर्मविचारार्थंपृथगारं-
भइत्याशंक्याह आरभ्यमाणंचेति अथवाह्यसाधनधर्मविचारानंतरं अतोबाह्यधर्मस्यशुद्धिद्वारामानसोपासनाधर्महेतु
त्वात्परिशिष्टोमानसधर्मोजिज्ञास्यइतिसूत्रंस्यादित्यत्रदृष्टांतमाह अथेति तृतीयाध्यायेश्रुत्यादिभिः शेषोपित्वनि

स्वतंत्रमेवब्रह्मशास्त्रप्रमाणकंवेदांतवाक्यसमन्वयादितिसिद्धमेवंचसत्यथातोब्रह्मजिज्ञासेतिशा-
स्त्रारंभउपपद्यतेप्रतिपत्तिविधिपरत्वेहि अथातोधर्मजिज्ञासेत्येवारब्धत्वान्नपृथक्शास्त्रमारभ्येतनआर
भ्यमाणंचैवमारभ्येत अथातःपरिशिष्टधर्मजिज्ञासेत्यथातःक्रत्वर्थपुरुषार्थयोर्जिज्ञासेतिवत् ब्र
ह्मात्मैक्यावगतिस्त्वप्रतिज्ञातेतितदर्थोयुक्तःशास्त्रारंभोऽथातोब्रह्मजिज्ञासेति ॥

र्णयानंतरंशेषिणाशेषस्यप्रयोगसंभवात्कः क्रतुशेषः कोवापुरुषशेषइतिजिज्ञास्यतइत्यर्थः एवमारभ्येतनत्वारब्धंतस्मा
दांतरधर्मार्थमारंभइत्ययुक्तमितिभावः स्वमतेसूत्रानुगुण्यमस्तीत्याहब्रह्मेति जैमिनिनाब्रह्मत्वविचारितमिति तज्जिज्ञा
स्यत्वसूत्रणंयुक्त मित्यर्थः ॥ ॥

वेदांतार्थश्चेदद्वैतं तर्हि द्वैतसापेक्षविध्यादीनां कागतिरित्याशंक्य ज्ञानात्प्रागेव तेषां प्रामाण्यं न पश्चादित्याह तस्मादिति - ज्ञानस्य प्रमेयप्रमातृबाधकत्वादित्यर्थः ब्रह्म न कार्यशेषः तद्बोधात्प्रागेव सर्वव्यवहार इति अत्र ब्रह्मविदां गाथामुदाहरति अपि चेति सदबाधितं ब्रह्म पूर्णमात्मा विषयानादत्त इति सर्वसाक्ष्यहमित्येवं बोधे जाते सति पुत्रदेहादेः सत्ताबाधनात्


तस्मादहं ब्रह्मास्मीत्येतदवसाना एव सर्वे विधयः सर्वाणि चेतराणि प्रमाणानि न ह्यहेयानुपादेयाद्वैतात्मावगतौ निर्विषयाण्यप्रमातृकाणि च प्रमाणानि भवितुमर्हन्तीति अपि चाहुः गौणमिथ्यात्मनोऽसत्त्वे पुत्रदेहादिबाधनात् सद्ब्रह्मात्माहमित्येवं बोधे कार्यं कथं भवेत्॥

मायामात्रत्वनिश्चयात्पुत्रदारादिरहमिति स्वीयदुःखसुखभाक्त्वगुणयोगाद्गौणात्माभिमानस्य नरोऽहं कर्ता मूढ इति मिथ्यात्माभिमानस्य च सर्वव्यवहारहेतो　　रसत्त्वे कार्यविधिनिषेधादिव्यवहारः कथं भवेत् हेत्वभावात् न कथंचिद्भवेदित्यर्थः ६७

नन्वहं ब्रह्मेति बोधो बाधितः अहमर्थस्य प्रमातुः ब्रह्मत्वायोगादित्याशक्य प्रमातृत्वस्याज्ञानविलसितांतःकरणतादात्म्यकृतत्वान्न बाध इत्याह अन्वेष्टव्य इति य आत्मापहतपाप्मा विजरो विमृत्युर्विशोकः सोन्वेष्टव्य इति श्रुतेः ज्ञातव्यपरमात्मविज्ञानात्प्रागेवाज्ञानाच्छिद्रातोरात्मनः प्रमातृत्वं प्रमातैव ज्ञातः सन्न्याप्मरागद्वेषमरणविवर्जितः परमात्मा स्यादित्यर्थः प्रमातृत्वस्य कल्पितत्वेन तदाश्रितानां प्रमाणानां प्रामाण्यं कथमित्यत आह देहेति यथा देहात्मत्वप्रत्ययः कल्पितो भ्रमो

अन्वेष्टव्यात्मविज्ञानात्प्राक्प्रमातृत्वमात्मनः अन्विष्टस्यात्प्रमातैव पाप्मदोषादिवर्जितः देहात्मप्रत्ययो य द्वत्प्रमाणत्वेन कल्पितः लौकिकं तद्वदेवेद प्रमाणं त्वात्मनिश्चयादिति॥

पि व्यवहारांगतया मानत्वेनेष्यते वैदिकैः तद्वल्लौकिकप्रत्यक्षादिकमात्मबोधावधिव्यवहारकाले बाधाभावात् व्यावहारिकं प्रामाण्यवस्त्वमिष्यतां वेदांतानां तु कालत्रयाबाध्यबोधित्वात्तत्वावेदकं प्रामाण्यमिति तुः शब्दार्थः आत्मनिश्चयात् आत्मनिश्चयादित्याङ् मर्यादायां प्रमातृत्वस्य कल्पितत्वेपि प्रत्यक्षादिविषयाबाधात्प्रामाण्यमिति भावः राम नाम्नि परे धाम्नि रूढाम्नायसमन्वयः कार्यतात्पर्यबाधेन साधितः सुद्बुद्धये॥ ॥ इति चतुःसूत्रीभाष्यव्याख्या



वृत्तमनूद्याक्षेपलक्षणामवांतरसंगतिमाह सांख्यादयस्त्विति भवतुसिद्धेवेदांतानांसमन्वयः तथापिमानांतरायोग्येब्रह्मणिशक्तिग्र
हायोगात्कूटस्थत्वेनकारणत्वायोगाच्चनसमन्वयः किंतुसर्गाद्यंकार्यंजडप्रकृतिकंकार्यत्वात् घटवत् इत्यनुमानगम्येत्रिगुणेप्रधाने
समन्वयइत्याक्षिपंतीत्यर्थः सिध्दंमानांतरगम्यमेवेत्याग्रहः शक्तिग्रहार्थः अतएवप्रधानादावनुमानोपस्थितेशक्तिग्रहसंभवात् त-

एवंतावद्वेदांतवाक्यानांब्रह्मात्मावगतिप्रयोजनानांब्रह्मात्मनितात्पर्येणसमन्वितानामंतरेणापिका
र्यानुप्रवेशंब्रह्मणिपर्यवसानमुक्तं ब्रह्मचसर्वज्ञंसर्वशक्तिजगदुत्पत्तिस्थितिनाशकारणमित्युक्तंसां
ख्यादयस्तु परिनिष्ठितंवस्तुप्रमाणांतरगम्यमेवेतिमन्यमानाः प्रधानादीनिकारणांतराण्यनुमिमा-
नास्तत्परतयैववेदांतवाक्यानियोजयंतिसर्वेष्वेववेदांतवाक्येषुसृष्टिविषयेषुअनुमानेनैवकार्येण
कारणंलिलक्षयिषितं॥

त्परतयावाक्यानियोजयंतीत्युक्तं किंचतेजसासोम्यशुंगेनसन्मूलमन्विच्छेत्याद्याः श्रुतयः शुंगेनलिंगेनकारणस्यसतोन्वेषणंदर्शयंत्यो
मानांतरसिध्दमेवजगत्कारणंवदंतीत्याह॥ सर्वेष्विति॥ ७॥ ॥ ॥

नन्वतींद्रियत्वेन प्रधानादेर्व्याप्तिग्रहायोगात्कथमनुमानंतत्राह प्रधानेति यत्कार्यंतज्जडप्रकृतिकं यथाघटः यज्जडंतच्चेतनसंयुक्तं य थारथादिरितिसामान्यतोदृष्टानुमानगम्याः प्रधानपुरुषसंयोगाइत्यर्थः अद्वितीयब्रह्मणः कारणत्वविरोधिमतांतरमाह काणादास्त्वि ति सृष्टिवाक्येभ्यएवपरार्थानुमानरूपेभ्योयत्कार्यंतद्बुद्धिमत्कर्तृकमितिईश्वरंकर्तारंपरमाणूंश्चयत्कार्यद्रव्यंतत्स्वन्यूनपरिमाणद्र

प्रधानपुरुषसंयोगानित्यानुमेयाइतिसांख्याःमन्यंते काणादास्त्वितेभ्यएववाक्येभ्यईश्वरंनिमित्तका रणमनुमिमते अणूंश्चसमवायिकारणमेवमन्येपितार्किकावाक्याभासयुक्त्याभासावष्टंभाः पूर्वप क्षवादिनइहोत्तिष्ठंते तत्रपदवाक्यप्रमाणज्ञेनाचार्येणवेदांतवाक्यानांब्रह्मावगतिपरत्वप्रदर्शनाय वाक्याभासयुक्त्याभासप्रतिपत्तयःपूर्वपक्षीकृत्यनिराक्रियंते ॥ ॥ ॥

व्यारब्धमित्यनुमिमतइत्यर्थः ॥ अन्येपिबौद्धादयः असद्वाइदमग्रआसीदित्यादिवाक्याभासः यद्दृष्टकृतकं तच्छून्यावसानंयथादीपइतियुक्त्या भासः एवंवादिविप्रतिपत्तिमुक्त्वातन्निरासायोत्तरसूत्रसंदर्भमवतारयति तत्रेतिवादिविवादेसतीत्यर्थः व्याकरणमीमांसान्यायतन्त्रनिधि त्वात्पदवाक्यप्रमाणज्ञत्वम् ॥ ॥ ॥ ॥

यज्जगत्कारणं नश्चेतनमचेतनं वेति ईक्षणस्य मुख्यत्वगौणत्वाभ्यां संशये पूर्वपक्षमाह तत्रसांख्या इति अपिशब्दो वेवकारार्थौ सदेवे-त्यादिस्पष्टब्रह्मलिंगवाक्यानां प्रधानपरत्वनिरासेन ब्रह्मपरत्वोक्तेः श्रुत्यादिसंगतयः पूर्वपक्षे जीवस्य प्रधानैक्योपास्तिः सिध्दांते ब्रह्मै-क्यज्ञानमितिविवेकः अचेतनसत्वस्यैव सर्वज्ञत्वं नचेतनस्येत्याह तेनचसत्वधर्मेणेति नकेवलस्येति जन्यज्ञानस्य सत्वधर्मत्वात् नि-

तत्रसांख्याः प्रधानं त्रिगुणमचेतनं जगतः कारणमिति मन्यमाना आहुः यानि वेदांतवाक्यानि सर्वज्ञस्य सर्वश क्तेः ब्रह्मणो जगत्कारणत्वं प्रदर्शयंतीत्यवोचस्तानि प्रधानकारणपक्षेपि योजयितुं शक्यंते सर्वशक्तित्वं तावत्प्रधा नस्यापि स्वविकारविषयमुपपद्यते एवं सर्वज्ञत्वमप्युपपद्यते कथं यत्तु ज्ञानं मन्यसे सः सत्वधर्मः सत्वात्संजायते ज्ञा नं इति स्मृतेः तेन च सत्वधर्मेण ज्ञानेन कार्यकरणवंतः पुरुषाः सर्वज्ञाः योगिनः प्रसिध्दाः सत्वस्य हि निरतिशयोत्कर्षे सर्वज्ञत्वं प्रसिध्दं नकेवलस्याकार्यकरणस्य पुरुषस्योपलब्धिमात्रस्य सर्वज्ञत्वं किंचिज्ज्ञत्वं वा कल्पयितुं शक्यं त्रिगु

त्योपलब्धेरकार्यत्वात् चिन्मात्रस्य नकर्तृत्वमित्यर्थः ननु गुणानां साम्यावस्था प्रधानमिति सांख्या वदंति तदवस्थायां सत्वस्योत्कर्षाभा वात्कथं सर्वज्ञतेत्यत आह त्रिगुणत्वादिति त्रयो गुणा एव प्रधानं तस्य साम्यावस्था तदभेदात्प्रधानमित्युच्यते तदवस्थायामपि प्रलये सर्वज्ञानशक्तिमत्वरूपं सर्वज्ञत्वमक्षतमित्यर्थः ॥ ॥ ॥ ॥

ननुमयाकिमितिशक्तिमत्वरूपंगौणंसर्वज्ञत्वमंगीकार्यमितितत्राह नहीति अनित्यज्ञानस्यप्रलयेनाशात् शक्तिमत्वंवाच्यम् कारकां तराभावाच्चेत्याह अपिचेतिमतद्वयसाम्यमुक्त्वास्वमतेविशेषमाह अपिचेति ब्रह्मणः कारणत्वंस्मृतिपादेसमर्थ्यते प्रधानादेःका- रणत्वंतर्कपादेयुक्तिभिर्निरस्यते अधुनाश्रुतिभिर्निरस्यति ईक्षतेर्नाशब्दमितिईक्षणश्रवणात् वेदशब्दावाच्यमशब्दंप्रधानंअ

पत्वात्तुप्रधानस्यसर्वज्ञानकारणभूतंसत्वंप्रधानावस्थायामपिविद्यतइतिप्रधानस्यांचेतनस्यैवसतः सर्वज्ञत्वंमुपचर्यते वेदांतवाक्येष्ववश्यंत्वयापिसर्वज्ञंब्रह्माभ्युपगच्छतासर्वज्ञानशक्तिमत्वेनैवसर्वज्ञत्वमभ्यु पगंतव्यं॥ नहिसर्वविषयंज्ञानंकुर्वदेवब्रह्मवर्तते तथाहिज्ञानस्यनित्यत्वेज्ञानक्रियांप्रतिस्वातंत्र्यंब्रह्मणोहीयेत तथानित्यंतदितिज्ञानक्रियायाउपरमे पिब्रह्मतदासर्वज्ञानशक्तिमत्वेनैवसर्वज्ञत्वमापततिअपिचप्रागु त्पत्तेःसर्वकारकशून्यंब्रह्मेष्यतेत्वया नचज्ञानसाधनानांशरीरेंद्रियादीनामभावेज्ञानोत्पत्तिः कस्यचिदुपप- न्ना अपिचप्रधानस्यानेकात्मकस्यपरिणामसंभवात्कारणत्वोपपत्तिः मृदादिवत्नासंहतस्यैकात्मकस्यब्रह्म-

शब्दत्वान्नकारणमितिसूत्रयोजना तत्सच्छब्दवाच्यंकारणमैक्षत ईक्षणमेवाहबहुस्यामिति बहुप्रपंचरूपेणस्थितस्यर्थमहमेवोपादान ७० तयाकार्यभेदाज्जनिष्यामित्याह प्रेति॥ ॥ ॥ ॥

एवंतत्सदीक्षित्वा आकाशंवायुंचसृष्ट्वातेजःसृष्टवानित्याह तदिति मिषच्चलत्सत्वाक्रांतमितियावत् सजीवाभिन्नःपरमात्माप्राण मसृजत प्राणाच्छ्रधांखंवायुर्ज्योतिरापः पृथिवींद्रियंमनोन्नमन्नाद्वीर्यंतपोमंत्राः कर्मलोकेषुनामचेत्युक्ताःषोडशकलाः ननुइक्षुश्रि- पौधातुनिर्देशेइतिकात्यायनस्मरणादीक्षतेरितिपदेनश्तिबंतेन धातुरुच्यतेनधात्वर्थइतिईक्षणंकथंव्याख्यायत इत्याशंक्यलक्षणयेत्या

णइत्येवंप्राप्तेइदंसूत्रमारभ्यते॥ ईक्षतेर्नाशब्दं॥ नसांख्यपरिकल्पितंअचेतनंप्रधानंजगतःकारणंशक्यं वेदांते ष्वाश्रयितुं अशब्दंहितत्कथमशब्दत्वमीक्षतेरीक्षितृत्वश्रवणात्कारणस्यकथंएवंश्रूयते सदेवसोम्येदमग्रआ सीत् एकमेवाद्वितीयमित्युपक्रम्यतदैक्षतबहुस्यांप्रजायेयेति॥ तत्तेजोसृजतेति तत्रेदंशब्दवाच्यंनामरूपव्या- कृतंजगत्प्रागुत्पत्तेःसदात्मनावधार्यतस्यैवप्रकृतस्यसच्छब्दवाच्यस्येक्षणपूर्वकंतेजःप्रभृतेःस्रष्टृत्वंदर्शयति तथा न्यत्रात्मावाइदमेकएवाग्रआसीन्नान्यत्किंचनमिषत्सऐक्षतलोकान्नुसृजाइति सइमांल्लोकानसृजतेतिईक्षापूर्विका

हईक्षतेरितिचेति इतिकर्तव्यताविधेर्यजतेः पूर्ववत्त्वमितिजैमिनिसूत्रेयथायजतिपदेनलक्षणयाधात्वर्थोयागउच्यतेतद्वदिहापीत्य- र्थः सौर्यादिविकृतियागस्यांगानामविधानात्पूर्ववत्त्वंदर्शादिप्रकृतिस्थांगवत्त्वमितिसूत्रार्थः धात्वर्थनिर्देशेनलाभमाह तेनेतिसा- मान्यतःसर्वज्ञोविशेषतःसर्ववित्दितिभेदः ज्ञानमीक्षणमेवतपः॥ ॥ ॥

शा॰भा॰ तपस्विनः फलमाह तस्मादिति एतत्कार्यंसूत्राख्यंब्रह्म केवलसत्ववृत्तेर्ज्ञानत्वमंगीकृत्यप्रधानस्यसर्वज्ञत्वंनिरस्तं संप्रतिनकेवलजड अ॰१
७१ वृत्तिर्ज्ञानशब्दार्थः किंतुसाक्षिबोधविशिष्टावृत्तिर्वृत्तिव्यक्तबोधोवाज्ञानं तच्चाचेतनस्यप्रधानस्यनास्तीत्याह अपिचेतिसाक्षित्वमस्ति

मेवसृष्टिमात्रष्टे क्वचिच्चषोडशकलंपुरुषंप्रस्तुत्याह सईक्षांचक्रेसप्राणमसृजतेति ईक्षतेरितिचधात्वर्थनिर्देशोभि
प्रेतोयजतेरितिवत् नधातुनिर्देशस्तेनयः सर्वज्ञः सर्वविद्यस्यज्ञानमयंतपः॥ तस्मादेतद्ब्रह्मनामरूपमन्नंचजायत
इत्येवमादीन्यपिसर्वज्ञेश्वरकारणपराणिवाक्यानिउदाहर्तव्यानियत्तुउक्तंसत्वधर्मेणज्ञानेनसर्वज्ञंप्रधानंभविष्यतीतित
न्नोपपद्यते नहिप्रधानावस्थायांगुणसाम्यात्सत्वधर्मोज्ञानंसंभवति ननूक्तंसर्वज्ञानशक्तिमत्वेनसर्वज्ञंभविष्यतीति
तदपिनोपपद्यते यदिगुणसाम्येसतिसत्वव्यपाश्रयांज्ञानशक्तिमाश्रित्यसर्वज्ञंप्रधानमुच्येत कामंरजस्तमोव्यपाश्रया
मपिज्ञानप्रतिबंधशक्तिमाश्रित्यकिंचिज्ज्ञत्वमुच्येत अपिचनासाक्षिकासत्ववृत्तिर्जानाति नाभिधीयतेनचाचेतनस्य
प्रधानस्यसाक्षित्वमस्ति तस्मादनुपपन्नंप्रधानस्यसर्वज्ञत्वंयोगिनांतुचेतनत्वात्सत्वोत्कर्षनिमित्तंसर्वज्ञत्वमुपपन्न
मित्यनुदाहरणं अथपुनः साक्षिनिमित्तमीक्षितृत्वंप्रधानस्यकल्प्येतयथाग्निनिमित्तमयःपिंडादेर्दग्धृत्वंतथासति

येनेक्षितृत्वंतस्यादिति शेषः ननुसत्ववृत्तिमात्रेणयोगिनांसर्वज्ञत्वमुक्तमित्यत आह योगिनांत्विति सेश्वरसांख्यमतमाह॥ ॥ ७२

सर्वज्ञत्वंनामसर्वगोचरज्ञानवत्त्वंनज्ञानकर्तृत्वंज्ञानस्यकृत्यसाध्यत्वादितित्द्वदिकृत्वापृच्छति इदंतावदिति सर्वंजानातीतिशब्दासाधुत्वंशंकते-
ज्ञाननित्यत्वमिति नित्यस्यापिज्ञानस्यतत्तदर्थोपहितत्वेनब्रह्मस्वरूपाद्भेदंकल्पयित्वाकार्यत्वोपचाराद्ब्रह्मणस्तत्कर्तृत्वव्यपदेशःसाधुरितिसदृ
ष्टांतमाह नभवतेतिसंततेत्यर्थः असत्यपिअविवक्षितेपिनत्तुप्रकाशनेरकर्मकत्वात्सविताप्रकाशतेतिप्रयोगेपिईक्षतेःसकर्मकत्वात्कर्माभावे

यन्निमित्तमीक्षितृत्वंप्रधानस्यतदेवसर्वज्ञंमुख्यंब्रह्मजगतःकारणमित्युक्तंयत्पुनरुक्तंब्रह्मणोपिनमुख्यंसर्वज्ञत्वमुपपद्यते
नित्यज्ञानक्रियत्वेज्ञानक्रियांप्रतिस्वातंत्र्यासंभवादित्यत्रोच्यते॥ इदंतावद्भवान्प्रष्टव्यः कथंनित्यज्ञानक्रियत्वेसर्वज्ञत्वहानिरितिय-
स्यहिसर्वविषयावभासनक्षमंज्ञानंनित्यंसो सर्वज्ञइतिविप्रतिषिध्दमनित्यत्वेहिज्ञानस्यकदाचिज्जानातिइत्यसर्वज्ञत्वमपिस्यान्ना
सौज्ञाननित्यत्वेदोषोस्ति ज्ञाननित्यत्वेज्ञानविषये स्वातंत्र्यव्यपदेशोनोपपद्यतेइतिचेत्तन्नप्रततौष्ण्यप्रकाशेपिसवितरिदहतिप्र
काशयति इतिस्वातंत्र्यव्यपदेशदर्शनात्ननुसवितुर्दाह्यप्रकाश्यसंयोगेसतिदहतिप्रकाशयतीतिव्यपदेशःस्यान्नतुब्रह्मणःप्रागुत्प
त्तेर्ज्ञानकर्मसंयोगोस्तीतिविषमोदृष्टांतः नासत्यपिकर्मणिसविताप्रकाशतइतिकर्तृत्वव्यपदेशदर्शनादेवमसत्यपिज्ञानकर्मणिब्रह्मण

स्तदैक्षतेत्युक्तमितितत्राह कर्मापेक्षायांखित्वितिकर्माविवक्षायामपिप्रकाशरूपेसवितरिप्रकाशइतिकथंचित्प्रकाशक्रियाश्रयत्वेनकर्तृत्वोप-
चारवच्चिदात्मन्यपिचिद्रूपेक्षणकर्तृत्वोपचारान्नवैषम्यमित्युक्तंपूर्वं॥ ॥ ॥

अथनानुकुंभकारस्यसोपाध्यंतःकरणवृत्तिरूपेक्षणवदीश्वरस्यापिस्वोपाध्यविद्यायाः विविधसृष्टिसंस्कारायाः प्रलयावसानेनोद्बुद्धसंस्कारायाः सर्गोन्मुखः कश्चित्परिणामः तस्यसूक्ष्मरूपेणविलीनसर्वकार्यविषयकंईक्षणंतस्यकार्यत्वात्कर्मसद्भावाच्चतत्कर्तृत्वंमुख्यमितिद्योतयतिस्तरामिति ननुमायोपाधिकबिंबचिन्मात्रस्येश्वरस्यकथमीक्षणंप्रतिमुख्यंकर्तृत्वंकृत्यभावादितिचेन् नकार्यानुकूलज्ञानवतएवकर्तृत्वादी-

स्तदैक्षतेतिकर्तृत्वव्यपदेशोपपत्तेर्नवैषम्यंकर्मापेक्षायांतुब्रह्मणिईक्षितृत्वश्रुतयः सुतरामुपपन्नाः किंपुनस्तत्कर्मयत्प्रागुत्पत्तेः ईश्वरज्ञानस्यविषयोभवतीति तत्त्वान्यत्वाभ्यामनिर्वचनीयेनामरूपेअव्याकृतेव्याचिकीर्षितेइतिब्रूमः यत्प्रसादाद्धियोगिनामप्यतीतानागतविषयंप्रत्यक्षंज्ञानमिच्छंतियोगशास्त्रविदः किमुवक्तव्यंतस्यनित्यसिद्धस्येश्वरस्यसृष्टिस्थितिसंहृतिविषयंनित्यंज्ञानंभवतीति यदप्युक्तंप्रागुत्पत्तेर्ब्रह्मणः शरीरादिसंबंधमंतरेणेक्षितृत्वमनुपपन्नमितिनतच्चोद्यमवतरति सवितृप्रकाशवद्ब्रह्मणोज्ञानस्वरूपनित्यत्वेज्ञानसाधनापेक्षानुपपत्तेः॥ ॥ ॥

श्वरस्यापिईक्षणानुकूलनित्यज्ञानवत्त्वात् नचनित्यज्ञानेनैवकर्तृत्वनिर्वाहात्किमीक्षणेनेतिवाच्यं वाय्वादेरेवशब्दवत्त्वसंभवात्किमाकाशेनेत्यतिप्रसंगात् अतःश्रुतत्वाद्वाय्वादिकारणत्वेनाकाशवदैक्षतेत्यागंतुकत्वेनश्रुतमीक्षणमाकाशादिहेतुत्वेनांगीकारमित्यलं अव्याकृतेसूक्ष्मात्मनास्थितेव्याकर्तुंस्थूलीकर्तुमिष्टेत्यर्थः ७२

अव्याकृतकार्योपरक्तचैतन्यरूपेक्षणस्यकारकानपेक्षत्वेपिवृत्तिरूपेक्षणस्यकारकंवाच्यमित्याशंक्याह अपिचाविद्यादिमतइति यथैकस्य-ज्ञानंतथान्यस्यापीतिनियमाभावान्मायिनोशरीरस्यापिजन्येक्षणकारकत्वमितिभावः ननुयज्जन्यज्ञानंतच्छरीरसाध्यमितिव्याप्तिरस्तीत्याशंक्यश्रुतिबाधमाह मंत्रौचेति कार्यंशरीरंकरणमिंद्रियं अस्येश्वरस्यशक्तिर्मायास्वकार्यापेक्षयापराविचित्रकार्यकारित्वाद्विविधासात्वेतित्वमात्रसिध्धान्नप्रमाणसिध्धेत्याहश्रूयतइति ज्ञानरूपेणबलेनयासृष्टिक्रियासास्वाभाविकीअनादिमायात्मकत्वादित्यर्थः ज्ञानस्यचैतन्यस्य बलं

अपिचाविद्यादिमतःसंसारिणःशरीराद्यपेक्षाज्ज्ञानोत्पत्तिःस्यान्नज्ञानप्रतिबंधकारणरहितस्येश्वरस्यमंत्रौचेमावीश्वरस्यशरीराद्यनपेक्षतामनावरणज्ञानतांचदर्शयतः नतस्यकार्यंकरणंचविद्यतेनतत्समश्चाप्यधिकश्चदृश्यते परास्यशक्तिर्विविधैवश्रूयतेस्वाभाविकीज्ञानबलक्रियाचेति अपाणिपादोजवनोगृहीतापश्यत्यचक्षुःसशृणोत्यकर्णः सवेत्तिवेद्यंनचतस्यास्तिवेत्तातमाहुरग्र्यंपुरुषंमहांतमितिच ननुनास्तितवज्ञानप्रतिबंधकारणवानीश्वरादन्यः संसारी नान्योतोस्तिद्रष्टानान्योतोस्तिविज्ञातेतिश्रुतेः तत्रकिमिदमुच्यतेसंसारिणःशरीराद्यपेक्षाज्ज्ञानोत्पत्तिर्नेश्वरस्येति ॥

मायावृत्तिबिंबितत्वेनस्फुटत्वंतस्यक्रियानामप्रतिबिंबत्वेनब्रह्मणोजनकताज्ञानत्वनापिस्वाभाविकीतिवार्थः अपाणिरपिगृहीताअपादोपिजवनः ईश्वरस्यस्वकार्येलौकिकहेत्वपेक्षानास्तीतिभावः अग्र्यमनादिंपुरुषंअनंतंमहांतंविभुमित्यर्थः अपसिध्धांतंशंकते नन्वितिज्ञानेप्रतिबंधकारणान्यविद्यारागादीनित्येतावतईश्वरादन्योनास्तीत्यन्वयः॥

औपाधिकस्यजीवेश्वरभेदस्यमयोक्तत्वान्नापसिध्धांतइत्याह अत्रोच्यतइति तत्कृतउपाधिसंबंधकृतः शब्दतज्जन्यप्रत्ययरूपोव्यवहारः असंकीर्णइतिशेषः अव्यतिरेकेकथमसंकीर्णस्तत्राह तत्कृताचेति उपाधिसंबंधकृतेत्यर्थः देहादिसंबंधस्यहेतुरविवेकोनाद्यविद्यातयाकृतेत्यर्थः अविद्यायांहिप्रतिबिंबोजीवः बिंबचैतन्यमीश्वरः इतिभेदोविद्याधीनसत्ताकः अनादिभेदस्यकार्यत्वायोगात् कार्यबुध्यादिकृत

अत्रोच्यतेसत्यंनेश्वरादन्यःसंसारीतथापिदेहादिसंघातोपाधिसंबंधइष्यतएवघटकरकगिरिगुहाद्युपाधिसंबंधइवव्योम्नः तत्कृतश्चशब्दप्रत्ययव्यवहारोलोकस्यदृष्टोघटच्छिद्रंकरकादिच्छिद्रमित्यादिराकाशाव्यतिरेकेपितत्कृताचाकाशेघटाकाशादिभेदमिथ्याबुद्धिर्दृष्टातथेहापिदेहादिसंघातोपाधिसंबंधाविवेककृतेश्वरसंसारिभेदमिथ्याबुद्धिर्दृश्यतेचात्मनएवसतोदेहादिसंघातेनात्मन्यात्मत्वाभिनिवेशोमिथ्याबुद्धिमात्रेणपूर्वेणसतिचैवंसंसारित्वेदेहाद्यपेक्षमीक्षितृत्वमुपपन्नंसंसारिणःयदप्युक्तंप्रधानस्यानेकात्मकत्वात्मृदादिवत्कारणत्वोपपत्तिर्नासंहतस्यब्रह्मणइति तत्प्रधानस्याशब्दत्वेनैवप्रत्युक्तं॥ ॥

प्रमात्रादिभेदश्चकार्यएवेतिविवेकः नन्वखंडस्वप्रकाशात्मनिकथमविवेकस्तत्राह दृश्यतेचेति वस्तुतोदेहादिभिन्नस्वप्रकाशस्यैवसतआत्मनोनरोहमितिभ्रमोदृष्टत्वाद्दुरपन्हवः सचमिथ्याबुध्यामीयतइतिमिथ्याबुद्धिमात्रेणभ्रांतिसिध्दाज्ञानेनकल्पितइतियावदर्थः यद्वोक्तमिथ्याबुध्दौलोकानुभवमाह दृश्यतेचेति इत्थंभावेतृतीयाभ्रांत्यात्मनादृश्यतइत्यर्थः पूर्वपूर्वभ्रांतिमात्रेणदृश्यतेनत्वप्रमयेतिवार्थः॥ ७२

कूटस्थस्यापिमायिकंकारणत्वंयुक्तमित्याह यथात्विति यत्ववेद्येशब्दशक्तिग्रहायोगइतितत्र सत्यादिपदानामबाधितार्थेषुलोकावगतशक्तिकानांवाच्यैकदेशत्वेनोपस्थितारवंडब्रह्मलक्षकत्वादितिस्थितं संप्रत्युत्तरसूत्रनिवर्त्यांशंकामाह अत्राहेति अन्यथाप्यचेतनत्वेपि ननुप्रधानस्य

यथाचतर्केणापिब्रह्मणएवकारणत्वंनिर्वोढुंशक्यतेनप्रधानादीनांतथाप्रपंचयिष्यतितनविलक्षणत्वादस्येत्ये वमादिनाअत्राह यदुक्तंनाचेतनंप्रधानंजगत्कारणमीक्षितृत्वश्रवणादितितदन्यथाप्युपपद्यते अचेतनेपि चेतनवदुपचारदर्शनात् प्रत्यासंनपतनतांकूलस्यालक्ष्यकूलंपिपतिष तीत्यचेतनेपिकूलेचेतनवदुपचारोदृ ष्टस्तद्वदचेतनेपिप्रधानेप्रत्यासन्नसर्गेचेतनवदुपचारोभाविष्यति तदैक्षतेति यथालोकेकश्चि च्चेतनः स्नात्वा भुक्त्वाचापरान्हे ग्रामंरथेनगमीष्यामीतीक्षित्वानंतरंतथैवनियमेनप्रवर्ततेतथाप्रधानमपिमहदाद्याकारे णनियमेनप्रवर्तते तस्माच्चेतनवदुपचर्यते कस्मात्पुनः कारणाद्विहायमुख्यमीक्षितृत्वमौपचारिकंकल्पते तत्तेजऐक्षत ताआपऐक्षंतेति चाचेतनयोरप्यपतेजसोश्चेतनदुपचारदर्शनात् तस्मात्सत्कर्तृकमपीक्षणमौप चारिकमितिगम्यतेउपचारप्रायेवचनादित्येवंप्राप्तेइदंसूत्रमारभ्यते गौणश्चेन्नात्मशब्दात्॥ ॥

चेतनेनकिंसाम्यंयेनगौणमीक्षणमितितत्राह यथेतिनियतक्रमवत्कार्यकारित्वंसाम्यमित्यर्थः उपचारप्रायेवचनादिति गौणार्थप्रचुरेप्रकरणेस माम्नानादित्यर्थः॥

अप्तेजसोरिवाचेतनेसतिगौणईक्षतिरितिचेतनात्मशब्दात्सतश्चेतनत्वनिश्चयादितिसूत्रार्थमाह यदुक्तमित्यादिना साधकृतासच्छब्दवाच्या
इयमीक्षत्रीदेवतापरोक्षाहंतइदानींभूतसृष्ट्यनंतरंइमाःसृष्टाःतिस्रःस्तेजोबन्नरूपाः परोक्षत्वाद्देवताइतिद्वितीयाबहुवचनं अनेनपूर्वक

यदुक्तंप्रधानमचेतनंसच्छब्दवाच्यंतस्मिन्नौपचारिकेक्षतिरप्तेजसोरिवेति नतदसत्कस्मादात्मशब्दात्सदेवसोम्येद
मग्रआसीदित्युपक्रम्यतदैक्षततत्तेजोसृजतेतितेजोबन्नानांसृष्टिमुक्त्वातदेवप्रकृतंसदीक्षितृत्वानिचतेजोबन्ना
निदेवताशब्देनपरामृश्याह सेयंदेवतैक्षतहंताहमिमास्तिस्रोदेवताअनेनजीवेनात्मनानुप्रविश्यनामरूपेव्याक
रवाणीतितत्रयदिप्रधानमचेतनंगुणवृत्त्येक्षितृकल्प्येततदेवप्रकृतत्वात्सेयंदेवतेतिपरामृश्येततन्नतदादेवता
जीवमात्मशब्देनाभिदध्यात्जीवोहिनामचेतनःशरीराध्यक्षःप्राणानांधारयितप्रसिद्धेःनिर्वचनाच्चसक-
थमचेतनस्यप्रधानस्यआत्माभवेदात्माहिनामस्वरूपंनाचेतनस्यप्रधानस्यचेतनोजीवःस्वरूपंभवितुमर्ह
ति अथतुचेतनंब्रह्ममुख्यमीक्षितृपरिगृह्यतेतस्यजीवविषयआत्मशब्दप्रयोगउपपद्यते॥ ॥

त्मानुभूतेनजीवेनात्मनाममस्वरूपेणताअनुप्रविश्यतासांभोग्यत्वायनामचरूपंचस्फुटंकरिष्यामीत्यैक्षतेत्यन्वयःलौकिकप्रसिद्धेर्जीवप्रा ७४
णधारणइतिधातोर्जीवतिप्राणान्धारयतीतिनिर्वचनाच्चेत्यर्थः अथत्वितिस्वपक्षेतुबिंबप्रतिबिंबयोर्लोकेभेदस्यकल्पितत्वदर्शनाज्जीवो
ब्रह्मणःसतआत्मेतियुक्तमित्यर्थः॥ ॥

जीवस्यसच्छब्दार्थत्वेप्यात्मशब्दात्सन्नप्रधानमित्युक्त्वासतोजीवत्वेप्यात्मशब्दान्नप्रधानमितिविभागांतरेणहेतुंव्याचष्टेतथेतिसयःसदाख्यएषोणिमापरमसूक्ष्मःएतदात्म्यकमिदंसर्वंजगत्तत्सदेवसत्यंविकारस्यमिथ्यात्वात्सत्पदार्थःसर्वस्यात्माहेश्वेतकेतोत्वंचनासिसंसारीकिंतुतदेवसदबाधितंसर्वात्मकंब्रह्मास्मीतिश्रुत्यर्थःइत्यत्रोपदिशति अतश्चेतनात्मकत्वात्सच्चेतनमेवेतिवाक्यशेषःयदुक्तमप्तेजसोरिवसतईक्षणंगौणमिति

तथा सयएषोणिमैतदात्म्यमिदंसर्वंतत्सत्यंसआत्मातत्त्वमसिश्वेतकेतोइत्यत्रसआत्मेतिप्रकृतंसदणिमानमात्मानमात्मशब्देनोपदिश्यतत्त्वमसिश्वेतकेतोइतिचेतनस्यश्वेतकेतोरात्मत्वेनोपदिशति।अप्तेजसोस्तु विषयत्वात् अचेतनत्वंनामरूपव्याकरणादौचप्रयोज्यत्वेनैवनिर्देशात् नचात्मशब्दवत्किंचिन्मुख्यत्वेकारणमस्तीत्युक्तंकूलवद्गौणत्वमीक्षितृत्वस्यतयोरपिचसदधिष्ठितत्वापेक्षमेवेक्षितृत्वं॥ सतस्त्वात्मशब्दान्नगौणमीक्षितृत्वमित्युक्तं अथोच्येतान्चेतनेपिप्रधाने भवत्यात्मशब्दः आत्मनःसर्वार्थकारित्वात् यथाराज्ञःसर्वार्थकारिणि भृत्येभवत्यात्मशब्दोममात्माभद्रसेनइतिप्रधानं

तत्राह अप्तेजसोस्त्वितिनामरूपयोर्व्याकरणंसृष्टिःआदिपदान्नियमनंअप्तेजसोर्हिविषयत्वात्सृज्य त्वान्नियम्यत्वाच्चाचेतनत्वमीक्षणस्यमुख्यत्वेबाधकमस्तिसाधकंचनास्तीतिहेतोर्युक्तमीक्षणस्यगौणत्वमितियोजनाचेतनवत्कार्यकारित्वंगुणःतेजऐक्षत चेतनवत्कार्यंकारीत्यर्थः यद्वातेजःपदेनतदधिष्ठानंसल्लक्ष्यते तथाचमुख्यमीक्षणमित्याह। तयोरिति॥ ॥ ॥

स्यादेतत् यदिसतईक्षणंमुख्यंस्यात्तदेवकुतइत्यतआह सतीस्त्विति गौणमुख्ययोरतुल्ययोः संशयाभावेनगौणप्रायपाठस्यानिश्चायक
त्वादात्मशब्दाच्चसतईक्षणंमुख्यमित्यर्थः आत्महितकारित्वगुणयोगादात्मशब्दोपिप्रधानेगौणइतिशंकते अथेत्यादिना आत्मशब्दः प्र-

हिपुरुषस्यात्मनोभोगापवर्गौकुर्वदुपकरोतिराज्ञइवभृत्यः संधिविग्रहादिषुवर्तमानोथवैकएवा
त्मशब्दश्चेतनाचेतनविषयोभविष्यतिभूतात्मेंद्रियात्मेतिचप्रयोगदर्शनात् यथैकएवज्योतिः शब्दः
क्रतुज्वलनविषयः तत्रकुतएतदात्मशब्दादीक्षतेरगौणत्वंइत्यतउत्तरंपठति तन्निष्ठस्यमोक्षोपदे
शात्॥ ॥नप्रधानमचेतनमात्मशब्दालंबनंभवितुमर्हतिसआत्मेतिप्रकृतंसदणिमानमादायतत्-
त्वमसिश्वेतकेतोइतिचेतनस्यमोक्षयितव्यस्यतन्निष्ठतामुपदिश्याचार्यवान्पुरुषोवेद तस्यतावदे
वचिरंयावन्नविमोक्षेअथसंपत्स्यइतिमोक्षोपदेशात् यदिह्यचेतनंसच्छब्दवाच्यंतदसीतिग्राहयेत् मुमुक्षुं
चेतनंसंतमचेतनोसीतितदाविपरीतवादिशास्त्रंपुरुषस्यानर्थायेत्यप्रमाणंस्यात् नतुनिर्दोषंशास्त्रंअप्रमा

धानेपिमुख्योनानार्थकत्वादित्याह अथचेतिनानार्थकत्वेदृष्टांतः यथेति अथैषज्योतिरितिश्रुत्यासहस्रदक्षिणाकेक्रतौज्योतिष्टोमेलोकप्र ७५
योगादग्नौचज्योतिःशब्दोयथामुख्यस्तद्वदित्यर्थः तस्मिन्सत्पदार्थेनिष्ठा अभेदज्ञानंयस्यसतन्निष्ठस्तस्यमुक्तिश्रवणादितिसूत्रार्थमाहनेत्या
दिनाश्रुतिःसमन्वयसूत्रेव्याख्याता॥

अनर्थायेत्युक्तं प्रपंचयति यद्विद्वाज्ञस्येति कश्चित्किलदुष्टात्मामहारण्यमार्गे पतितमंधंस्वबंधुनगरंजिगमिषुंवभाषे किमत्राप्रुषता दुःखितेन-
स्थीयतइतिसचांधः सुखांवाणीकमाकर्ण्यतमाप्तंमत्वोवाच अहोमन्दाग्धेयंयदत्रभवान् मांदीनंस्वाभीष्टनगरप्रास्यसमर्थं भाषतइति स-
चविप्रलिप्सुर्दुष्टगोयुवानमानीयतदीयलांगूलं अंधंग्राहयामास उपदिदेशच एनमंधंएषगोपवात्त्वांनगरं नेष्यतिमात्यजलांगूलमिति
सचांधः श्रद्धालुतयावदत्यजन्स्वाभीष्टमप्राप्यानर्थपरंपरांप्राप्तः तेनन्यायेनेत्यर्थः तथासतीति आत्मज्ञानाभावेसतिविहन्येतमोक्षंन

यद्विद्वाज्ञस्यसतोमुमुक्षोरचेतनमनात्मानमात्मेत्युपदिशेत् प्रमाणभूतंशास्त्रंसःश्रद्दधानतयांधगोलांगू
लन्यायेनतदात्मदृष्टिंनपरित्यजेत् तद्यतिरिक्तंचात्मानंनप्रतिपद्येत तथासतिपुरुषार्थाद्विहन्येतानर्थंचऋच्छे
त् तस्माद्यथास्वर्गाद्यर्थिनोग्निहोत्रादिसाधनंयथाभूतमुपदिशति तथामुमुक्षोरपिसआत्मातत्त्वमसिश्वेत
केतो इति यथा भूतमेवात्मानमुपदिशतीतियुक्तं एवंचसतितप्तपरशुग्रहणमोक्षदृष्टांतेनसत्याभिसंधस्यमोक्षो

प्राप्नुयात् प्रत्युतानर्थंसंसारंचप्राप्नुयादित्यर्थः ननुजीवस्यप्रधानैक्यसंपदुपासनार्थमिदंवाक्यमस्त्वितितत्राह एवंचसतीति अबाधिता
त्यप्रमाणांसत्यामित्यर्थः कस्यचिदारोपितचोरत्वस्यसत्येनतप्तंपरशुंगृण्हातोमोक्षोदृष्टः तद्दृष्टांतेनसत्यैब्रह्मणिअहमित्यभिसंधिमतः
मोक्षोयथासत्याभिसंधः तप्तपरशुंगृण्हातिसनदह्यतेथमुच्यतइतिश्रुत्योपदिष्टः॥ ॥ ॥

उपदेशः संपत्यक्षेन यक्त इत्याह अन्यथेति देहमुत्थापयतीत्युक्तं प्राणस्तस्मान्मोक्षोपदेशान्मुख्ये संभवति गौणत्वस्यान्याय्यत्वान्नात्मश ब्दः सति ब्रह्मणि मुख्य इत्याह अपिचेति क्वचिन्महत्यादौ सर्वत्राह् मात्मेत्यत्रापि मुख्य आत्मशब्दो न स्यादित्यर्थः चेतनत्वोपचारात् भूतादि षु सर्वत्र चैतन्यतादात्म्यादित्यर्थः आत्मशब्दश्चेतनस्यैवासाधारण इत्युक्तं अस्तु वाच्यापि वस्तूनां साधारणः तथापि तस्यात्र श्रुतौ प्रधान

पदेश उपपद्यते॥ अन्यथा हि अमुख्ये सदात्मतत्त्वोपदेशे हं कथमस्मीति विद्यादिति वत्संपन्मात्रमिदमनित्यफलं स्यात् तत्र मो क्षोपदेशो नोपपद्यते तस्मान्न सदणिमन्यात्मशब्दस्य गौणत्वं भृत्ये तु स्वामिभृत्यभेदस्य प्रत्यक्षत्वादुपपन्नो गौण आत्मशब्दो म मात्मा भद्रसेन इति अपि च क्वचिद्गौणः शब्दो दृष्ट इति नैतावता शब्दप्रमाणकेऽर्थे गौणी कल्पना न्याय्या सर्वत्रानाश्वासप्रसंगात् यत्तूक्तं चेतनाचेतनयोः साधारण आत्मशब्दः क्रतुज्वलनयोरिव ज्योतिःशब्द इति तन्न अनेकार्थत्वस्यान्याय्यत्वात् तस्माच्चेतनविषय एव मुख्य आत्मशब्दश्चेतनत्वोपचाराद्भूतादिषु प्रयुज्यते भूतात्मेंद्रियात्मेति च साधारणत्वेप्यात्मशब्दस्य न प्रकरणमुपपदं वा किंचिन्निश्चा यकमंतरेणान्यतरवृत्तिता निर्धारयितुं शक्यते न चात्राचेतनस्य निश्चायकं किंचित्कारणमस्ति प्रकृतं तु सदीक्षितृ संनिहितश्चेतनः

परत्वेपि निश्चायकाभावान्न प्रधानवृत्तितेत्याह साधारणत्वेपीति चेतनवाचित्वे तु प्रकरणं श्वेतकेतुपदं च निश्चायकमस्तीत्याह प्रकृतं त्विति १६

उपपदस्य निश्चायकत्वं स्फुटयति न हीति॥ ॥ ॥ ॥ ॥

ततः किंतत्राह तस्मादिति आत्मशब्दोज्योतिः शब्दवन्नानार्थकइत्युक्तंदृष्टांतंनिरस्यति ज्योतिरिति कथंतर्हिज्योतिषायजेतेतिज्योतिष्टोमेप्रयोग
स्तत्राह अर्थवादेति एतानिवावतानिज्योतीॅषियएतस्यस्तोमाइत्यर्थवादेनकल्पितंज्वलनेनसादृश्यंत्रिवृत्संचदशस्त्रिवृत्सप्तदशस्त्रिवृदेकवि
ॅशाः स्तोमास्त दर्थप्रकाशकत्वेनगुणेनज्योतिः यदोक्ताऋक्संघाः तथाचज्योतींषिस्तोमाअस्येतिज्योतिष्टोमइत्यत्रज्योतिः शब्दोगौणइत्यर्थः
नन्वात्मशब्दादितिपूर्वसूत्रएवात्मशब्दस्यप्रधानेगौणत्वसाधारणत्वशंकानिरासः कर्तुमुचितः मुख्यार्थस्यलाघवेनोक्तिसंभवेगौणत्वनाना

श्वेतकेतुर्नहिचेतनस्य श्वेतकेतोरचेतनआत्मासंभवतीत्यवोचाम॥ तस्माच्चेतनविषयइहात्मशब्दइतिनिश्चीयते
ज्योतिःशब्दोपिलौकिकेनप्रयोगेणज्वलनएवरूढोर्थवादकल्पितेनतुज्वलनसादृश्येनक्रतौप्रवृत्तइत्यदृष्टांतः अ
थवापूर्वसूत्रएवात्मशब्दंनिरस्तसमस्तगौणसाधारणत्वशंकतयाव्याख्यायततः स्वतंत्रएवप्रधानकारणनिराक-
रणहेतुर्व्याख्येयः तन्निष्ठस्यमोक्षोपदेशादितितस्मान्नाचेतनंप्रधानंसच्छब्दवाच्यम्॥ ॥ ॥

र्थकत्वशंकायादुर्बलत्वेनतन्निरासार्थं पृथक्सूत्रायासानपेक्षणात् तथाचशंकोत्तरत्वेनसूत्रव्याख्यानंनातीवशोभनं इत्यरुचेराह अथवेति
निरस्तासमस्तागौणत्वनानार्थत्व शंकायस्यात्मशब्दस्यस तच्छंकस्तस्यभावस्तत्तातयाइत्यर्थः तत इति सतः आत्मशब्देनजीवाभिन्नत्वादि
तिहेत्वपेक्षयामोक्षोपदेशः स्वतंत्रएवप्रधानकारणत्वनिरासेहेतुरित्यर्थः॥ ॥ ॥

ननुयथाकश्चिदरुंधतींदर्शयितुंनिकटस्थांस्थूलांतारांअरुंधतीत्वेनोपदिशति तद्वदनात्मनएवप्रधानस्यसत्पदार्थस्यात्मत्वोपदेशइतिशंकते
कुतश्चेतिप्रधानंसच्छब्दवाच्यंनेतिकुतइत्यर्थः सौत्रश्चकारोनुक्तसमुच्चयार्थइत्याह चशब्दइतिविवृणोतिसत्यपीति अपिशब्दान्नास्त्ये
तिसूचयति वेदानधीत्यागतं स्तब्धंपितोवाच हेपुत्रउतअपिआदिश्यतइत्यादेशः उपदेशैकलभ्यः सदात्मातमप्राक्ष्यः गुरुनिकटेपृष्टवा

कुतश्चनप्रधानंसच्छब्दवाच्यं हेयत्वावचनाच्च यदिअनात्मैवप्रधानंसच्छब्दवाच्यंसआत्मातत्त्वमसीतिइहोपदिष्टंस्या
त्सतदुपदेशश्रवणादनात्मज्ञतयातन्निष्ठोमाभूदितिमुख्यमात्मानमुपदिदिक्षुःशास्त्रंतस्यहेयत्वंब्रूयात् यथारुंधतींदर्शयितुः
तत्समीपस्थांस्थूलांताराममुख्यांप्रथमपमरुंधतीतिग्राहयित्वातांप्रत्याख्यायपश्चादरुंधतीमेवग्राहयतितद्वन्नायमात्मेतिब्रूया
त् नत्वेवमवोचत् सन्मात्रात्मावगतिनिष्ठैवहिषष्ठप्रपाठकपरिसमाप्तिर्दृश्यतेचशब्दःप्रतिज्ञाविरोधाभ्युच्चयप्रदर्शनार्थःसत्य
पिहेयत्ववचनेप्रतिज्ञाविरोधःप्रसज्येतकारणविज्ञानाद्धिसर्वंविज्ञातमितिप्रतिज्ञातमुततमादेशमप्राक्ष्योयेनाश्रुतंश्रुतंभ
वति अमतंमतंअविज्ञातंविज्ञातमितिकथंनुभगवःसआदेशोभवतीतियथासोम्यैकेनमृत्पिंडेनसर्वंमृन्मयंविज्ञातंस्यात्॥

नसियस्यश्रवणेनमननेनविज्ञानेनान्यस्यश्रवणादिकंभवतीत्यन्वयः नन्वन्येनज्ञातेनकथमन्यदज्ञातमपिज्ञातंस्यादितिपुत्रः शंकतेकथ
मितिहेभगवः कथंनुखलुसभवतीत्यर्थः कार्यस्यकारणान्यत्वंनास्तीत्याह यथेति पिंडस्वरूपंतेनविज्ञातेनेतिशेषः॥ ॥

तत्रयुक्तिमाह। वाचेति। वाचावागिंद्रियेणारभ्यतइतिविकारोवाचारंभणं ननुवाचानामैवारभ्यतेनघटादिरित्याशंक्यनाममात्रंविकारइत्याह। नामधेयमिति। नामधेयंविकारोयंवाचाकेवलमुच्यते वस्तुतः कारणाद्भिन्नोनास्तितस्मान्मृषैवसइतिभावः। विकारमिथ्यात्वेनतदभिन्नकारणस्यापि मिथ्यात्वमितिनेत्याह। मृत्तिकेति। कारणंकार्याद्भिन्नसत्ताकंनकार्यंकारणाद्भिन्नं अतःकारणातिरिक्तस्यकार्यस्वरूपस्याभावात्कारणज्ञाने तद्भिन्नंभवतीतिस्थितेदार्ष्टांतिकमाह। एवमिति। मृद्वद्ब्रह्मैवसत्यंवियदादिविकारोमृषेति। ब्रह्मज्ञानेसतिज्ञेयंकिंचिन्नावशिष्यतेत्यर्थः यथ

वाचारंभणंविकारोनामधेयंमृत्तिकेत्येवसत्यमेवंसोम्यसआदेशोभवतीतिवाक्योपक्रमेश्रवणात्। नचसच्छब्दवाच्येप्रधाने भोग्यवर्गकारणेहेयत्वेनाहेयत्वेनवाविज्ञातेभोक्तृवर्गोविज्ञातोभवति। अप्रधानविकारत्वात्भोक्तृवर्गस्य। तस्मान्नप्रधानंस-च्छब्दवाच्यं। कुतश्चनप्रधानंसच्छब्दवाच्यं। स्वाप्ययात्। तदेवसच्छब्दवाच्यंकारणंप्रकृत्यश्रूयते। यत्रैतत्पुरुषःस्वपितिनामसता सोम्यतदासंपन्नोभवतिस्वमपीतोभवति। तस्मादेनंस्वपितीत्याचक्षतेस्वंह्यपीतोभवतीति॥ एषाश्रुतिः स्वपितीत्येतत्पुरुष

विप्रधानेज्ञातेनादस्याद्विकाराणांज्ञानंभवतिनपुरुषाणांतेषांप्रधानविकारत्वाभावादित्याह। नचेति। अस्माकंतुजीवानांसद्रूपत्वात्तज्ज्ञानेज्ञानमि-तिभावः। कुतश्चेति। पुनरपिकस्माद्धेतोरित्यर्थः। स्वपुसोजीवस्यसदात्मनि स्वस्मिन्नप्ययश्रवणात्सच्चेतनमेवेतिसूत्रयोजना। एतत्स्वपनंयथा स्यात्तथायत्रस्वसोस्वपितीतिनामभवतितदापुरुषःसतासंपन्नएकीभवति। सदैक्येपिनामप्रवृत्तिः कथंतत्राह स्वपितितत्रलोकप्रसिद्धमाह। त स्मादिति। हियस्मात्स्वंसदात्मानमपीतोभवतितस्मादित्यर्थः

शा०भा० श्रुतेस्तात्पर्यमाह एषेत्यादिना एतेर्धातोर्गत्यर्थस्यापिपूर्वस्यलयार्थत्वेपिकथंनित्यस्यजीवस्यलयइत्याशंक्यउपाधिलयादितिवक्तुंजाग्रत्स्वप्नयोरुपा अ०१
७८ धिमाह। मनइति। ऐंद्रियकमनोवृत्तयउपाधयःतैर्घटादिस्थूलार्थविशेषाणांआत्मनासंबंधादात्मातानिंद्रियार्थान्पश्यन्स्थूलविशेषेणदेहेनैक्य भ्रांतिमापन्नोविश्वसंज्ञोजागर्तिजाग्रद्वासनाश्रयमनोविशिष्टःसंतैजससंज्ञःस्वप्नेविचित्रवासनासहकृतमायापरिणामान्पश्यन्सोम्यतन्मनइतिश्रु

स्यलोकप्रसिध्दंनामनिर्वक्तिस्वशब्देनेहात्मोच्यतेयःप्रकृतःसच्छब्दवाच्यस्तमपीतोभवत्यपिगतोभवतीत्यर्थःअपिपूर्वस्यैतेर्लयार्थत्वं प्रसिध्दंप्रभवाप्ययावित्यत्रसृष्टिप्रलययोःप्रयोगदर्शनात्मनःप्रचारोपाधिविशेषसंबंधादिंद्रियार्थान्गृण्हंस्तद्विशेषापन्नोजीवोजा गर्तितद्वासनाविशिष्टःस्वप्नान्पश्यन्मनःशब्दवाच्योभवतिसउपाधिद्वयोपरमेसुषुप्तावस्थायांउपाधिकृतविशेषाभावात्स्वात्मनिप्र लीनइवेतिस्वंह्यपीतोभवतीत्युच्यते। यथात्हृदयशब्दनिर्वचनंश्रुत्यादर्शितं। सवाएषआत्माहृदितस्यैतदेवनिरुक्तंहृदयमिति त स्माहृदयमिति यथावाशनायोदन्यशब्दप्रवृत्तिमूलंदर्शयतिश्रुतिः। आपएवतदशितंनयंतेतेज एवतत्पीतंनयतइतिच एवंस्वमात्मा नंसच्छब्दवाच्यमपीतोभवतीतीममर्थंस्वपितिनामनिर्वचनेनदर्शयति नचचेतनआत्माचेतनंप्रधानंस्वरूपत्वेनप्रतिपद्यते॥

तिरुद्धमनःशब्दवाच्योभवति सआत्मास्थूलसूक्ष्मोपाधिद्वयोपरमेहंनरःकर्तेतिविशेषाभिमानाभावात्लीनउपचर्यतइत्यर्थः ननुस्वपितीतिनामनिरुक्तेर- ७८
र्थवादत्वान्नयथार्थतेत्यतआह यथेति तस्यहृदयशब्दस्यैतन्निर्वचनंतदशितमन्नंद्रवीकृत्यनयंतेजरयंतीत्यापएवाशनायापदार्थःतत्पीतंउदकंनयतेशोषय- तीतितेजएवौदन्यंअत्रदीर्घश्छांदसःएवमिदमपिनिर्वचनंयथार्थमित्याह॥

एवमपिनिरुद्दंचप्रधानपक्षेनफलमित्याह।नचेति।स्वशब्दस्यात्मनी वात्मीयेपिशक्तिरस्तीत्याशंक्याह।यदिति।प्राज्ञेनबिंबचैतन्येनेश्वरेणसंपरिष्वंगो भेदप्रभाभावेनाभेदइत्यर्थः तत्तद्वेदांतजन्यानामवगतीनांचेतनकारणविषयकत्वेनसामान्यान्नाचेतनंजगतःकारणमितिसूत्रार्थंव्यतिरेकमुखे नाह।यदितार्किकेत्यादिना।अन्यत्परमाएवादिकं।नत्वेतदिति।अवगतिवैषम्यमित्यर्थः विप्रतिषेधेरन् विविधंनानादिशःप्रतिगच्छेयुःप्राणाश्चक्षुरा

यदिपुनःप्रधानमेवात्मीयत्वात्स्वशब्देनैवोच्येतैवमपिचेतनोचेतनमप्येतीतिविरुद्धमापद्येत श्रुत्यंतरंचप्राज्ञेनात्मनासंपरिष्वक्तोनबाह्यंकिंचनवेदनांतरमिति सुषुप्तावस्थायांचेतनेप्ययंदर्शयत्यतोयस्मिन्नप्ययःसर्वेषांचेतनानांतच्चेतनंसच्छब्दवाच्यं जगतःकारणंनप्रधानंकुतश्चनप्रधानंजगतःकारणं॥ ॥गतिसामान्यात्।यदितार्किकसमयेइववेदांतेष्वपिभिन्नाकारणावगतिरभविष्यत् क्वचिच्चेतनंब्रह्मजगतःकारणंक्वचिदचेतनंप्रधानंक्वचिदन्यदेवेति ततःकदाचित्प्रधानकारणवादानुरोधेनापीक्षत्यादिश्रवणमकल्पयिष्यत् नत्वेतदस्ति समानैवहिसर्वेषुवेदांतेषुचेतनकारणावगतिः यथाग्नेर्ज्वलतःसर्वादिशोविस्फुलिंगाविप्रतिष्ठेरन् एवमेवैतस्मादात्मनःसर्वेप्राणायथायतनंविप्रतिष्ठंते प्राणेभ्योदेवादेवेभ्योलोकाइति।तस्माद्वाएतस्मादात्मन

दयोयथागोलकंप्रादुर्भवंतिप्राणेभ्योनंतरंदेवाःसूर्यादयस्तदनुग्राहकाःतदनंतरंलोक्यंतइतिलोकाःविषयाइत्यर्थः ननुवेदांतानांस्वतःप्रामाण्येनप्रत्येकंस्वार्थनिश्चायकत्वसंभवात्किंगतिसामान्येनेत्यतआह महच्चेति॥ एकरूपावगतिहेतुत्वंवेदांतानांप्रामाण्यसंशयनिवृत्तिहेतुरित्यत्रदृष्टांत-

माह। चक्षुरिति। यथासर्वेषांचक्षुषांएकरूपावगतिहेतुत्वंश्रवणानांशब्दावगतिहेतुत्वंघ्राणादीनांगंधादिषुएवंब्रह्मणिवेदानांगतिसामान्यंप्रामा-
ण्य दार्ढ्यहेतुरित्यर्थः एवमीक्षत्यादिलिंगैरचेतनेवेदांतानांसमन्वयंनिरस्यचेतनवाचकशब्देनापिनिरस्यति श्रुतत्वाच्चेतिसूत्रंव्याचष्टे॥ स्वशब्देने

आकाशः संभूतइति। आत्मनएवेदंसर्वमिति। आत्मनएषप्राणोजायतइतिचात्मनः कारणत्वंदर्शयंति सर्वे वेदांताःआत्मशब्दश्चचेतनवचनइत्यवोचाम महच्चप्रामाण्यकारणमेतद्यद्वेदांतवाक्यानांचेतनकारणत्वेस मान गतित्वं॥ चक्षुरादीनामिवरूपादिषुतोगतिसामान्यात्सर्वज्ञंब्रह्मजगतः कारणंकुतश्चसर्वज्ञंब्रह्मजग तः कारणं। श्रुतत्वाच्च। स्वशब्देनैवसर्वज्ञईश्वरोजगतः कारणमितिश्रूयते श्वेताश्वतराणांमंत्रोपनिषदिसर्वज्ञ मीश्वरंप्रकृत्यसकारणम् करणाधिपाधिपोनचास्यकश्चिज्जनितानचाधिपइति तस्मात्सर्वज्ञंब्रह्मजगतः का- रणंनाचेतनंप्रधानमन्यद्वाइतिसिध्दं॥

ति स्वस्यचेतनस्यवाचकः सर्वविच्छब्दः ज्ञः कालकालोगुणीसर्वविद्यइतिसर्वज्ञंपरमे
श्वरंप्रकृत्यससर्ववित् कारणमितिश्रुतत्वान्नाचेतनंकारणमितिसूत्रार्थः करणाधिपाजीवास्तेषामधिपः। अधिकरणार्थमुपसंहरति। तस्मा-
दिति। ईक्षणात्मशब्दादिकंपरमाण्वादावप्ययुक्तमितिमत्वाह। अन्यद्वेति॥

वृत्तानुवादेनोत्तरसूत्रसंदर्भमाक्षिपति। जन्मादीति। प्रथमसूत्रस्यशास्त्रोपोद्घातत्वाज्जन्मादिसूत्रमारभ्येत्युक्तं सर्ववेदांतानांकार्येप्रधानाद्यचेतने चसमन्वयनिरासेनब्रह्मपरत्वंव्याख्यातं अतःप्रथमाध्यायार्थस्यसमाप्तत्वादुत्तरग्रंथारंभेकिंकारणमित्यर्थः वेदांतेषुसगुणनिर्गुणब्रह्मवाक्यानां बहुलमुपलब्धेः तत्रकस्यवाक्यस्यसगुणोपासनाविधिद्वारानिर्गुणेसमन्वयः कस्यवागुणविवक्षांविनासाक्षादेवब्रह्मणिसमन्वयइत्याकांक्षेव

जन्माद्यस्ययतइत्यारभ्यश्रुतत्वाच्चेवमंतैः सूत्रैर्यान्युदाहृतानिवेदांतवाक्यानितेषांसर्वज्ञः सर्वशक्ति रीश्वरोजगतोजन्मस्थितिलयकारणमित्येतस्यार्थस्यप्रतिपादकत्वंन्यायपूर्वकंप्रतिपादितं गतिसा मान्योपन्यासेनचसर्वेवेदांताश्चेतनकारणवादिनइतिव्याख्यातमतःपरस्यग्रंथस्याकिमुत्थानमिति उच्यते द्विरूपंहिब्रह्मावगम्यते नामरूपविकारभेदोपाधिविशिष्टंतद्विपरीतंचसर्वोपाधिविवर्जितं

कारणमित्याह। उच्यतइति। संक्षिप्यसगुणनिर्गुणवाक्यार्थमाह। द्विरूपंहीति। नामरूपात्मकोविकारः सर्वंजगत् तद्भेदोहिरण्यश्मश्रुत्वादि विशेषइतिवाक्यार्थः॥

वाक्यान्युदाहरति। यत्रहीत्यादिना। यस्यांखल्वज्ञानावस्थायांद्वैतमिवकल्पितंभवतितत्तदेतरः संनितरंपश्यतीति दृश्योपाधिकंवस्तुभाति
। यत्रज्ञानकालेविदुषःसर्वंजगदात्ममात्रमभूत्तदातुकेनकंपश्येदित्याक्षेपान्निरुपाधिकंतत्त्वंभातियत्रभूम्निस्थितोविद्वान्द्वितीयंकिमपिन
वेत्तिसोद्वितीयोभूमापरमात्मानिर्गुणः अथनिर्गुणोक्त्यनंतरंसगुणमुच्यते यत्रसगुणेस्थितः द्वितीयंवेत्तितदल्पंपरिछिन्नंयस्तुभूमातदमृतं
नित्यंअथेति पूर्ववद्व्याख्येयंधीरःपरमात्मैवसर्वाणिरूपाणिविचित्यसृष्ट्वानामानिचकृत्वाबुध्यादौप्रविश्यजीवसंज्ञोव्यवहरन्योवर्ततेसगुण

यत्रहिद्वैतमिवभवतितदितरइतरंपश्यतियत्रत्वस्यसर्वमात्मैवाभूत्तत्केनकंपश्येत् यत्रनान्यत्पश्यतिनान्यच्छृणो
तिनान्यद्विजानातिसभूमाअधयत्रान्यत्पश्यत्यन्यच्छृणोतिअन्यद्विजानाति तदल्पं योवैभूमातदमृतमथ यद
ल्पंतन्मर्त्यंसर्वाणिरूपाणिविचित्यधीरोनामानिकृत्वाभिवदन्यदास्ते निष्कलंनिष्क्रियंशांतंनिरवद्यंनिरंजनंअमृ
तस्यपरंसेतुंदग्धेंधनमिवानलं नेतिनेतीत्यस्थूलमनणु॥ ७॥ स्तंनिर्गुणत्वेनविद्वानप्यमृतोभवति निर्गताःकलाअंशाय-
स्मात्तंनिष्कलंअतोनिरंशत्वान्निष्क्रियं अतःशांतमपरिणामिनिरवद्यंरागादिदोषशून्यं अंजनंमूलतमः संबंधोधर्मादिकंवातच्छून्यंनिरंजनंकिं
चामृतस्यमोक्षस्यस्वयमेववाक्योत्पन्नप्तिस्थत्वेन परमुत्कृष्टंसेतुंलौकिकसेतुवत्प्रापकंयथादग्धेंधनोनलः शाम्यतितमिवाविद्यात्तज्जंदग्ध्वा
प्रशांतंनिर्गुणमात्मानंविद्यादित्यर्थः॥ नेतिनेतीतिव्याख्यातंस्थूलादिद्वैतशून्यम्॥ ॥ ॥

रूपद्वयेश्रुतिमाह। न्यूनमिति। द्वैतस्थानंन्यूनं अल्पंसगुणरूपंनिर्गुणादन्यत् तथासंपूर्णंनिर्गुणंसगुणादन्यदित्यर्थः एकस्यद्विरूपत्वंविरुद्धमि त्यतआह। द्विधेतिविद्याविषयोज्ञेयंनिर्गुणंसत्यम् अविद्याविषयउपास्यंसगुणं कल्पितमित्यविरोधः। तत्राविद्याविषयंविवृणोति। तत्रेति। निर्गुणज्ञानार्थमारोपितप्रपंचमाश्रित्यबाधात्प्राक् काले गुडजिह्विकन्यायेनतत्फलार्थान्युपासनानिविधीयंतेतेषांचित्तैकाग्र्यद्वाराज्ञानंप्रत्यंफ

न्यूनमन्यत्स्थानंसंपूर्णमन्यदितिचैवंसहस्रशोविद्याविद्याविषयभेदेनब्रह्मणोद्विरूपतांदर्शयंति वाक्यानि। तत्राविद्यावस्थायांब्रह्मणउपास्योपासकादिलक्षणःसर्वोव्यवहारः। तत्रकानिचिद्ब्र ह्मणउपासनान्यभ्युदयार्थानिकानिचित्क्रममुक्त्यर्थानिकानिचित् कर्मसमृद्ध्यर्थानितेषांगुणवि शेषोपाधिभेदेन भेदः॥ एकएवपरमात्मेश्वरस्तैस्तैर्गुणविशेषैर्विशिष्टउपास्योयद्यपिभवतित-

लमितितद्वाक्यानामपिमहातात्पर्यं ब्रह्मणीतिमंतव्यंनामब्रह्मे त्याद्युपास्तीनांकामचारादिरभ्युदयः फलं दहराद्युपास्तीनांक्रममुक्तिःउद्गी थादिध्यानस्यकर्मसमृद्धिः फलमितिभेदः ध्यानानांमानसत्वात् ज्ञानांतरंगत्वाच्चज्ञानकांडेविधानमितिभावः ननूपास्यब्रह्मणएकत्वात्क- थमुपासनानांभेदस्तत्राह। तेषामिति। गुणविशेषाः सत्यकामत्वादयोल्पत्वादयादिरुपाधिः॥

अथस्वयमेवाशंक्यपरिहरति। एकइति। परमात्मस्वरूपाभेदेप्युपाधिभेदेनोपहितोपास्यरूपभेदादुपासनानांभेदेसति फलभेदइतिभावः तंपरमात्मानंयद्गुणत्वेनलोकाराजानमिवोपासतेतत्तद्गुणवत्वमेवतेषांफलंभवतिक्रतुः संकल्पोध्यानंइहयादृशध्यानवान्भवतिमृत्वातादृ-शोपास्यरूपोभवतितत्रैवभगवद्वाक्यमाह स्मृतेश्चेति ननुसर्वभूतेषुनिरतिशयात्मन एकत्वादुपास्योपासकयोस्तारतम्यश्रुतयः कथमित्याशं

थापियथागुणोपासनमेवफलानिभिद्यंते तंयथायथोपासतेतदेवभवतीतिश्रुतेः। यथाक्रतुरस्मिंल्लोके पुरुषोभवति तथेतः प्रेत्यभवतीतिच। स्मृतिश्च। यंयंवापिस्मरन्भावंत्यजत्यंतेकलेवरं तंतमेवैतिकौंतेय सदातद्भावभावितइति। यद्यप्येकआत्मासर्वभूतेषुस्थावरजंगमेषुगूढस्तथापिचित्तोपाधिविशेषतारतम्यात् आत्मनःकूटस्थनित्यस्यैकरूपस्याप्युत्तरोत्तरमाविष्कृतस्यतारतम्यमैश्वर्यशक्तिविशेषैः श्रूयतेतस्य यमात्मानमाविस्तरांवेदेत्यत्र॥

क्यपरिहरति। यद्यप्येकइति। चित्तानामुपाधीनांशुद्धितारतम्यादैश्वर्यज्ञानसुखस्वरूपशक्तीनांतार-तम्यरूपाविशेषाभवंतितैरेकरूपस्यात्मनउत्तरोत्तरंमनुष्यादिहिरण्यगर्भांतेष्वाविर्भावतारतम्यंश्रूयतेतस्यात्मनआत्मानंस्वरूपमाविस्तरांप्रकटतरं योवेदउपास्तेसोश्नुवेतदितितरप्रत्ययादित्यर्थः तथाचनिकृष्टोपाधिरात्मैवोपासकः उत्कृष्टोपाधिरीश्वरउपास्यइत्यौपाधिकंतारतम्यमविरुद्धमिति भावः॥ ८१

अत्रार्थेभगवद्गीतामुदाहरति। स्मृतावितिः। अत्रसूर्यादेरपिनजीवत्वेनोपास्यताकिंत्वीश्वरत्वेनेत्युक्तंभवति तत्रसूत्रकारसंमतिमाह। एवमिति। उदस्त
असंबंधः एवंयस्मिन्वाक्येउपाधिर्विवक्षितः तद्वाक्यमुपासनापरमितिवक्तुमुत्तरसूत्रसंदर्भस्यारंभइत्युक्त्वायत्रनविवक्षितः तद्वाक्यंज्ञेयब्र

स्मृतावपि यद्यद्विभूतिमत्सत्वंश्रीमदूर्जितमेववा तत्तदेवावगच्छत्वंममतेजोंशसंभवमिति। यत्रयत्रवि
भूत्याद्यतिशयःससईश्वरइत्युपास्यतयाचोद्यते। एवमिहापि आदित्यमंडलेहिरण्मयःपुरुषःसर्व-
पाप्मोद यल्लिंगात्परएवेतिवक्ष्यति। एवमाकाशस्तल्लिंगादित्यादिषुद्रष्टव्यं। एवंसद्योमुक्तिकारणमप्या
त्मज्ञानमुपाधिविशेषद्वारेणोपदिश्यमानमप्यविवक्षितोपाधिसंबंधविशेषंपरापरविषयत्वेनसंदिह्य
मानंवाक्यगतिपर्यालोचनयानिर्णेतव्यंभवति। यथेहैवतावदानंदमयोभ्यासादिति। एवमेकमपिब्रह्मा
पेक्षितोपाधिसंबंधंनिरस्तोपाधिसंबंधंचोपास्यत्वेनज्ञेयत्वेनचवेदांतेषुउपदिश्यतइतिप्रदर्शयितुंप-
रोग्रंथआरभ्यते॥

ह्मपरमितिनिर्णयार्थमारभ इत्याह। एवंसद्यइति। अन्नमयादिकोशाउपाधिविशेषाः वाक्यगतिस्तात्पर्यं।
आरंभसमर्थनमुपसंहरति। एवमेकमपीति॥ ॥ ॥

सिध्दवदुक्तगतिसामान्यस्यसाधनार्थमप्युत्तरारंभइत्याह। यच्चेति। अन्नंप्रसिध्दंप्राणमनोबुध्दयःहिरण्यगर्भरूपाः बिंबचैतन्यमीश्वरः
आनंदः तेषांपंचानांविकारा आध्यात्मिकादेहप्राणमनोबुध्दिजीवाअन्नमयादयः पंचकोशाइतिश्रुतेः। परमार्थः पूर्वाधिकरणेगौणमुख्ये
क्षणयोरतुल्यत्वेनसंशयाभावाद्गौणप्रायपाठेननिश्चायकइत्युक्तंतर्हिमयटोविकारेप्राचुर्येचमुख्यत्वात्संशयेविकारप्रायपाठादानंदविकारो

यच्चगतिसामान्यादित्यचेतनकारणनिराकरणमुक्तं। तदपिवाक्यांतराणिब्रह्मविषयाणिव्याचक्षाणेनब्रह्मविपरीतकारणनिषेधेनप्रपंच्यते। आनंदमयोभ्यासात्। तैत्तिरीयकेअन्नमयंप्राणमयंमनोमयंविज्ञानमयंचानुक्रम्याम्नायते तस्माद्वाएतस्माद्विज्ञानमयादन्योंतरआत्मानंदमयइति। तत्रसंशयःकिमिहआनंदमयशब्देनपरमेवब्रह्मोच्यते। यत्प्रकृतंसत्यंज्ञानमनंतंब्रह्मेति। किंवान्नमयादिवत् ब्रह्मणोर्थांतरमिति किंतावत्प्राप्तंब्रह्मणोर्थांतरममुख्यआत्मानंदमयः स्यात्कस्मादन्नमयाद्यमुख्यात्मप्रवाहपतितत्वात् अथापिस्यात्सर्वांतरत्वादानंदमयोमुख्यएवात्मेति नस्यात्प्रियाद्यवयवयोगात्शारीरत्वश्रवणाच्च ॥

जीवःआनंदमयइतिनिश्चयोस्तीतिप्रत्युदाहरणसंगत्यापूर्वपक्षमाह। कस्मादित्याकांक्षापूर्वकंअन्नमयादीतिश्रुत्यादिसंगतयःस्फुटाएवपूर्वपक्षेवृत्तिकारमतेजीवोपास्त्याप्रियादिप्राप्तिःफलंसिध्दांतेतुब्रह्मोपास्त्येतिभेदः। शंकते। अथापीति। परिहरति। नस्यादिति ॥ ७॥ ॥ ॥

संगृहीतं विवृणोति। मुख्य इति। परमात्मेत्यर्थः शरीरत्वेपीश्वरत्वं किं न स्यादत आह। नचेति। जीवत्वं दुर्वारमित्यर्थः नन्वानंदपदाभ्यासेप्यानंदमय स्य ब्रह्मत्वं कथमित्याशंक्य ज्योतिष्टोमाधिकारे ज्योतिःपदस्य ज्योतिष्टोमपरत्ववदानंदमयप्रकरणस्थानंदपदस्यानंदमयपरत्वात्तदभ्यासस्तस्य ब्र- ह्मत्वसाधक इत्यभिप्रेत्याह। आनंदमयं प्रस्तुत्येति रसः सार आनंद इत्यर्थः अयं लोकः यद्यदि एषः आकाशः पूर्णः आनंदः साक्षी प्रेरको न स्यात् त दा को वान्याच्चलेत् को वा विशिष्य प्राण्यात् जीवेत् तस्मादेष ह्येवानंदयाति आनंदयतीत्यर्थः युवा स्यात्साधु युवेत्यादिना वक्ष्यमाणा मनुष्य युवानंद

मुख्यश्चेदात्मास्यान्न प्रियादि संस्पर्शः स्यात् इह तु तस्य प्रियमेव शिर इत्यादि श्रूयते शारीरत्वं च श्रूयते तस्यैष एव शारीर आत्मा यः पूर्व स्येति तस्य पूर्वस्य विज्ञानमयस्यैष एव शारीर आत्मा य एष आनंदमय इत्यर्थः न च सशरीरस्य सतः प्रियाप्रियसंस्पर्शो वारयितुं शक्यः तस्मात्संसार्येवानंदमय आत्मा इत्येवं प्राप्ते इदमुच्यते। आनंदमयोभ्यासात् पर एवात्मानंदमयो भवितुमर्हति कुतोभ्यासात् परस्मि न्नेवत्वात्मन्यानंदशब्दो बहुकृत्वोभ्यस्यते आनंदमयं प्रस्तुत्य रसो वै स इति। तस्यैव रसत्वमुक्त्वोच्यते रसं ह्येवायं लब्ध्वानंदी भव- तीति को ह्येवान्यात्कः प्राण्याद्यदेष आकाश आनंदो न स्यात् एष ह्येवानंदयाति सैषानंदस्य मीमांसा भवति एतमानंदमयमात्मा नमुपसंक्रामति आनंदं ब्रह्मणो विद्वान् न बिभेति कुतश्चनेति आनंदो ब्रह्मेति व्यजानादिति च॥ मारभ्य ब्रह्मानंदावसाना एषा सन्नि- हिता आनंदस्य तारतम्य मीमांसा भवति उपसंक्रामति विद्वान्प्राप्नोतीत्येकदेशिनामर्थः मुख्यसिध्दांते तूपसंक्रमणं विदुषः कोशानां प्रत्यङ्मात्रत्वेन- विलापनमिति ज्ञेयं शिष्टमुक्तार्थम्॥ ७॥

आनंदशब्दाद्ब्रह्मावगतिःसर्वत्रसमानेतिगतिसामान्यार्थमाह।श्रुत्यंतरेचेति।लिंगादमुख्यात्मसन्निधेर्बाधइतिमत्वाह।नासाविति।सर्वांतर-
त्वंनश्रुतमित्याशंक्यनतोन्यस्यानु क्तेस्तस्यसर्वांतरत्वमितिविवृणोति।मुख्यमिति।लोकबुद्धिमिति।तस्याःस्थूलग्राहितामनुसरदित्यर्थःता

श्रुत्यंतरेचविज्ञानमानंदंब्रह्मेतिब्रह्मण्येवआनंदशब्दोदृष्टःएवमानंदशब्दस्यबहुकृत्वोब्रह्मण्यभ्यासात्आनंदमयआत्मा
ब्रह्मेतिगम्यते।यत्तूक्तंअन्नमयाद्यमुख्यात्मप्रवाहपतितत्वादानंदमयस्याप्यमुख्यत्वमितिनासौदोषआनंदमयस्यसर्वांतरत्वा
त् मुख्यमेवत्वात्मानंउपदिदिक्षुशास्त्रंलोकबुद्धिमनुसरत्अन्नमयंशरीरमनात्मानमत्यंतमूढानामात्मत्वेनप्रसिद्धमनूद्य
मूषानिषिक्तद्रुतताम्रादिप्रतिमावत्ततोंतरंततोंतरमितिएवंपूर्वेणपूर्वेण समानमुत्तरमुत्तरमनात्मानमात्मेतिग्राहयत् प्रतिप-
त्तिसौकर्यापेक्षयासर्वांतरंमुख्यमानंदमयमात्मानमुपदिदेशेति श्लिष्टतरंयथारुंधतीनिदर्शनेबह्वीष्वपितारास्वमुख्यास्वरुंध
तीषुदर्शितासुयाअंत्याप्रदर्श्यते सामुख्यैवारुंधतीभवत्येवमिहाप्यानंदमयस्यसर्वांतरत्वात् मुख्यमात्मत्वं यत्तुब्रूषेप्रियादीनां
शिरस्त्वादिकल्पनामुपपन्नामुख्यस्यात्मनःइत्यतीतानंतरोपाधिजनितासानस्वाभाविकीत्यदोषःशारीरत्वमप्यानंदमयस्यान्न
मयादिशरीरपरंपरयाप्रदर्श्यमानत्वात्नपुनःसाक्षादेवशारीरित्वंसंसारिवत्तस्मादानंदमयःपरएवात्मा॥

न्नस्यमूषाकारत्ववत्प्रा-
णस्यदेहाकारत्वंदेहेनसामान्यंतथामनःप्राणाकारंतेनसममित्याहपूर्वेणेतिअतीतोयोनंतरउपाधिर्विज्ञानकोशस्तत्कृतासासयवत्वकल्पनाशरीरे
णज्ञेयत्वाच्छारीरत्वमितिलिंगद्वयंदुर्बलंअतःसहायाभावादभ्याससर्वांतरत्वाभ्यांविकारसन्निधेर्बाधइतिभावः॥७॥ ८३

विकारार्थेमयट्श्रुतिः सहापइत्याशंक्यमयटः प्राचुर्येपिविधानात्तथैवमित्याह। विकारेत्यादिना तत्प्रकृतवचनेमयडितिप्रथमांताद् समर्थाच्छब्दात् प्राचुर्य विशिष्टस्यप्रकृतस्यवचनेभिधानेगम्यमानेमयट्प्रत्ययोभवतीतिसूत्रार्थः अत्रवचनग्रहणात् प्रकृतस्यप्राचुर्यवैशिष्ट्यसिद्धिः तादृशस्यलोकेमयटो भिधानाद्यथा अन्नमयोयज्ञइति अत्रह्यन्नंप्रचुरमस्मिन्नित्यन्नशब्दःप्रथमाविभक्तियुक्तस्तस्मान्मयट् यज्ञस्यप्रकृत्यर्थान्नप्राचुर्यवाचीदृश्यतेन

विकारशब्दान्नेतिचेन्नप्राचुर्यात्। अत्राह नानंदमयः परमात्माभवितुमर्हति कस्माद्विकारशब्दात्प्रकृतिवचनादयमन्यः शब्दो-विकारवचनः समधिगतआनंदमयइतिमयटोविकारार्थत्वात्तस्मादन्नमयादिशब्दवत् विकारविषयएवायमानंदमयशब्दइतिचेन्न-प्राचुर्यार्थेपिमयटः स्मरणात्तत्प्रकृतवचनेमयडितिहिप्रचुरतायामपिमयट्स्मर्यते यथान्नमयोयज्ञइति अन्नप्रचुरउच्यते एवमानंद प्रचुरंब्रह्मानंदामयउच्यते आनंदप्रचुरत्वंचब्रह्मणोमनुष्यत्वादारभ्योत्तरस्मिन्नुत्तरस्मिन्स्थानेशतगुणआनंदइत्युक्त्वाब्रह्मानंद-स्यनिरतिशयत्वावधारणात्। तस्मात्प्राचुर्यार्थेमयट्। तद्धेतुव्यपदेशाच्च इतश्चप्राचुर्यार्थेमयट्यस्मादानंदहेतुत्वंब्रह्मणोव्यप दिशतिश्रुतिः एषह्येवानंदयातीतिआनंदयतीत्यर्थः योह्यन्यानानंदयतिसप्रचुरानंदइतिप्रसिद्धंभवति यथालोकेयोन्येषांध-निकत्वमापादयतिसप्रचुरधनइतिगम्यतेतद्वत्तस्मात्प्राचुर्यार्थेपिमयट्संभवादानंदमयःपरएवात्मा॥ शङ्कप्रकृतवचनइतिध्ये यंसूत्रस्थचशब्दोनुक्तसमुच्चयार्थइतिमत्वाव्याचष्टे इतश्चेति तच्चानुक्तंब्रह्मानंदस्यनिरतिशयत्वावधारणंपूर्वमुक्तम्॥

०॥।० आनंदमयस्यब्रह्मत्वेलिंगमुक्त्वाप्रकरणमाह । मांत्रेति । यस्मादेवंप्रकृतंतस्मान्मांत्रवर्णिकमेवब्रह्मानंदमयइतिवाक्येगीयतइतियोजनानन्नुमंत्रो अ०१
८४ क्तमेवात्रग्राह्यमितिकोनिर्बंधस्तत्राह । मंत्रेति । ब्राह्मणस्यमंत्रव्याख्यानत्वादुपायत्वमस्तिमंत्रस्तूपेयः तदिदमुक्तमविरोधादिति । तयोरुपायो
पेयभावादित्यर्थः तर्ह्यन्नमयादीनामपिमांत्रवर्णिकब्रह्मत्वंस्यादित्यतआह ॥ नचेति भृगवेप्रोक्तावरुणेनोपदिष्टा भृगुवल्लीपंचमपर्यायस्था

मांत्रवर्णिकमेवचगीयते । इतश्चानंदमयः परएवात्मायस्माद्ब्रह्मविदाप्नोतिपरमित्युपक्रम्यसत्यंज्ञानमनंतंब्रह्मेति अस्मिन्मंत्रेयद्ब्रह्मस-
त्यज्ञानानंतविशेषणैर्निर्धारितं यस्मादाकाशादिक्रमेणस्थावरजंगमानिभूतानिजायंते यच्चभूतानिसृष्ट्वातान्यनुप्रविश्यगुहायामवस्थि
तंसर्वांतरंयस्यविज्ञानायान्योंतरआत्मेतिप्रक्रांतंतन्मांत्रवर्णिकमेवब्रह्मेहगीयते अन्योंतरआत्मानंदमयइतिमंत्रब्राह्मणयोश्चैकार्थत्वं
युक्तंअविरोधात् । अन्यथाहिप्रकृतहानाप्रकृतप्रक्रियेस्यातां । नचान्नमयादिभ्यइवानंदमयादन्योंतरआत्माभिधीयते एतन्निष्ठैवचसै-
षाभार्गवीवारुणीविद्यातस्मादानंदमयः परएवात्मा । नेतरोनुपपत्तेः । इतश्चानंदमयः परएवात्मानेतरइतरइतीश्वरादन्यः संसारीजीवइ
त्यर्थः नजीवआनंदमयशब्देनाभिधीयतेकस्मात् अनुपपत्तेरानंदमयंहिप्रकृत्यश्रूयतेसोकामयतबहुस्यांप्रजायेयेति सतपोतप्यतसत
पस्तप्त्वाइदंसर्वमसृजतयदिदंकिंचेति तत्रप्राक्शरीरो त्पत्तेरभिध्यानंसृज्यमानानांचविकाराणांस्रष्टुरव्यतिरेकः सर्वविकारसृष्टि ८४

नंदेप्रतिष्ठिता तत्रस्थानंन्यायेनतदेकार्थब्रह्मवल्ल्याआनंदमयेनिष्ठेत्याह एतन्निष्ठैवेति सईश्वरतपः सृष्ट्यालोचनमतप्यतकृतवानित्यर्थः अभिध्यानं
कामनाबहुस्यामित्यव्यतिरेका । अधिकारेप्रकरणेसआनंदमयोरसः ॥

ननुलब्धृलब्धव्यभावेप्यभेदः किंनस्यादतआह। नहिलब्धैवेति। ननुलब्धृलब्धव्ययोर्भेदस्यावश्यकत्वेश्रुतिस्मृत्योर्बाधः स्यादित्याशंकते। कथमिति। यावतायतस्त्वयेत्यक्तं अतःश्रुतिस्मृतीकथमित्यन्वयः उक्तांशंकामंगीकरोति। बाढमिति। तर्ह्यात्मनएवात्मनालभ्यत्वोक्तिबाधःअभेदादित्याशंक्य कल्पितभेदान्नबाधइत्याह। तथापीति। अभेदेपीत्यर्थः लौकिकभ्रमः आत्मनःस्वाज्ञानजभ्रमेणदेहाद्यभिन्नस्यभेदभ्रांत्या

श्चनपर स्मादात्मनोन्यत्रोपपद्यते। भेदव्यपदेशाच्च। इतश्चनआनंदमयः संसारीयस्मादानंदमयाधिकारेरसोवैसः रसंह्येवायंलब्ध्वानंदीभवतीतिजीवानंदमयोभेदेनव्यपदिशति॥ नहिलब्धैवलब्धव्योभवति कथंतर्ह्यात्मान्वेष्टव्यः आत्मलाभान्नपरंविद्यतेइतिचश्रुतिस्मृतीयावतानलब्धैवलब्धव्योभवतीत्यक्तं बाढं॥ तथाप्यात्मनोऽप्रच्युतात्मभावस्यैवसतस्तत्त्वानवबोधनिमित्तोदेहादिष्वनात्मस्वात्मत्वनिश्चयोलौकिकोदृष्टः तेनदेहादिभूतस्यात्मनोप्यात्मानन्विष्टोन्वेष्टव्योअलब्धोलब्धव्योश्रुतःश्रोतव्योमतोमंतव्योविज्ञातोविज्ञातव्यइत्यादिभेदव्यपदेशउपपद्यते प्रतिषिध्यतएव तुपरमार्थतः सर्वज्ञात्परमेश्वरादन्योद्रष्टाश्रोतावानान्योतोस्तिद्रष्टेत्यादिना॥ परमात्मनोज्ञेयत्वाद्यक्तिरित्यर्थः। अन्वेष्टव्यो

देहादिविविक्ततयाज्ञेयः विवेकज्ञानेनलब्धव्यः साक्षात्कर्तव्यः तदर्थंश्रोतव्यः विज्ञानंनिदिध्यासनंसाक्षात्कारोवाश्रुत्यंतरस्थार्थानुवादाद्दपौनरुक्त्यंननुभेदः सत्यएवास्त्विति तत्राह। प्रतिषिध्यतइति॥ ॥ ॥

अतईश्वराद्द्रष्टाजीवोन्योनास्तीतिचेत् जीवाभेदादीश्वरस्यापिमिथ्यात्वंस्यादतआह। परमेश्वरइति। अविद्याप्रतिबिंबत्वेनकल्पितात् जीवाद्भिन्नात्रईश्वरः पृथगस्तीतिनमिथ्यात्वंकल्पितस्याधिष्ठानाभेदेप्यधिष्ठानस्यनतोभेदइत्यत्रदृष्टांतमाह यथेतिसूत्रारूढः स्वतोपिमिथ्यानजीवइत्यरुच्याभेदमात्रमिथ्यात्वेदृष्टांतमाह। यथाचेति। ननुसूत्रबलाद्भेदः सत्यइत्यतआह। ईदृशंचेति। कल्पितमेवेत्यर्थः सूत्रेभेदः सत्यइतिपदाभावात्

परमेश्वरस्त्वविद्याकल्पिताच्छारीरात्कर्तृभोक्तुर्विज्ञानात्माख्यादन्यः यथामायाविनश्चर्मखड्गधरात्सूत्रेणाकाशमधिरोहतः सएवमायावीपरमार्थरूपोभूमिष्ठोन्यः यथावाघटाकाशादुपाधिपरिच्छिन्नादनुपाधिपरिच्छिन्नआकाशोन्यः ईदृशंचविज्ञानात्मपरमात्मभेदमाश्रित्यनेतरोनुपपत्तेः भेदव्यपदेशाच्चेत्युक्तं। कामाच्चनानुमानापेक्षा। आनंदमयाधिकरणेसोकामयतबहुस्यांप्रजायेयेतिकामयितृत्वनिर्देशाच्चनानुमानिकमपिसांख्यपरिकल्पितमचेतनंप्रधानमानंदमयत्वेनकारणत्वेनवापेक्षितव्यं ईक्षतेर्नाशब्दमितिनिराकृतमपिप्रधानंपूर्वसूत्रोदाहृतांकामयितृत्वश्रुतिमाश्रित्यप्रसंगात्पुनर्निराक्रियते गतिसामान्यप्रपंचनाय। अस्मिन्नस्यचतद्योगंशास्ति। इतश्चनप्रधानेजीवेवानंदमयशब्दःस्यादस्मिन्नानंदमयेप्रकृतेआत्मनिप्रतिबुद्धस्यास्यजीवस्यतद्योगंशास्तितदात्मनायोगस्तद्योगस्तद्भावापत्तिः॥

तदनन्यत्वादिसूत्राणाच्छ्रुत्यनुसाराच्चेतिभावः नन्वानंदात्मकसत्वप्रचुरप्रधानमानंदमयमस्तुतत्राह। कामाच्चेति। अनुमानगम्यमानुमानंपुनरुक्तिमाशंक्याह। ईक्षतेरिति। अस्मिन्नितिविषयसप्तमीआनंदमयविषयकप्रबोधनतोजीवस्यतद्योगंयस्माच्छास्तितस्मान्नप्रधानमितियोजना। जीवस्यप्रधानयोगोस्तीत्यतआहतदात्मनेति॥

जीवस्यजीवाभेदोस्तीत्यतआह। मुक्तिरिति। अदृश्येस्थूलप्रपंचशून्येआत्मसंबध्दमात्म्यंलिंगशरीरंतद्रहितेनिरुक्तंशब्दशक्यं तद्भिन्नोनिःशे
षलयस्थानंनिलयनंमायातच्छून्येब्रह्मण्यभयंयस्यात्तथायदैवंप्रतिष्ठांमनसः प्रकृष्टांवृत्तिमेषविद्वान्लभतेअथतदैवाभयंब्रह्मप्राप्नोतीत्यर्थः उ
तअपिअरमल्पमप्यंतरंभेदंयदैवैषनरः पश्यतिअथतदातस्यभयमितियोजना इदंवृत्तिकारमतंदूषयति। इदंत्विति। इहपरव्याख्यायांवि
मुक्तिरित्यर्थः तद्योगंशास्तिशास्त्रंयदा ह्येवैषएतस्मिन्नदृश्येनात्म्येनिरुक्तेनिलयनेभयंप्रतिष्ठांविंदते अथसोभयंगतोभवति
यदाह्येवैषएतस्मिन्नुदरमंतरंकुरुते। अथतस्यभयंभवतीति। एतदुक्तंभवतियदैतस्मिन्नानंदमयेल्पमप्यंतरं अतादात्म्यरूपंपश्यति
तदासंसारभयान्ननिवर्तते यदात्वेतस्मिन्नानंदमयेनिरंतरंतादात्म्येनप्रतितिष्ठतितदासंसारभयान्निवर्ततइतितच्चपरमात्मपरि-
ग्रहेघटतेनप्रधानपरिग्रहेजीवपरिग्रहेवातस्मादानंदमयः परमात्मेतिस्थितं। इदंत्विहवक्तव्यं सवाएषपुरुषोन्नरसमयस्तस्माद्वा
एतस्मादंनरसमयादन्योंतरआत्माप्राणमयः तस्मादन्योंतरआत्मामनोमयस्तस्मादन्योंतरआत्माविज्ञानमयइतिचविकारार्थेमयट्
प्रवाहेसत्यानंदमयएवाकस्मादर्धजरतीयन्यायेनकथमिवमयटः प्राचुर्यार्थत्वंब्रह्मविषयत्वंचाश्रीयतेइति। मांत्रवर्णिकब्रह्मा
धिकारादितिचेत् अन्नमयादीनामपितर्हिब्रह्मत्वप्रसंगः अत्राह युक्तमन्नमयादीनामब्रह्मत्वंतस्मात्तस्मादांतरस्यात्मनउच्यमा
नत्वात् आनंदमयात्तुनकश्चिदन्योंतरआत्मोच्यतेतेनानंदमयस्यब्रह्मत्वमन्यथाप्रकृतहानाप्रकृतप्रक्रियाप्रसंगादित्यत्रोच्यते
कारार्थकेमयटिबुध्दिस्थेसत्यकस्मात्कारणंविनाएकप्रकरणस्थस्य मयटः पूर्वंविकारार्थकत्वंअंतेप्राचुर्यार्थकत्वमित्यर्धजरतीयंकथमिवके

नदृष्टांतेन आश्रीयत इति इदं वक्तव्यमित्यन्वयः प्रश्नंमत्वाशंकते। मात्रेति। स्फुटमुत्तरंकिमांतर इतिनश्रूयते किंवावस्तुतोप्यांतरंब्रह्मनश्रूयतइ
तिविकल्प्य आद्यमंगीकरो। अत्रोच्यतेयद्यपीति॥ ॥विकारप्रायपाठानुगृहीतमयट्श्रुतेः सावयत्वंलिंगाच्चेत्याह। तथापीति। इष्टार्थदृष्ट्या
जातंसुखंप्रियंस्मृत्यामोदः सचाभ्यासात्प्रकृष्टःप्रमोदः आनंदस्तत्कारणंबिंबचैतन्यमात्माशिरःपुच्छयोर्मध्यकायः ब्रह्मशब्दप्रतिश्रुत्य
र्थः द्वितीयंप्रत्याह तत्रयदिति। यन्मंत्रेप्रकृतंगुहानिहितत्वेनसर्वांतरंब्रह्मतदिह पुच्छवाक्ये ब्रह्मशब्दात्प्रत्यभिज्ञायते। तस्यैवविज्ञा
यद्यप्यन्नमयादिभ्य इवानंदमयादन्योंतरआत्मेतिनश्रूयते॥ तथापिनानंदमयस्यब्रह्मत्वंयतआनंदमयंप्रकृत्यश्रूयतेतस्य
प्रियमेवशिरः मोदोदक्षिणः पक्षः प्रमोदउत्तरः पक्षः आनंदआत्माब्रह्मपुच्छंप्रतिष्ठेति तत्रयद्ब्रह्ममंत्रवर्णेप्रकृतंसत्यंज्ञानमनं
तंब्रह्मेतितदिहब्रह्मपुच्छंप्रतिष्ठेत्युच्यते तद्विजिज्ञापयिषयैवान्नमयादय आनंदमयपर्यंताः पंचकोशाः कल्प्यंते तत्रकुतः
प्रकृतहानाप्रकृतप्रक्रियाप्रसंगः नन्वानंदमयस्यावयवत्वेनब्रह्मपुच्छंप्रतिष्ठेत्युच्यते अन्नमयादीनामिवेदंपुच्छंप्रतिष्ठेत्यादिव
त्तत्कथंब्रह्मणः स्वप्रधानत्वंशक्यंविज्ञातुंप्रकृतत्वादितिब्रूमः नन्वानंदमयावयवत्वेनापिब्रह्मणिविज्ञायमानेनप्रकृतत्वंहीयते
आनंदमयस्यब्रह्मत्वादिति॥ पनेछयापंचकोशरूपागुहाप्रपंचितानप्रतात्पर्येनास्तीतिवक्तुंकल्प्यंतेइत्युक्तं। एवंपुच्छवाक्येप्रकृतस्यप्रधानब्रह्मपरेसति
नप्रकृतहान्यादिदोषइत्यर्थः ब्रह्मणःप्रधानत्वंपुच्छश्रुतिविरुध्यमितिशंकते। नन्विति। अत्रब्रह्मशब्दात्प्रकृतस्यप्रधानब्रह्मप्रत्यभिज्ञानेसतिपुच्छशब्दविरोध
प्राप्तावेकस्मिन्वाक्येप्रथमचरमश्रुतशब्दयोराद्यस्यानुपसंजातविरोधिनोबलीयस्त्वात्पुच्छशब्देनप्राप्तगुणत्वस्यबाधइतिमत्वाह। प्रकृतत्वादितिप्रकरणस्यान्यथा-
सिद्धिमाह। नत्विति॥

एकस्यैवगुणत्वंप्रधानत्वंचविरुद्धमित्याह अत्रोच्यतेतितत्रविरोधनिरासायान्यतरस्मिन्वाक्येब्रह्मस्वीकारेपुच्छवाक्येब्रह्मस्वीकार्यमित्याह।
अन्यतरेति। वाक्यशेषाच्चैवमित्याह। अपिचेति। तत्रब्रह्मणिश्लोकोपीत्यर्थः पुच्छशब्दस्यगतिंपृच्छति। कथंपुनरिति। त्वयापिपुच्छशब्दस्य
मुख्यार्थोवक्तुमशक्यः ब्रह्मणआनंदमयलांगूलत्वाभावात्पुच्छदृष्टिलक्षणायांचाधारलक्षणायुक्ताप्रतिष्ठापदयोगात् ब्रह्मशब्दस्यमुख्या-

अत्रोच्यते। तथासतितदेवब्रह्मानंदमयआत्मावयवीतदेवचब्रह्मपुच्छंप्रतिष्ठावयवइत्यसामञ्जस्यंस्यादन्यतरपरिग्रहेतुयुक्तं
ब्रह्मपुच्छंप्रतिष्ठेत्यत्रैवब्रह्मनिर्देशआश्रयितुंब्रह्मशब्दसंयोगात्आनंदमयवाक्येब्रह्मशब्दसंयोगाभावादपिचब्रह्मपुच्छंप्रति-
ष्ठेतिउक्त्वेदमुच्यतेतदप्येषश्लोकोभवति असन्नेवसभवति असद्ब्रह्मेतिवेदचेत् अस्तिब्रह्मेतिचेद्वेदसंतमेनंततोविदुरिति
अस्मिंश्चश्लोकेननुकृष्यानंदमयंब्रह्मणएवभावाभावदेवनयोर्गुणदोषाभिधानाद्गम्यते ब्रह्मपुच्छंप्रतिष्ठेत्यत्रब्रह्मणएवस्वप्रधा
नत्वमितिनचानंदमयस्यात्मनोभावाभावशंकायुक्ताप्रियमोदादिविशेषस्यानंदमयस्यसर्वलोकप्रसिध्दत्वात्कथंपुनःस्वप्रधानं
सद्ब्रह्मानंदमयस्यपुच्छत्वेननिर्दिश्यतेब्रह्मपुच्छंप्रतिष्ठेति। नैषदोषः। पुच्छवत्पुच्छंप्रतिष्ठापरायणमेकनीडंलौकिकस्यानंदजातस्य
ब्रह्मानंदइत्येतदनेनविवक्ष्यतेनावयत्वमेतस्यैवानंदस्यान्यानिभूतानिमात्रामुपजीवंतीतिश्रुत्यंतरादपिचानंदमयस्यब्रह्मत्वेप्रिया
द्यवयवत्वेनसविशेषंब्रह्माभ्युपगंतव्यं॥ र्थलाभाच्चत्वत्पक्षेब्रह्मपदस्याप्यवयवलक्षकत्वादित्याह। नैषदोषइति। पुच्छमित्याधारत्वमा
युक्तंप्रतिष्ठेत्येकनीडत्वंएकंमुख्यंनीडंअधिष्ठानंसोपादानस्यजगतइत्यर्थः नतुवृत्तिकारैरपितैत्तिरीयवाक्यंब्रह्मणिसमन्वितंदृष्टंतत्रकिमुदाहरण

भेदेनेत्याशंक्याह॥ अपिचेति॥ यत्रसविशेषत्वंतत्रवाङ्मनसगोचरत्वमितिव्याप्तेरत्रव्यापकाभावोक्त्यानिर्विशेषमुच्यतइत्याह। निर्विशे षमिति नि वर्तंतेअशक्ताइत्यर्थः। सविशेषस्यमृषात्वादभयंचायुक्तं। अतोनिर्विशेषज्ञानार्थंपुच्छवाक्यमेवोदाहरणमितिभावः प्राचु र्यार्थिकमयटासविशेषोक्तौनिर्विशेषश्रुतिबाधउक्तः दोषांतरमाह। अपिचेति। प्रत्ययार्थत्वेनप्रधानस्यप्राचुर्यस्यप्रकृत्यर्थोविशेषणंविशे

निर्विशेषंतुब्रह्मवाक्यशेषेश्रूयते। वाङ्मनसयोरगोचरत्वाभिधानाद्यतोवाचोनिवर्तंते अप्राप्यमनसासह आनंदंब्रह्मणोवि द्वान्नबिभेतिकुतश्चनेति। अपिचानंदप्रचुरइत्युक्तेदुःखास्तित्वमपि गम्यतेप्राचुर्यस्यलोकेप्रतियोग्यल्पत्वापेक्षत्वात्तथाच सति यत्रनान्यत्पश्यतिनान्यच्छृणोतिनान्यद्विजानातिसभूमेति भूम्निब्रह्मणितद्व्यतिरिक्ताभावश्रुतिरुपरुध्येत प्रतिशरीरंच प्रियादिभेदादानंदमयस्यभिन्नत्वं। ब्रह्मतुनप्रतिशरीरंभिद्यते। सत्यंज्ञानमनंतंब्रह्मेतिआनंत्यश्रुतेः। एकोदेवःसर्वभूतेषुगू ढःसर्वव्यापीसर्वभूतांतरात्मेतिचश्रुत्यंतरान्नचानंदमयाभ्यासःश्रूयते प्रातिपदिकार्थमात्रमेवहिसर्वत्राभ्यस्यते यदेषआका शआनंदोनस्यात्सैषानंदस्यमीमांसा भवत्यानंदंब्रह्मणोविद्वान्नबिभेतिकुतश्चनानंदोब्रह्मेतिव्यजानादितिच॥

षणस्ययःप्रतियोगीविरोधीतस्याल्पत्वमपेक्षते यथाविप्रमयोग्रामइतिशूद्राल्पत्वंअस्तुकोदोषस्तत्राह। तथाचेति। प्रकृत्यर्थप्राधान्येल्पत्वयंदोषोना स्ति प्रचुरप्रकाशःसवितेत्यत्रतमसोल्पस्याप्यभानात् परंत्वानंदमयपदस्यप्रचुरानंदेलक्षणादोषःस्यादितिमंतव्यं। किंचभिन्नत्वान् परवन्नब्रह्मनेत्याह। प्रतिशरीरमिति॥ ॥

नन्व भ्यस्यमानानंदपदंलक्षणयानंदमयपरं इत्यभ्यासासिद्धिरित्यत आह। यदिचेति। आनंदमयस्यब्रह्मत्वेनिणीतेसत्यानंदपदस्य तत्पर त्वज्ञानादभ्याससिद्धिः तत्सिद्धौ तन्निर्णय इतिपरस्पराश्रय इतिभावः अयमभ्यासः पुच्छब्रह्मण इत्याह। तस्मादिति। उपसंक्रमणं बाधः

यदिचानंदमयशब्दस्यब्रह्मविषयत्वंनिश्चितंभवेत्॥ ततउत्तरेष्वानंदमात्रप्रयोगेष्वप्यानंदमयाभ्यासः कल्प्येत नः त्वानंदमयस्यब्रह्मत्वमस्ति। प्रियशिरस्त्वादिभिर्हेतुभिरित्यवोचाम। तस्माच्छ्रुत्यंतरेविज्ञानमानंदंब्रह्मेति आनंदमा तिपादकस्यब्रह्मणिप्रयोग दर्शनात् यदेषआकाशआनंदोनस्यादित्यादिब्रह्मविषयप्रयोगोनत्वानंदमयाभ्यास इत्यव गंतव्यं। यस्त्वयंमयडंतस्यैवानंदशब्दस्यासएतमानंदमयमात्मानमुपसंक्रमतीतिनतस्य ब्रह्मविषयत्वमस्ति। विकारा त्मनामेवान्नमयादीनामनात्मनामुपसंक्रमितव्यानांप्रवाहेपतितत्वात्। नन्वानंदमयस्योपसंक्रमितव्यस्यान्नमयादिवदब्र ह्मत्वेसतिनैवविदुषोब्रह्मप्राप्तिफलंनिर्दिष्टंभवेत् नैषदोषः आनंदमयोपसंक्रमणनिर्देशेनैवपुच्छप्रतिष्ठाभूतब्रह्मप्राप्तेः फलस्यनिर्दिष्टत्वात्॥

नन्वसयएवंवित्तब्रह्मविदंमक्रम्योपसंक्रमणवाक्येनफलंनिर्दिश्यते तत्तस्याब्रह्मत्वेनसिध्यतीतिशंक ते। नन्विति। उपसंक्रमणंप्राप्तिरित्यंगीकृत्यविशिष्टप्राप्त्युक्त्याविशेषणप्राप्तिफलमुक्तमित्याह॥ नैषइति॥

ज्ञानेनकोशानांबाधस्तादितिसिध्दांतेबाधावधिप्रत्यगानंदलाभोर्थादुक्तउत्तरश्लोकेनस्फुटीकृतइत्याह। तदपीति। तदपेक्षत्वादिति। कामपितत्पुच्छब्रह्मविषयत्वादित्यर्थः यदुक्तंपंचमस्थानस्थत्वादानंदमयेब्रह्मवल्लीसमाप्ताभृगुवल्लीवादिति॥ तत्राह। यत्त्विति। या-

तदप्येषश्लोकोभवतियतोवाचोनिवर्तंतइत्यादिनाप्रपंच्यमानत्वात्। यात्वानंदमयसन्निधानेसोकामयतबहुस्यांप्रजायेयेतिइयंश्रुतिरुदाहृतासाब्रह्मपुच्छंप्रतिष्ठेत्यनेनसन्निहिततरेणब्रह्मणासंबध्यमानानानंदमयस्यब्रह्मतांप्रतिबोधयति तदपेक्षत्वाच्चोत्तरस्यग्रंथस्यरसोवैसइत्यादेर्नानंदमयविषयता। ननुसोकामयतेतिब्रह्मणिपुल्लिंगेननिर्देशोनोपपद्यते। नायंदोषः। तस्माद्वाएतस्मादात्मनआकाशःसंभूतइत्यत्रपुल्लिंगेनाप्यात्मशब्देनब्रह्मणःप्रकृतत्वात्। यात्तुभार्गवीवारुणीविद्यानंदोब्रह्मेतिव्यजानादितितस्यांमयडश्रवणात्प्रियशिरस्त्वाद्यश्रवणाच्चयुक्तमानंदस्यब्रह्मत्वं तस्मादणुमात्रमपिविशेषमनाश्रित्यनस्वतएवप्रियशिरस्त्वादिब्रह्मणउपपद्यते नचेहसविशेषंब्रह्मप्रतिपिपादयिषितं। वाङ्मनसगोचरातिक्रमश्रुतेः तस्मादन्नमयादिष्विवानंदमयेपिविकारार्थएवमयड्विज्ञेयोनप्राचुर्यार्थः। सूत्राणित्वेवंव्याख्येयानिब्रह्मपुच्छंप्रतिष्ठेत्यत्रकिमानंदमयस्यावयवत्वेनब्रह्मविवक्ष्यते उतस्वप्रधानत्वेनेति॥

त्वित्यर्थः मयड्श्रुत्यासावयवत्वादितिलिंगेनचस्थानंबाध्यमितिभावः गोचरातिक्रमोगोचरत्वाभावः॥

॥ ॥

पूर्वमीक्षते: संशयाभावादितियुक्त्याप्रायपाठेननिश्चायकइत्युक्तंनर्हिअत्रपुच्छपदस्याधारावयवयोर्लक्षणासाम्यात्संशयोस्तीत्यवय
वप्रायपाठोनिश्चायकइति पूर्वाधिकरणसिध्दांतयुक्त्यभावेनपूर्वपक्षयति। पुच्छशब्दादिति। नथाचप्रत्युदाहरणसंगतिः पूर्वपक्षेस
गुणोपास्तिः सिध्दांतेनिर्गुणप्रमितिः फलंवेदांतवाक्यसमन्वयोक्तेःश्रुत्यादिसंगतयः स्फुटाएवसूत्रस्थानंदमयपदेनतद्वाक्यस्थंब्रह्मपदं
लक्ष्यते। विक्रियतेनेनेति विकारोवयवः। प्रायापत्तिरिति। अवयवक्रमस्यबुद्धौप्राप्तिरित्यर्थः। अत्राहिप्रकृतस्यब्रह्मणोज्ञानार्थंकोशः

पुच्छशब्दावयवत्वेनेतिप्राप्तेउच्यते आनंदमयोभ्यासात् आनंदमयआत्मेत्यत्रब्रह्मपुच्छंप्रतिष्ठेतिस्वप्रधानमेवब्रह्मोपदिश्यते
।असन्नेवसभवतीत्यस्मिन्निगमनश्लोकेब्रह्मणएवकेवलस्याभ्यस्यमानत्वात्। विकारशब्दान्नेतिचेन्नप्राचुर्यात्। विकारशब्दो
वयवशब्दोभिप्रेतः पुच्छमित्यवयवशब्दान्नस्वप्रधानत्वंब्रह्मणइतियदुक्तम् तस्यपरिहारोवक्तव्यः अत्रोच्यतेनायंदोषः प्राचुर्या
दप्यवयवशब्दोपपत्तेः प्राचुर्यंप्रायापत्तिरवयवप्रायेवचनमित्यर्थोन्नमयादीनांहिशिरआदिषुपुच्छांतेषुअवयवेषूक्तेष्वानंदम
यस्यापिशिरआदीन्यवयवांतराण्युक्त्वावयवप्रायापत्त्याब्रह्मपुच्छंप्रतिष्ठेत्याहनावयवविवक्षयायत्कारणमभ्यासादितिस्वप्र-
धानत्वंब्रह्मणःसमर्थितं॥ पक्षित्वेनकल्प्यंतेनात्रतात्पर्यमस्तितत्रानंदमयस्यापिअवयवांतरोक्त्यनंतरंकस्मिंश्चित्पुच्छेवक्तव्येप्रकृ
तंब्रह्मपुच्छपदेनोक्तंतस्यानंदमयाधारत्वेनावश्यंवक्तव्यत्वादित्यर्थः॥ ॥ ॥

तद्धेतुव्यपदेशाच्च । तस्य ब्रह्मणः सर्वकार्यहेतुत्वव्यपदेशात्प्रियादिविशिष्टत्वाकारेणानंदमयस्य जीवस्य कार्यत्वात्तं प्रतिशेषत्वं ब्रह्म
णः न युक्तमित्यर्थः मांत्रवर्णिकमेव च गीयते ब्रह्मविदाप्नोति परमिति यस्य ज्ञानान्मुक्तिरुक्ता यत्सत्यं ज्ञानमिति मंत्रोक्तं ब्रह्म तदत्रैव
पुच्छवाक्ये गीयते ब्रह्मपदसंयोगात् नानंदमयवाक्य इत्यर्थः नेतरोनुपपत्तेः इतर आनंदमयो जीवो न प्रतिपाद्यः सर्वस्रष्टृत्वाद्यनुपपत्ते
रित्यर्थः भेदव्यपदेशाच्च अयमानंदमयो ब्रह्म रसं लब्ध्वानंदी भवतीति भेदोक्तेश्च तस्याप्रतिपाद्यतेत्यर्थः आनंदमयो ब्रह्म तैत्तिरीयक
पंचमस्थानस्थत्वात् आनंदवदित्याशंक्याह कामाच्च नानुमानापेक्षा काम्यत इति काम आनंदं तस्य भृगुवल्ल्यां पंचमस्य ब्रह्मत्वदृष्टेरानं-

तस्थेतुव्यपदेशाच्च सर्वस्य विकारजातस्य सानंदमयस्य कारणत्वेन ब्रह्म व्यपदिश्यते इदꣳ सर्वमसृजत यदिदं किंचेति न च कारणं
सद्ब्रह्म स्वविकारस्यानंदमयस्य मुख्यया वृत्त्यावयव उपपद्यते पराण्यपि सूत्राणि यथासंभवं पुच्छवाक्यनिर्दिष्टस्यैव ब्रह्मण उप-
पादकानि द्रष्टव्यानि । अंतस्तद्धर्मोपदेशात् । इदमाम्नायते अथ य एषोंतरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुर्हिरण्य
केश आप्रणखात्सर्व एव सुवर्णः ॥

दमयस्यापि ब्रह्मत्वानुमानापेक्षा न कार्या विकारार्थकमयड्विरोधादित्यर्थः भेदव्यपदेशश्चेत्सगुणं ब्रह्मा
प्रवेद्यं स्यादित्याशंक्याह अस्मिन्नस्य च उतद्योगं शास्ति गुहानिहितत्वेन प्रतीचि स एक इत्युपसंहृते पुच्छवाक्योक्ते ब्रह्मण्यहमेव परं ब्रह्मेति
बोधवत् आनंदमयस्य यदा ह्येवैष इति शास्त्रं ब्रह्मभावं शास्ति अतो निर्गुणब्रह्मैक्यज्ञानार्थं जीवभेदानुवाद इत्यभिप्रेत्याह पराण्यपीति अंतस्त
द्धर्मोपदेशात् । छांदोग्यवाक्यमुदाहरति । अथ य इति अयं स्वरूपास्तिमारंभार्थः हिरण्मयो ज्योतिर्विकारः पुरुषः पूर्णोपि मूर्तिमानुपासकैर्दृश्यते मूर्तिमाह
हिरण्येति । प्रणखा नखाग्रं तेन सहेत्यभिविधावाङ् ॥

नेत्रयोर्विशेषमाह। तस्येति। कपेर्मर्कटस्य आसः पुच्छभागोत्यंततेजस्वी तत्तुल्यं पुंडरीकं यथा दीप्तिमदेवं तस्य पुरुषस्याक्षिणी सद्योविकसितरक्तांभोजनयनइत्यर्थः। उपासनार्थमादित्यमंडलंस्थानंरूपंचोक्त्वानामकरोति। तस्योदिति। उन्नामनिर्वक्ति। सइति। उदितउद्गतः सर्वपापास्पृष्टइत्यर्थः। नामज्ञानफलमाह। उदेति। हेति देवतास्थानं आदित्यमधिकृत्योपास्त्यक्तस्मेत्यात्मानं देहमधिकृत्यापितदुक्तिरित्याह॥ अथेति। पूर्ववत्र

तस्ययथाकप्यासंपुंडरीकमेवमक्षिणीतस्योदितिनामसएषसर्वेभ्यः पाप्मभ्यउदितउदेतिहवैसर्वेभ्यः पाप्मभ्योयएवंवेदेत्यधिदैवतमथाध्यात्ममथयएषोंतरक्षिणिपुरुषोदृश्यतइत्यादि। तत्रसंशयः किंविद्याकर्मातिशयवशात्प्राप्तोत्कर्षः कश्चित्संसारीसूर्यमंडलेचक्षुषिचोपास्यत्वेनश्रूयतेकिंवानित्यशुद्धः परमेश्वरइति। किंतावत्प्राप्तंसंसारीति। कुतः रूपवत्त्वश्रवणादादित्यपुरुषेतावद्धिरण्यश्मश्रुरित्यादिरूपमुदात्दतमक्षिपुरुषेपितदेवातिदेशेनप्राप्यतेतस्यैतस्यतदेवरूपंयदमुष्यरूपमिति। नचपरमेश्वरस्यरूपवत्त्वंयुक्तं। अशब्दमस्पर्शमरूपमव्ययंइतिश्रुतेः। आधारश्रवणाच्च। यएषोंतरादित्येयएषोंतरक्षिणीतिनहिअनाधारस्यस्वमहिमप्रतिष्ठस्यसर्वव्यापिनः परमेश्वरस्याधारउपदिश्येतसभगवः कस्मिन्प्रतिष्ठितइतिस्वेमहिम्नीतिआकाशवत्सर्वगतश्चनित्येतिचश्रुतीभवतः। ऐश्वर्यमर्यादाश्रुतेश्च॥

ब्रह्मपदमानंदमयपदमानंदपदाभ्यासश्चोति मुख्यत्रितयादिबहुप्रमाणवशान्निर्गुणनिर्णयवद्रूपवत्त्वादिबहुप्रमाणवशाज्जीवोहिरण्मयइतिपूर्वसिद्धांतदृष्टांतसंगत्यापूर्वमुत्सर्गतः सिद्धनिर्गुणसमन्वयस्यापवादार्थं पूर्वपक्षयति। संसारीति। अत्रपूर्वोत्तरपक्षयोर्जीवब्रह्मणोरुपास्तिः फलंअक्षिणीत्याधारश्रवणाच्चसंसारीतिसंबंधः॥

श्रुतिमाह। सएषइति। आदित्यस्थः पुरुषः अमुष्मादादित्यादूर्ध्वगाये केचनलोकाः तेषामीश्वरो देवभोगानांचेत्यर्थः सएषोक्षिस्थः पुरुषएतस्मा दक्षो धस्तनायेलोकाः येचमनुष्यकामाभोगास्तेषामीश्वर इतिमर्यादाश्रूयते अतः श्रुतेश्चसंसारीत्यर्थः एषसर्वेश्वर इत्यविशेषः श्रुतेरितिसंबंधः भूताधिपतिर्यमः भूतपाल इंद्रादिश्चैषएवकिंचजलानामसंकरायलोकेविधारकोयथासेतुरेवमेषांलोकानांवर्णाश्रमादीनांमर्यादाहेतुत्वात्सेतुरेषएवअतः सर्वेश्वर इत्यर्थः सूत्रंव्याचष्टे। यएषइति। यद्यप्येकस्मिन्वाक्येप्रथमश्रुतानुसारेणचरमंनेयंतथाप्यत्रप्रथमश्रुतंरूपव-

सएषयेचामुष्मात्परांचोलोकास्तेषांचेष्टेदेवकामानांचेत्यादित्यपुरुषस्यैश्वर्यमर्यादासएषयेचैतस्मादर्वांचोलोकास्तेषांचेष्टेमनुष्यकामानांचेत्यक्षिपुरुषस्य। नचपरमेश्वरस्यमर्यादावदैश्वर्ययुक्तं। एषसर्वेश्वर एषभूताधिपतिरेषभूतपालएषसेतुर्विधारणएषांलोकानामसंभेदायेत्यविशेषश्रुतेः तस्मान्नाक्ष्यादित्ययोरंतः परमेश्वर इत्येवंप्राप्तेब्रूमोंतरस्तद्धर्मोपदेशात्इति। यएषोंतरादित्येयएषोंतरक्षिणीतिचश्रूयमाणः पुरुषः परमेश्वरएवनसंसारी कुतस्तद्धर्मोपदेशात्॥ तस्यहिपरमेश्वरस्य धर्माइहोपदिश्यन्ते तद्यथातस्योदितिनामेतिश्रावयित्वाऽस्यादित्यपुरुषस्यनामसएषसर्वेभ्यः पाप्मभ्यउदितइतिसर्वपाप्मापगमेननिर्वक्ति। तदेवचकृतनिर्वचनंनामाक्षिपुरुषस्याप्यतिदिशति यन्नामतन्नामेति। सर्वपाप्मापगमश्चपरमात्मनएवश्रूयते यआत्मापहतपाप्मेत्यादौ॥ १०

त्वंनिष्फलंध्यानार्थमीश्वरेनेतुंशक्यंनचसर्वपापासंगित्वंसार्वात्म्यैक्यंतुसफलंजीवेनेतुमशक्यंचेतिप्रबलंनचनहनवैदेवान्पापंगच्छतीतिश्रुतेरादित्यजीवस्यापिपापास्पर्शित्वमितिवाच्यं। श्रुतेरध्वनाकर्मानधिकारिणांदेवानांक्रियमाणपाप्मासंबंधेतत्फलास्पर्शोवातात्पर्यात्तेषांसंचितपापाभावे
क्षीणेपुण्येमर्त्यलोकंविशंतीत्ययोगादित्यभिप्रेत्याह। सर्वपाप्मापगमश्चपरमात्मनएवेति॥

सर्वात्म्यमाह। तथेति। अत्र तच्छब्देश्चाक्षुषः पुरुष उच्यते। ऋगाद्यपेक्षया लिंगव्यत्ययः उक्थ्यं शास्त्रविशेषः तत्साहचर्यात्सामस्तोत्रं उक्थ्यादन्य
च्छस्त्रमृगुच्यते। यजुर्वेदो यजुः ब्रह्म त्रयोवेदा इत्यर्थः॥ पृथिव्यग्न्याद्यात्मक इति आधिदैवतमृक् पृथिव्यंतरिक्षद्युनक्षत्रादित्यगतशुक्लभारू
पा पंचविधा ऋक्तत्कृत्स्नासाम चाग्निवाय्वादित्यचंद्रादित्यगतातिकृष्णरूपमुक्तं पंचविधं अध्यात्मकं तु ऋक् वाक्चक्षुः श्रोत्राक्षिस्थशुक्लभारू

तथाचाक्षुषे पुरुषे सैव ऋक् तत्साम तदुक्थ्यं तद्यजुस्तद्ब्रह्मेत्यृक्सामाद्यात्मकतां निर्धारयति। साच परमेश्वरस्योपपद्यते। सर्व
कारणत्वात्सर्वात्मकत्वोपपत्तेः। पृथिव्यग्न्याद्यात्मके चाधिदैवतमृक्सामे वाक्प्राणाद्यात्मके चाध्यात्ममनुक्रम्याह। तस्यर्क्च
सामच गेष्णावित्यधिदैवतं तथाध्यात्ममपि यावमुष्य गेष्णौ तौ गेष्णाविति तच्च सर्वात्मन एवोपपद्यते तद्य इमे वीणायां गायंत्येतं वै
ते गायंति तस्मात्ते धनसनय इति च। लौकिकेष्वपि गानेष्वस्यैव गीयमानत्वं दर्शयति तच्च परमेश्वरपरिग्रहे घटते॥ ॥
यद्याद्विभूतिमत्सत्वं श्रीमदूर्जितमेव वा तत्तदेवावगच्छत्वं मम तेजोंशसंभवमिति भगवद्गीतादर्शनात्। लोककामेशितृत्वमपिनि
रंकुशं श्रूयमाणं परमेश्वरं गमयति। यच्चूक्तं हिरण्यश्मश्रुत्वादिरूपश्रवणं परमेश्वरे नोपपद्यते। इत्यत्र ब्रूमः। स्यात्परमेश्वरस्या

पाच्चतुर्विधा साम च प्राणच्छायात्ममनोक्षिगतातिनीलरूपं चतुर्विधमुक्तं एवं क्रमेण ऋक्सामे नुक्रम्याह। श्रुतिस्तस्येति। योसर्वात्मक ऋक्सा
मात्मकौ गेष्णावमुष्यादित्यस्थस्य तावेवाक्षिस्थस्य गेष्णौ पर्वणीत्यर्थः तच्चेति। ऋक्सामगेष्ण्यत्वमित्यर्थः सर्वगातृगेयत्वं लिंगांतरमाह तद्य

इति। तत्त्वलोके धनस्यसनिर्लाभोएषांते धनसनयोविभूतिमंतइत्यर्थः॥ ॥ननुलोकेराजानोगीयंतेनेश्वरइत्याह। यद्यदिति। पशुवित्ता
दिर्विभूतिः श्रीकांतिःऊर्जितत्वंबलंतद्युक्तंसत्वंराजादिकंमदंशाएवेति तद्धानमीश्वरस्यैवेत्यर्थः निरंकुशमनन्याधीनंएषाविचित्ररूपामूर्ति
र्मायाविकृतित्वान्मायामयासृष्टेत्यर्थः यदुक्तमशब्दमित्यादिवाक्यंतज्ज्ञेयपरमित्याह। अपिचेति। तर्हिरूपंकुतः तत्राह। सर्वेति। यत्रतूपा-

पीच्छावशान्मायामयंरूपंसाधकानुग्रहार्थंमायाह्येषामयासृष्टायन्मांपश्यसिनारदेतिस्मरणात्। अपिचयत्रनिरस्तसर्ववि
शेषंपारमेश्वरंरूपमुपदिश्यतेभवतितत्रशास्त्रमशब्दमस्पर्शमरूपमव्ययमित्यादिसर्वकारणत्वात्तुविकारधर्मैरपिकैश्चि
द्विशिष्टः परमेश्वरउपास्यत्वेननिर्दिश्यते सर्वकर्मासर्वकामः सर्वगंधः सर्वरसइत्यादिना। तथाहिरण्यश्मश्रुत्वादिनिर्देशो
पिभविष्यति। यदप्याधारश्रवणान्नपरमेश्वरइत्यत्रोच्यते। स्वमहिमप्रतिष्ठस्याप्याधारविशेषोपदेशउपासनार्थोभविष्य-
ति। सर्वगतत्वाद्ब्रह्मणोव्योमवत्सर्वांतरत्वोपपत्तेः। ऐश्वर्यमर्यादाश्रवणमप्यध्यात्माधिदैवतविभागापेक्षमुपासनार्थमेवत
स्मात्परमेश्वरएवाक्ष्यादित्ययोरंतरुपदिश्यते॥ स्यत्वेनोच्यतेतत्रेत्यध्याह्रत्यसर्वकारणत्वात् मायारूपवत्त्वंसर्वकर्मेत्यादिश्रुत्या
निर्दिश्यतइति योजनामर्यादावदैश्वर्यमीश्वरस्यनेत्युक्तंनिराकरोति। ऐश्वर्येति। अध्यात्माधिदैवध्यानयोर्विभागः पृथक्प्रयोगः तदपेक्ष
मेवनत्वैश्वर्यस्यपरिच्छेदार्थमित्यर्थः॥ ॥ ॥

ननु उपास्योद्देशेनोपास्तिविधेर्विधेयक्रियाकर्मणोऽन्नीत्यादिवदन्यतः सिद्धिर्वाच्येत्याशंक्याह। भेदेति। आदित्यजीवादीश्वरस्य भेदोक्तेः।
श्रुत्यंतरे जीवादन्य ईश्वरः सिद्ध इति सूत्रार्थमाह। अस्तीति। आदित्ये स्थितरश्मिनिरासार्थमादित्यादंतर इति। जीवं निरस्यति। यमिति।
अशरीरस्य कथं नियंतृत्वं तत्राह। यस्येति। आंतर्यामिपदार्थमाह। य इति। तस्यानात्मत्वनिरासायाह। एष त इति। सेतुवत्स्वरूपभित्य

भेदव्यपदेशाच्चान्यः अस्ति चादित्यादिशरीराभिमानिभ्यो जीवेभ्योऽन्य ईश्वरोऽन्तर्यामी य आदित्ये तिष्ठन्नादित्याद्
तरो यमादित्यो न वेद यस्यादित्यः शरीरं य आदित्य मंतरो यमयत्येष त आत्मांतर्याम्य मृत इति श्रुत्यंतरे भेदव्यपदेशा
त्तत्रह्यादित्यादंतरो यं आदित्यो न वेदेति वेदितुरादित्यात् विज्ञानात्मनोऽन्योऽन्तर्यामी स्पष्टं निर्दिश्यते। स एवेहाप्यंत-
रादित्ये पुरुषो भवितुमर्हति। श्रुतिसामान्यात्तस्मात्परमेश्वर एवेहोपदिश्यत इति सिद्धं॥ आकाशस्तल्लिंगात्॥ ॥
इदमामनंत्यस्य लोकस्य का गतिरित्याकाश इति होवाच सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यंत आकाशं
प्रत्यस्तं यंत्याकाशो ह्येवैभ्यो ज्यायानाकाशः परायणमिति। तत्र संशयः। किमाकाशशब्देन परं ब्रह्माभिधीयते।

र्थः। आदित्यांतरत्वश्रुतेः समानत्वादित्यर्थः। तस्मात्पर एवादित्यादिस्थानकृत उद्गीथे उपास्य इति सिद्धं। भवतु रूपत्वाद्दुर्बललिंगानां पाश
स्पर्शितबाधव्यापारि ब्रह्मलिंगैरन्यथानयनं इह त्वाकाशपदश्रुतिः। लिंगाद्बलीयसीति प्रत्युदाहरणेन भासे भत्याह। आकाशस्तल्लिंगादिति।

छांदोग्यमुदाहरति। इदमिति। शालावत्योब्राह्मणोजैबलिंराजानंपृच्छति। अस्यपृथिवीलोकस्यान्यस्यन्वकआधारइतिराजाब्रूते। आकाशइतिहेतियदेषआकाशइत्याआनंदत्वस्यासाधारणस्यश्रवणादाकाशोब्रह्मेत्यवधारितं। आकाशोहवैनामेत्यत्रनब्रह्मेतिवाक्यशेषादितिचि-

उतभूताकाशमिति। कुतः संशयः। उभयत्रप्रयोगदर्शनात्। भूतविशेषेतावत्प्रसिद्धोलोकवेदयोराकाशशब्दः ब्रह्मण्यपिक्वचित्प्रयुज्यमानोदृश्यतेयत्रवाक्यशेषवशादसाधारणगुणश्रवणाद्वानिर्धारितंब्रह्मभवति। यथायदेषआकाशआनंदोनस्यादिति। आकाशोहवैनामनामरूपयोर्निर्वहितातेयदंतरातद्ब्रह्मेतिचैवमादावतःसंशयः। किंपुनरत्रयुक्तं। भूताकाशमिति। कुतः तद्धिप्रसिद्धतरेणप्रयोगेणशीघ्रंबुद्धिमारोहति। नचायमाकाशशब्दः उभयोः साधारणः शक्योविज्ञातुंअनेकार्थत्वप्रसंगात्। तस्माद्ब्रह्मणिगौणआकाशशब्दोभवितुमर्हति। विभुत्वादिभिर्हि बहुभिर्धर्मैः सदृशमाकाशेनब्रह्मभवति। नचमुख्यसंभवेगौणोर्थोग्रहणम र्हतिसंभवतिचेहमुख्यस्यैवाकाशस्य ग्रहणं॥

भागः। निर्वहिता। उत्पत्तिस्थितिहेतुः। ते। नामरूपेयदंतरायस्माद्भिन्नेयत्रकल्पितत्वेनमध्यस्तइतिवार्थः अत्रपूर्वपक्षे ९२
भूताकाशात्मनोहीर्योपास्तिः। सिद्धांतेब्रह्मात्मइतिफलम्॥ ॥ ॥

प्रास्येस्पष्टब्रह्मलिंगवाक्यसमन्वयोक्तेराप्रपादं श्रुत्यादिसंगतयस्पष्टमत्रभाष्यं तेजःप्रभृतिषु वाय्वादेरपिकारणत्वात् एवकारश्रुतिबाधः सर्वश्रुतेश्चाकाश
मिन्नविषयत्वेन संकोचस्यादित्याह। सत्यंदर्शितमिति। ब्रह्मणस्तु सर्वात्मकत्वात्तस्मादेवसर्वमितिश्रुतिर्न्यूनत्वेतिभावः। तथासर्वलयाधारत्वंनिरतिशयम

ननुभूताकाशपरिग्रहेवाक्यशेषोनोपपद्यते। सर्वाणिहवाइमानिभूतानिआकाशादेवसमुत्पद्यन्तइत्यादिः। नैषदोषोभूताकाशस्यापिवाय्वादिक्र
मेणकारणत्वोपपत्तेर्विज्ञायतेहितस्माद्वाएतस्मादात्मनआकाशःसंभूतः। आकाशाद्वायुः वायोरग्निरित्यादिज्यायस्त्वपरायणत्वे अपिभूतान्तरापे-
क्षयोपपद्येतेभूताकाशस्य। तस्मादाकाशशब्देनभूताकाशस्यग्रहणमित्येवंप्राप्तेब्रूमः। आकाशस्तल्लिंगात्। आकाशशब्देनब्रह्मणोग्रहणंयुक्तं
कुतस्तल्लिंगात्परस्यहिब्रह्मणइदंलिंगसर्वाणिहवाइमानिभूतानिआकाशादेवसमुत्पद्यन्तइतिपरस्माद्धिब्रह्मणोभूतानामुत्पत्तिरितिवेदान्तेषुम
र्यादा। ननुभूताकाशस्यापिवाय्वादिक्रमेणकारणत्वंदर्शितं। सत्यंदर्शितं। तथापि। मूलकारणस्यब्रह्मणोऽपरिग्रहादाकाशादेवेत्यवधारणं
सर्वाणीतिचभूतविशेषणंनानुकूलंस्यात्तथाकाशंप्रत्यस्तंयन्तीतिब्रह्मलिंगमाकाशोह्येवैभ्योज्यायानाकाशःपरायणमितिचज्यायस्त्वपरायण
त्वेज्यायस्त्वंह्यनापेक्षिकंपरमात्मन्येवैकस्मिन्नाम्नातंज्यायान्पृथिव्याज्यायानन्तरिक्षात्ज्यायान्दिवोज्यायानेभ्योलोकेभ्यइति। तथापरायणत्व
मपिपरमकारणत्वात्परमात्मन्येवोपपन्नतरंश्रुतिश्चभवतिविज्ञानमानंदंब्रह्मरातेर्दातुःपरायणमिति॥ इत्यस्फुटतार्थपरभाष्यमत्वमित्ये

तानिस्पष्टानिब्रह्मलिंगानीत्याह। तथाकाशमित्यादिना। गतेर्धनस्यदातुःरातिरितिपाठेबंधुरित्यर्थः॥ ८॥

लिंगांतरमाह। अपिचेति। दाल्भ्यशालावत्यौ ब्राह्मणौ राजा चेति त्रय उद्गीथविद्याकुशला विचारयामासुः। किमुद्गीथस्य परायणमिति। तत्र स्वर्गादागताभिरद्भिर्जीवितेन माणेन क्रियमाणोद्गीथस्य स्वर्ग एव परायणमिति दाल्भ्यपक्षमप्रतिष्ठादोषेण शालवत्यो निंदित्वास्त्वर्गस्यापि कर्मद्वारा हेतुरयं लोकः प्रतिष्ठेत्यवोचत्‌ शालावत्यस्य पक्षमंतवद्दोषेण किल शालावत्यसामेति राजा निंदित्वानंतमेवाकाशं वक्ति भूताकाशोक्तावंतवत्त्वदोषतादवस्थ्यादित्यर्थः नन्वाकाशोनंत इति न श्रुतं इत्याशंक्याह। तं चेति। उद्गीथ आकाश एवेति संपादनात्‌। उद्गीथस्यानंतत्वादिकं नस्वत इति भावः। उद्गीथावयव ओंकार

अपिचांतवत्त्वदोषेण शालावत्यस्य पक्षं निंदित्वानंतं किंचिद्वक्तुकामेन जैबलिनाकाशः परिगृहीतः तं चाकाशमुद्गीथे संपाद्योपसंहरति। स एष परोवरीयानुद्गीथः स एषोनंत इति। तच्चानंत्यं ब्रह्मलिंगं। यत्पुनरुक्तं भूताकाशं प्रसिद्धिबलेन प्रथमतरं प्रतीयत इति। अत्र ब्रूमः। प्रथमतरं प्रतीतमपि सद्वाक्यशेषगतान्‌ ब्रह्मगुणान्‌ दृष्ट्वा न परिगृह्यते॥ ॥

एष आकाशात्मकः परः रसतमत्वादिकगुणैरुत्कृष्टः। अतोक्षरांतरेभ्यो वरीयान्‌ श्रेष्ठ इत्यर्थः। पर इति। अव्ययं सकारांतं वा परः कृष्णामिनि प्रयोगात्‌ परश्चासौ वरेभ्योतिशयेन वरः परोवरीयानित्यर्थः प्राथम्यात्‌ श्रुतित्वाच्चाकाशशब्दो बलीयानित्युक्तं। स्मारयति। यत्पुनरिति। एवकारसर्वशब्दानुगृहीतानंत्यादिबहुलिंगानामनुग्रहाय त्यजेदेकं कुलस्यार्थे इति न्यायेनैकस्याः श्रुतेर्बाधो युक्त इत्याह। अत्र ब्रूम इति॥ ॥ ॥ ९३

आकाशपदाद्भूतस्यैव प्रथमप्रतीतिनियमो नास्तीत्यपिशब्देन द्योतितं। तत्र युक्तिमाह। दर्शितश्चेति। आकाशपदाद्गौणार्थस्य ब्रह्मणोऽपि प्रथमप्रतीति रस्ति तस्य तत्पर्यायाणां च ब्रह्मणि प्रयोगप्राचुर्यादिति भावः। अक्षरे कूटस्थे व्योमन् व्योम्नि ऋचो वेदाः संति प्रमाणत्वेन यस्मिन्नक्षरे विश्वे देवा अधिष्ठिता इत्यर्थः। ॐकारः कं सुखं खं खं ब्रह्म खं व्यापकमित्युपास्ती। श्रुत्यंतरप्रयोगमाह। खंपुराणमिति। व्याप्यनादिब्रह्मेत्यर्थः। कं ब्रह्म खं ब्रह्मेति छांदोग्ये ॐ

दर्शितश्च ब्रह्मण्यप्याकाशशब्दः आकाशो ह वै नाम नामरूपयोर्निर्वहितेत्यादौ। तथाकाशपर्यायवाचिना मपि ब्रह्मणि प्रयोगो दृश्यते। ऋचो अक्षरे परमे व्योमन् यस्मिन्देवा अधि विश्वे निषेदुः सैषा भार्गवी वारुणी विद्या परमे व्योमन् प्रतिष्ठिता ॐ कं ब्रह्म खं ब्रह्म खं पुराणमिति चैवमादौ वाक्योपक्रमे वर्तमानस्याकाशश- ब्दस्य वाक्यशेषवशाद्युक्ता ब्रह्मविषयत्वावधारणा। अग्निरधीतेऽनुवाकमिति हि वाक्योपक्रमगतोऽप्यग्निश ब्दो माणवकविषयो दृश्यते। तस्मादाकाशं ब्रह्मेति सिद्धं

खं ब्रह्म खं पुराणमिति बृहदारण्यकमिति भेदः। किंच तत्रैव प्रथमानुसारेणोत्तरं नेयं। यत्र तन्नेतुं शक्यं यत्र त्वशक्यं तत्रोत्तरानुसारेण प्रथमं नेयमित्या ह। वाक्येति। तस्मादुपास्ये ब्रह्मणि वाक्यं समन्वितमित्युपसंहरति। तस्मादिति॥ ॥ ॥

आकाशवाक्योक्तन्यायंतदुत्तरवाक्येऽतिदिशति। अतएवप्राणः। उद्गीथप्रकरणमिदमितिज्ञापनार्थमुद्गीथइतिभाष्यपदं उद्गीथप्रकरणेश्रूयतइत्य-
न्वयः। कश्चिदुषस्तिश्चाक्रायणः प्रस्तोतारमुवाचहेप्रस्तोतः यादेवताप्रस्तावंसामभक्तिमनु: तांध्यानार्थंतांचेदज्ञात्वाममाविदुषोनिकटेप्रस्तोष्यसिमू-
र्धातेविपतिष्यतीतिततोभीतः सन्प्रच्छकतमासादेवतेतिउत्तरंप्राणइतिप्राणमभिलक्ष्यसम्यक्विशन्तिनिर्यन्तेतमभिलक्ष्योज्जिहतेउत्पद्यन्तइत्यर्थः

अतएवप्राणः। उद्गीथेप्रस्तोतर्यादेवताप्रस्तावमन्वायत्तेत्युपक्रम्यश्रूयतेकतमासादेवतेतिप्राणइतिहोवाचसर्वाणिहवाइमानिभू-
तानिप्राणमेवाभिसंविशन्तिप्राणमभ्युज्जिहतेसैषादेवताप्रस्तावमन्वायत्तेति। तत्रसंशयनिर्णयौपूर्ववदेवद्रष्टव्यौप्राणबंधनं-
हिसोम्यमनः प्राणस्यप्राणमितिचैवमादौब्रह्मविषयः प्राणशब्दोदृश्यते। वायुविकारेतुप्रसिद्धतरोलोकवेदयोरतइहप्राणश-
ब्देनकतरस्योपादानंयुक्तमितिभवतिसंशयः किंपुनरत्रयुक्तं वायुविकारस्यपंचवृत्तेःप्राणस्योपादानंयुक्तंतत्रप्रसिद्धतरः प्राण
शब्दइत्यवोचाम। ननुपूर्ववदिहापितल्लिंगाद्ब्रह्मण एवग्रहणंयुक्तमिहापिवाक्यशेषेभूतानांसंवेशनोद्गमनं पारमेश्वरंकर्मप्रतीयते

अतिदेशत्वात्। पूर्ववत्संशयादिद्रष्टव्यमित्युक्तं विवृणोति। प्राणेति। मनउपाधिकोजीवः प्राणेनब्रह्मणाबध्यते। सुषुप्तावेकीभवति। प्राणस्यवायोः
प्राणंप्रेरकंतस्यसस्फूर्तिप्रदमात्मानंयेनिदुस्तेब्रह्मविदइत्यर्थः पूर्वेणगतार्थत्वात् पृथक्सूत्रंव्यर्थमितिशंकते। ननुपूर्ववदिति॥ ॥
॥ ॥ ॥

अधिकाशंकानिरासार्थमतिदेशसूत्रमितिमत्वाशंकामाह । नमुख्येपीति । तर्हितदावक्षुरप्येतीतिसर्वत्रसंबंधः । नन्वथेंद्रियाणांप्राणेलयोदयौश्रू
येतेतावतात्महाभूतलयादिप्रतिपादकवाक्यशेषोपपत्तिः कथमित्यतआह । इंद्रियसारत्वादिति । अस्यस्वेोपरसइतिश्रुतेः । इंद्रियाणिलिंगात्मरूपा

नमुख्येपिप्राणेभूतसंवेशनोद्गमनस्यदर्शनादेवंत्याम्नायते । यदावैपुरुषःस्वपितिप्राणंतर्हिवागप्येति
प्राणंचक्षुः प्राणंश्रोत्रंप्राणंमनः सयदाप्रबुध्यतेप्राणादेवाधिपुनर्जायंतइतिप्रत्यक्षंचैतत्स्वापकालेप्रा
णवृत्तावपरिलुप्यमानायामिंद्रियवृत्तयःपरिलुप्यंते । प्रबोधकालेचप्रादुर्भवंतीति । इंद्रियसारत्वाच्चभू
तानामविरुध्दोमुख्येप्राणेपिभूतसंवेशनोद्गमनवादीवाक्यशेषः ॥ आदित्योन्नंचोद्गीथप्रतिहारयोर्दे
वतेप्रस्तावदेवतायाःप्राणस्यानंतरंनिर्दिश्येते ॥ नचतयोर्ब्रह्मत्वमस्तितत्सामान्याच्चप्राणस्यापिनब्रह्मत्व

णि अपंचीकृतभूतांशसाराणितेषांलयाद्युक्त्याभूतानामपिप्राणेलयादिसिध्देः वाक्यशेषोपपत्तिरित्यर्थः ॥ ॥

अब्रह्मसहपाठाश्च प्राणोनब्रह्मेत्याह। अपिचेति। उद्गातृप्रतिहर्तृभ्यामुद्गीथेमतिहार्यचकादेवतेति पृष्टेनचाक्रायणेनादित्योन्नंच निर्दिश्यते। आदित्यइ
तिहोवाचान्नमितिहोवाचेतिश्रुताविव्यर्थः सामान्यंसन्निधानंसन्निध्यनुगृहीतप्रथमश्रुतप्राणश्रुत्यामुख्यप्राणनिर्णयेतत् दृष्ट्याप्रस्तावोपास्तिरि
तिपूर्वपक्षफलं सिध्दांतेब्रह्मदृष्टिरूपोपास्तिः अस्याधिकरणस्यातिदेशत्वमेवपूर्वेणसंगतिरितिविभागः। भवंतीतिभूतानीतिव्युत्पत्त्यायात्किंतत्प्र-

मिस्थेवंप्राप्तेसूत्रकारआह। अतएवप्राणइति। तल्लिंगादितिपूर्वसूत्रेनिर्दिष्टमतएवतल्लिंगात्प्राणशब्दमपिपरंब्रह्मभवितु
मर्हति प्राणस्यापिहिब्रह्मलिंगसंबंधः श्रूयतेसर्वाणिहवाइमानिभूतानिप्राणमेवाभिसंविशंतिप्राणमभ्युज्जिहतइतिप्रा
णाभिमित्तौसर्वेषांभूतानामुत्पत्तिप्रलयावुच्यमानौप्राणस्यब्रह्मलांगमयतः। ननूक्तंमुख्यप्राणपरिग्रहेपिसंवेशनोद्गमनद
र्शनमविरुध्धंस्वापप्रबोधयोर्दर्शनादिति। अत्रोच्यते। स्वापप्रबोधयोरिंद्रियाणामेवकेवलानांप्राणाश्रयसंवेशनोद्गमनंदृश्य
तेनसर्वेषांभूतानांइहतुसेंद्रियाणांसशरीराणांचजीवविष्टानांभूतानांसर्वाणि हवाइमानि भूतानीतिश्रुतेः। यदापिभूतश्रुतिः
महाभूतविषयापरिगृह्यते। तदापिब्रह्मलिंगत्वमविरुध्धं॥

ननधर्मकंकार्यमात्रंतस्यलयोदयौवायुविकारेप्राणेनयुक्तावित्यु-
क्ताभूतशब्दस्यरूढार्थग्रहेपिलयादेर्ब्रह्मनिर्णायकत्वमित्याह। यदापीति। भौतिकप्राणस्यभूतयोनित्वायोगादित्यर्थः॥ ॥ ॥ १५
॥ ॥ ॥

तस्यतद्योनित्वंश्रुत्याशंकते। नन्विति। अथयदासुप्तोजीवः प्राणेब्रह्मण्येकीभवतितदाएनंप्राणंसविषयावागादयोपियंतीत्यर्थः अत्रजीवाभिन्नत्वसर्वरूयाधारत्वलिंगान्नमुख्यः प्राणइत्याह। तत्रापीतिवाक्यांतरसंनिध्यपेक्षयास्ववाक्यगतंलिंगंबलीयइत्याह। तदयुक्तमिति। एकवाक्यत्वंवाक्यशेषः

ननुसहापिविषयैरिंद्रियाणांस्वापप्रबोधयोः प्राणेप्ययंप्राणाच्चप्रभवंश्रृणुतःयदासुप्तः स्वप्नंनकंचनपश्यत्यथास्मिन्प्राणएवैकदाभवति तदैनंवाकूसर्वैर्नामभिः सहाप्येतीति। तत्रापितल्लिंगात्प्राणशब्दोब्रह्मैव यत्पुनरन्नादित्यसन्निधानान्प्राणस्याब्रह्मत्वमिति। यदुक्तं। वाक्यशेषबलेनप्राणशब्दस्यब्रह्मविषयतायांप्रतीयमानायांसंनिधानस्याकिंचित्करत्वात्। यत्पुनःप्राणशब्दस्यपंचवृत्तौप्रसिध्दतरत्वं। तदाकाशशब्दस्येवप्रतिविधेयं। तस्मात्सिध्दंप्रस्तावदेवतायाःप्राणस्यब्रह्मत्वम्। अत्रकेचिदुदाहरंति। प्राणस्यप्राणंप्राणबंधनंहिसोम्यमनइतिच। तदयुक्तं। शब्दभेदात्प्रकरणाच्चसंशयानुपपत्तेः यथापितुःपितेतिप्रयोगेन्योपितापष्ठीनिर्दिष्टोन्यः प्रथमानिर्दिष्टः पितुःपितेतिगम्यते। तद्वत्प्राणस्यप्राणमितिशब्दभेदात्। प्रसिध्दात्प्राणादन्यःप्राणस्यप्राणइतिनिश्चीयते। नहिएकःसएवतस्येति भेदनिर्देशार्होभवति॥

तस्यबलंतद्भूतं लिंगंतेनेत्यर्थः। प्राणएवेत्यवधारणेनसर्वभूतप्रकृतित्वलिंगेनचप्राणपदेनतत्कारणंब्रह्मलक्ष्यमित्याह। तदाकाशशब्दस्येवेति। वृत्तिकृतामुदाहरणंसंशयाभावेनायुक्तमित्याह। अत्रेत्यादिना॥ ॥ ॥

शब्दभेदमुक्त्वा प्रकरणं प्रपंचयति। यस्य चेति। ज्योतिश्चरणाभिधानात् छांदोग्यमेवोदाहरति। इदमिति। गायत्र्युपाधिकब्रह्मोपास्यानंतर्यार्थोऽथ शब्दः अतो दिवोद्युलोकात्परः परस्ताद्यत् ज्योतिर्दीप्यते तदिदमिति जागराग्नावध्यस्यते कुत्र दीप्यते तत्राह। विश्वतइति। विश्वस्मात्प्राणिवर्गादु-

यस्य च प्रकरणे यो निर्दिश्यते नामांतरेणापि स एव तत्र प्रकरणी निर्दिष्ट इति गम्यते। यथा ज्योतिष्टोमाधिकारे वसंते वसंते ज्योतिषा यजेतेत्यत्र ज्योतिःशब्दो ज्योतिष्टोमविषयो भवति। तथा परस्य ब्रह्मणः प्रकरणे प्राणबंधनं हि सोम्य मन इति श्रुतेः प्राणशब्दो वायुविकारमात्रं कथमवगमयेदतः संशयाविषयत्वान्नैतदुदाहरणं युक्तं प्रस्तावदेवतायां तु प्राणे संशयपूर्वपक्षनिर्णया उपपादिताः। ज्योतिश्चरणाभिधानात् इदमामनंति। अथ यदतः परो दिवो ज्योतिर्दीप्यते विश्वतः पृष्ठेषु सर्वतः पृष्ठेष्वनुत्तमेषूत्तमेषु लोकेष्विदं वाव तद्यदिदमस्मिन्नंतः पुरुषे ज्योतिरिति। अत्र संशयः। किमिह ज्योतिःशब्देनादित्यादि ज्योतिरभिधीयते। किंवा परमात्मेति। अर्थांतरविषयस्यापि शब्दस्य तल्लिंगात्। ब्रह्मविषयत्वमुक्तं। इह तल्लिंगमेवास्ति नास्तीति विचार्यते। किं तावत्प्राप्तं। आदित्यादिकमेव ज्योतिःशब्देन परिगृह्यत इति। कुतः। प्रसिद्धेः। तमो ज्योतिरिति ह्येतौ शब्दौ परस्परप्रतिद्वंद्विविषयौ प्रसिद्धौ॥ परि सर्वस्मात् भूरादिलोकादुपरि ये लोकास्तेषूत्तमेषु न विद्यंते उत्तमा येभ्य इत्यनुत्तमेषु सर्वसंसारमंडलातीतं परं ज्योतिरिदमेव यद्देहस्थमित्यर्थः। अस्य पूर्वेणागतार्थत्वं वदन्प्रत्युदाहरणसंगतिमाह। अर्थांतरेति अत्र स्ववाक्ये स्पष्टब्रह्मलिंगाभावेऽपि पादोऽस्येति पूर्ववाक्यभूतपादत्वं लिंगमस्तीति पादसंगतिः। पूर्वोत्तरपक्षयोर्जडब्रह्मज्योतिषोरुपास्तिः फलमिति भेदः॥ ॥ १९

ननुअज्ञानतमोविरोधितत्वात् ब्रह्मापिज्योतिःपदशक्यतयाप्रसिद्धमस्तीत्याह। चक्षुरिति। शर्वर्यांरात्रौभवंशार्वरंनीलमित्यावत्। अनेनावर कत्वाद्रूपवत्त्वाच्चकुड्यवत्पादावरूपंतमइत्यर्थादुक्तंभवति। ज्योतिश्रुतेरनुग्राहकलिंगान्याह। तथेत्यादिना। भास्वररूपात्मिकादीप्तिस्तेजस एवलिंगमित्याह। नहीति। मास्तुमर्यादेत्याशंक्यश्रुतत्वान्मैवमित्याह। परोदिवइति। मर्यादांब्रूतइतिशेषः। ब्रह्मवत्कार्यस्यापिमर्यादायोग

चक्षुर्वृत्तेर्निरोधकंशार्वरादिकंतमउच्यते तस्याएवानुग्राहकमादित्यादिकंज्योतिः तथादीप्यतइतीयमपिश्रुतिरादि-
त्यादिविषयाप्रसिद्धा। नहिरूपादिहीनंब्रह्मदीप्यतइतिमुख्यांश्रुतिमर्हति धुमर्यादत्वश्रुतेश्च। नहिचराचरबी
जस्यब्रह्मणः सर्वात्मकस्यद्यौर्मर्यादायुक्ताकार्यस्यतुज्योतिषः परिच्छिन्नस्यद्यौर्मर्यादास्यात्परोदिवोज्योतिरितिच
ब्राह्मणं। ननुकार्यस्यापिज्योतिषःसर्वत्रगम्यमानत्वात् धुमर्यादावत्वमसमंजसं। अस्तुतर्ह्यत्रिवृत्कृतं तेजःप्रथ
मजंनात्रिवृत्कृतस्यतेजसः प्रयोजनाभावादिति। इदमेवप्रयोजनं यदुपास्यत्वमितिचेन्न। प्रयोजनांतरप्रयुक्तस्यै
वादित्यादेरुपास्यत्वदर्शनात्॥ ॥ ॥

न्निरर्थकंब्राह्मणमितिकश्चिदाक्षिपति। नत्विति। एकदेशीब्रूते। अस्त्विति। सर्गादौजातंकिंचिदतीन्द्रियंतेजोदिवः परस्तादस्तिश्रुतिप्रामा ण्यादित्यर्थः अध्ययनविध्युपात्तश्रुतेर्निष्फलंवस्तुनार्थइत्याक्षेप्ताब्रूते। नेति। ध्यानंफलमित्याशंक्यनिष्फलस्यक्वापिध्यानंनास्तीत्याह। इदमेवे त्यादिनाप्रयोजनांतरंतमोनाशादिकं॥ ॥ ॥

अत्रिवृत्कृतंतेजोंगीकृत्याफलत्वमुक्तांतदेवनास्तीत्याह। तासामिति। तेजोबन्नानांदेवतानांमेकैकांद्विधाविभज्य पुनश्चैकैकंभागं द्वेधाकृत्वास्व-
भागादितरभागयोर्निक्षिप्यतत्रिगुणरज्जुवत्रिवृतंकरवाणीत्यविशेषोक्तेर्नास्त्यत्रिवृत्कृतंकिंचिदित्यर्थः किंचात्रयदतः परइतियच्छब्देनान्यतःप्र-
सिद्धंद्युमर्यादत्वंध्यानायानूद्यते। नचात्रिवृत्कृतस्यतत्प्रसिद्धंक्वचिदित्याह। नचेति एकदेशिमतेनिरस्तेसाक्षात्पूर्वपक्षीब्रूते। अस्त्विति। प्रदे-

तासांत्रिवृतंत्रिवृतमेकैकांकरवाणीतिचाविशेषश्रुतेः। नचात्रिवृत्कृतस्यापितेजसोद्युमर्यादत्वंप्रसिद्धम्॥ अस्तु
तर्हित्रिवृत्कृतमेवतेजोज्योतिःशब्दं। ननूक्तमर्वागपिदिवोवगम्यतेअग्न्यादिकंज्योतिरिति। नैषदोषः सर्वत्रापिगम्य
मानस्यज्योतिषःपरोदिवइतिउपासनार्थःप्रदेशविशेषपरिग्रहोनविरुध्यते। ननुनिष्प्रदेशस्यब्रह्मणःप्रदेशविशेष
कल्पनाभागिनीसर्वतःपृष्ठेष्वनुत्तमेषूत्तमेषुलोकेष्वितिचाधारबहुत्व

शविशेषःतस्यपरिग्रहउपासनार्थोनविरुध्यतेइत्य
न्वयः। सएवकौक्षेयज्योतिश्चउपास्यते तस्यापितेजस्त्वादितिभावः। ब्रह्मणोपिध्यानार्थंप्रदेशस्थत्वंकल्प्यतांनेत्याह। नन्विति। निष्प्रदेशस्य
निरवयवस्य। विशेषेति। दिवःपरस्ताद्दीप्यमानब्रह्मावयवकल्पनाभागिनीस्यात्तानत्वित्यन्वयः अप्रामाणिकगौरवापातादितिभा-
वः॥ ॥ ॥ ॥ ॥

ततः किंतत्राह। सारूप्येति। यथाएकत्वसाम्याद्भूरितिव्याहृतौप्रजापतेः शिरोदृष्टिः श्रुता। तथाजाठराग्नावब्रह्मत्वं घोषादिश्रुत्याप्रसि
द्धमपित जडज्योतिष्ट्वंसाम्यंवाच्यमित्यर्थः यद्देहस्पर्शेनौष्ण्यज्ञानंप्रसिद्धंसैषातस्यजाठराग्नेर्दृष्टिः यत्कर्णापिधानेनघोषश्रवणंसैषातस्य
श्रुतिरित्यर्थः ज्योतिषोजडत्वेलिंगांतरमाह। तदेतदिति। ज्योतिरित्यर्थः चक्षुष्यश्चक्षुर्हितः सुंदरः श्रुतोविख्यातः। नचान्यदपीति। श्रु-
श्रुतिः कार्येज्योतिष्युपपद्यतेतद्यामिदंवावतद्यदिदमस्मिन्नंतः पुरुषोज्योतिरितिचकौक्षेयज्योतिषिपरंज्योतिरध्यस्यमानं दृश्यते
सारूप्यनिमित्ताश्चाध्यासाभवंति। यथातस्यभूरितिशिरएकंहिशिरएकमेवतदक्षरमिति। कौक्षेयस्यतुज्योतिषः प्रसिद्धमब्रह्मत्वं तस्यै
षादृष्टिस्तस्यैषाश्रुतिरिति चौष्ण्यघोषविशिष्टत्वस्यश्रवणात्। तदेतद्दृष्टंचश्रुतंचेत्युपासीतेतिचश्रुतेश्चक्षुष्यः श्रुतोभवतिचएवंवेदेतिचा
ल्पफलत्वश्रवणादब्रह्मत्वं। महतेहिफलायब्रह्मोपासनमिष्यते। नचान्यदपिकिंचित्स्ववाक्येप्राणाकाशवज्ज्योतिषोऽस्तिब्रह्मलिंगं नच
पूर्वस्मिन्नपिवाक्येब्रह्मनिर्दिष्टमस्ति। गायत्रीवाइदंसर्वंभूतमितिछंदोनिर्देशात्। अथापिकथंचित् पूर्वस्मिन्वाक्येब्रह्मनिर्दिष्टंस्यात्
एवमपिनतस्येहप्रत्यभिज्ञानमस्ति। तत्रहित्रिपादस्यामृतंदिवीतिद्यौरधिकरणत्वेनश्रूयते। अत्रपुनः परोदिवो ज्योतिरितिद्यौर्मर्या-
देन। तस्मात्प्राकृतंज्योतिरिहग्राह्यमित्येवंप्राप्तेब्रूमःज्योतिरिहब्रह्मग्राह्यं। कुतः। चरणाभिधानात्॥ द्बलिंगमपिकिंचिदन्यन्नास्तीत्यन्व
यः। ननुत्रिपादस्यामृतंदिवीतिपूर्ववाक्योक्तंब्रह्मात्रज्योतिः पदेनगृह्यतामित्याशंक्याह। नत्वेतिनतुसर्वात्मकत्वामृतत्वाभ्यांब्रह्मोक्तमित्यत आह अंशापेक्ष
कथंचिच्छंदोभ्रूरित्यर्थः। दिविदिवइतिविभक्तिभेदात्प्रत्यभिज्ञेत्यर्थः। प्रकृतेजातंप्राकृतंकार्यमित्यर्थः॥ ७॥

भ्त्वारंनिरस्यति। पादेतिगायत्रीवाइदंसर्वंभूतंयदिदंकिंचवाग्वैगायत्री येयंपृथिवीयादिदंशरीरयदस्मिन्पुरुषेत्हृदयमस्मिन्प्राणाइतिभूतवाक्।
पृथिवीशरीरहृदयप्राणात्मिकाषड्विधाषड्भिरक्षरैश्चतुष्पदागायत्रीति यदुक्तं तावान्तत्परिमाणः सर्वःप्रपंचोस्यगायत्र्यनुगतस्य ब्रह्मणोम
हिमाविभूतिः।पुरुषस्तुपूर्णब्रह्मरूपः।अतःप्रपंचाज्ज्यायांनधिकः।आधिक्यमेवाह।पादइतिसर्वंजगदेकःपादोंशः विष्टभ्याहमिदंकृत्स्नमे
कांशेनस्थितोजगदितिस्मृतेःअस्यपुरुषस्यदिविस्वप्रकाशस्वरूपेत्रिपादमृतंरूपमस्ति। दिविसूर्यमंडलेवाध्यानार्थमस्तिकल्पिताज्जग-

पादाभिधानादित्यर्थः।पूर्वस्मिन्हिवाक्येचतुष्पाद्ब्रह्मनिर्दिष्टं तावानस्यमहिमाततोज्यायांश्चपुरुषःपादोस्यसर्वाभूतानि
त्रिपादस्यामृतंदिवीत्यनेनमंत्रेण।तत्रयत्चतुष्पदोब्रह्मणस्त्रिपादमृतंद्युसंबंधिरूपंनिर्दिष्टंतदेवेह द्युसंबंधात्निर्दिष्ट
मितिप्रत्यभिज्ञायते तत्परित्यज्य प्राकृतंज्योतिःकल्पयतःप्रकृतहानाप्रकृतप्रक्रिये प्रसज्जेयाताम्॥

तोब्रह्मस्वरूपमनंतमस्तीत्यर्थः। यथालोकेपादात्पादत्रयमधिकंतथेदमधिकमितिबोधनार्थंत्रिपादमृत मित्युक्तं नत्रिपात्वंविवक्षितमितिमं-
तव्यं यदतःपरइति। यच्छब्दस्य प्रसिद्धार्थवाचित्वात्पूर्ववाक्यप्रसिद्धंब्रह्मग्राह्यमित्याह। तत्रेति। ननुयदाग्नेयोष्टाकपालइत्यत्र यत्पदस्याप्रकृता
र्थकत्वंदृष्टमित्यतआह। तत्रयागस्यान्यतःप्रसिद्धेरभावेनापूर्वत्वादगत्यायदोप्रसिद्धार्थत्वमाश्रितंइहतुपूर्ववाक्येप्रसिद्धस्य ब्रह्मणो द्युसंबंधेन १८
प्रत्यभिज्ञातस्ययदर्थत्वनिश्चयाद्यत्पदैकार्थकज्योतिःपदस्यापिसएवार्थ इत्यर्थः॥ ॥ ॥

संदंशन्यायादप्येवमित्याह। नकेवलमिति। सर्वंखल्विदंब्रह्मेत्यत्रत्यब्रह्मानुवृत्तेर्मध्यस्थंज्योतिर्वाक्यंब्रह्मपरमित्यर्थः। प्रकरणादिति। प्रकृतापेक्षयसख्यु-
त्याद्यसंबंधभूतपादत्वादिलिंगेश्चेत्यर्थः अतः प्रकरणाज्ज्योतिः श्रुतिबाधोनयुक्तइतिनिरस्तम्। अविशेषकत्वादितिब्रह्मव्यावर्तकत्वाभावादित्यर्थःयेन

नकेवलंज्योतिर्वाक्यएवब्रह्मानुवृत्तिः परस्यामपिशांडिल्यविद्यायामनुवर्तिष्यते ब्रह्म। तस्मादिहज्योतिरितिब्रह्मप्रतिपत्तव्यं
यत्तूक्तंज्योतिर्दीप्यतइतिचएतौशब्दौकार्यज्योतिषिप्रसिध्दाविति। नायंदोषः प्रकरणात् ब्रह्मावगमेसत्यनयोःशब्दयोरविशेष
कत्वात्। दीप्यमानकार्यज्योतिरुपलक्षितेचब्रह्मण्यपिप्रयोगसंभवात्। येनसूर्यस्तपतितेजसेध्दः इतिचमंत्रवर्णात्। यद्वानायं
ज्योतिः शब्दश्चक्षुर्वृत्तेरेवानुग्राहकेतेजसिवर्तते। अन्यत्रापिप्रयोगदर्शनात्। वाचैवायंज्योतिषा ऽऽस्तेमनोज्योतिर्जुषतामितिच
तस्मात्यद्यत्कस्यचिदवभासकंतत्तज्ज्योतिः शब्देनाभिधीयतेतथासतिब्रह्मणोपिचैतन्यरूपस्यसमस्तजगदवभासहेतु-
त्वादुपपन्नोज्योतिः शब्दःतमेवभांतमनुभातिसर्वम्॥

तेजसाचैतन्येनेध्दः प्रकाशितःसूर्यस्तपतिप्रकाशयति तेवहंतमवेदविन्मन
नुतइत्यर्थः ज्योतिः शब्दस्यकार्यज्योतिष्येवशक्तिरित्यंगीकृत्यकारणब्रह्मलक्षकत्वमुक्त्वाब्रह्मण्यपिशक्तिमाह। यद्वेति गाढांधकारेवाचैवज्यो-
तिषालोकआसनादिव्यवहारंकरोतीत्यर्थः आज्यंजुषतांपिबतांमनोज्योतिः प्रकाशकंभवतीत्यर्थः ॥ ॥

शा०भा० अर्थाद्यत्पदसामानाधिकरण्यादित्यर्थः छंदोभिरधानात् ब्रह्मप्रकृतंनास्तीतिशंकामेकदेशीदूषयति कथमिति। शंकांसाधयति नैतदित्यादिना चतुष्प अ०३
१०० दत्वादिकंपूर्वमेवव्याख्यातं यएतामेवमिति वेदरहस्यभूतां मधुविद्यामेवमुक्तरीत्यायकश्चिद्वेदतस्योदयास्तमयरहितब्रह्मप्राप्तिर्भवतीत्यर्थः न

अर्थाज्ज्योतिःशब्दस्यापिब्रह्मविषयत्वोपपत्तेः तस्मादिहज्योतिरितिब्रह्मैवप्रतिपत्तव्यं। छंदोभिधानान्नेतिचेन्नतथाचेतोर्पणनि-
गदात्तथाहिदर्शनं। २५ अथयदुक्तंपूर्वस्मिन्नपिवाक्येनब्रह्माभिहितमस्तिगायत्री वाइदंसर्वंभूतं यदिदंकिंचेति गायत्र्याख्य
स्यछंदसोभिहितत्वादिति। तत्परिहर्तव्यं। कथंपुनःछंदोभिधानान्नब्रह्माभिहितमितिशक्यतेवक्तुं यावतातावानस्यमहिमेत्ये
तस्यामृचिचतुष्पाद्ब्रह्मदर्शितंनैतदस्ति गायत्रीवाइदंसर्वमितिगायत्रीमुपक्रम्यतामेवभूतपृथिवीशरीरहृदयवाक्प्राणप्रभेदै
र्व्याख्यायसैषा चतुष्पदाषड्विधागायत्रीतदेतदृचाभ्यनूक्तं। तावानस्यमहिमेतितस्यामेवव्याख्यानरूपायांगायत्र्यामुदाहृतोमं-
त्रः कथमकस्माद्ब्रह्मचतुष्पदमभिदध्यात्। योपितत्रयद्वैतद्ब्रह्मेतिब्रह्मशब्दः सोपिछंदसःप्रकृतत्वात् छंदोविषयएव। यए
तामेवंब्रह्मोपनिषदंवेदेत्यत्रहिवेदोपनिषदमितिव्याचक्षते। तस्माच्छंदोभिधानान्नब्रह्मणःप्रकृतत्वमितिचेन्नैषदोषः। तथाचे-
तोर्पणनिगदात्तथागायत्र्याख्यछंदोद्वारेणतदनुगतेब्रह्मणिचेतसोर्पणंचित्तसमाधानमनेनब्राह्मणवाक्येननिगद्यते। गायत्री १००
वाइदंसर्वमिति॥ थाचवेदत्वात् गायत्र्यांब्रह्मशब्दोयुक्तइतिभावः॥७॥ ॥७॥ ॥७॥

गायत्रीशब्देनतदुपादानत्वेनानुगतब्रह्मलक्षणायांबीजंअनुपपत्तिमाह नत्यक्षरेति ब्रह्मणोपिकथंसर्वात्मकत्वंतत्राह कार्यंचेति। नचगायत्र्या ध्यानार्थंसर्वात्मत्वारोपइतिवाच्यं स्वतःसर्वात्मनोध्यानसंभवेनासदारोपायोगादितिभावः तथाहिदर्शनमितिसूत्रशेषंव्याचष्टे तथान्यत्रेतिद

नत्यक्षरसन्निवेशमात्रायाः गायत्र्याः सर्वात्मकत्वंसंभवति तस्माद्यद्गायत्र्याख्य विकारेनुगतंजगत्कारणंब्रह्मनिर्दिष्टं तदिहसर्वमित्युच्यते यथासर्वंनखल्विदंब्रह्मेतिकार्यंचकारणादव्यतिरिक्तमितिवक्ष्यामः तदनन्यत्वमारंभणशब्दादिभ्यइत्यत्र। तथान्यत्रापिविकारद्वारेणब्रह्मणउपासनंदृश्यते। एतंह्येवबह्वृचोमहत्युक्थेमीमांसंते एतमग्नावध्वर्यएतंमहाव्रतेछंदोगाइति। तस्मादस्तिछंदोभिधानेपिपूर्वस्मिन्वाक्येब्रह्मनिर्दिष्टं तदेवज्योतिर्वाक्येपिपरामृश्यते। उपासनांतरविधानाय॥

श्यतइति। दर्शनंदृष्टमित्यर्थः एतंपरमात्मानंऋचोऋग्वेदिनोमहत्युक्थेशास्त्रेतदनुगतमुपासते एतमेवाग्निरहस्येतमेतमग्निरित्यध्वर्यवउपासतइतिश्रुतेःयजुर्वेदिनोग्नौउपासते एतमेवछंदोगाःसामवेदिनोमहाव्रते क्रतौउपासतइत्यैतरेयके दृष्टमित्यर्थः॥ ॥७॥ ॥ ॥ ॥ ॥

गायत्रीशब्दोब्रह्मलक्षकइतिव्याख्यायगौणइत्याह अपरइति साक्षादेववाच्यार्थग्रहणंत्रिनैवेतियावत् पूर्वंतूपास्यतयागायत्रीपदेनाजहल्लक्षणयागायत्रीब्रह्मणीद्वे अपिलक्षितेनचगायत्रीसर्वमित्यन्वयासंभवः घटोरूपीति पदार्थैकदेशेव्यक्तौरूपान्वयवद्गायत्रीपदार्थैकदेशेगायत्र्यनुगतेब्रह्मणिप्रधानेसर्वात्मकत्वान्वयसंभवादितिभावः तथाचसूत्रेसिध्दांतभागस्यायमर्थः तथागायत्रीवच्चतुष्पात्वगुणसामान्याच्चेतोब्रह्मणिसमर्प्यतेयेनसचेतोर्पणोगायत्रीशब्दस्तेनब्रह्मणएवनिगदात् अभिधानात्छंदोभिधानमसिध्दमिति अधुनातथाहिदर्शनमितिशे

अपरआह। साक्षादेवगायत्रीशब्देनब्रह्मप्रतिपाद्यते संख्यासामान्यात्। यथागायत्रीचतुष्पदाषडक्षरैः पादैस्तथा ब्रह्मचतुष्पात्तथान्यत्रापिछंदोभिधायीशब्दोर्थांतरेसंख्यासामान्यात्प्रयुज्यमानोदृश्यते। त यातेवाएतेपंचान्येपंचान्येदशसंतः तत्कृतमित्यपक्रम्याह॥

पंच्यान्यषे तथेति संवर्गविद्यायामधिदैवतंमग्निसूर्यचंद्रांभांसिवायौलीयंते अध्यात्मंवाक्चक्षुःश्रोत्रमनांसिप्राणमपियंतीत्युक्तं तेवाएतेपंचान्येआधिदैविकाःपंचान्येआध्यात्मिकास्तेमिलित्वादशसंख्याकाःसंतः कृतमित्युच्यंते संतिहिकृतत्रेताद्वापरकलिसंज्ञकानिचत्वारिद्यूतानिक्रमेणचतुरंकत्र्यंकद्व्यंकैकांकानि तत्रकृतंदशात्मकंभवति चतुर्ष्वंकेषुत्रयाणांत्रिद्व्येकयोर्द्वयोरेकस्यांतर्भावात् तथाचदशत्वगुणेनवाय्वादयः कृतशब्देनोच्यंते॥ ॥ ॥

एवंकृतत्वंवाय्वादीनामुपक्रम्याह सैषेति विधेयापेक्षयास्त्रीलिंगनिर्देशः विराट्पदंछंदोवाचकंदशाक्षराविराडितिश्रुतेः दशत्वसाम्येनवाय्वाद-
योविराडित्युच्यंते एवंचदशत्वद्वारावाय्वादिषुकृतत्वं विराट्त्वंचध्येयं तत्रविराटत्वध्यानात्सर्वमस्यान्नंभवति अन्नंविराडितिश्रुतेः कृतत्वध्यानाद
न्नादोभवतिकृतयुगस्यान्नादित्वात्कृतंहिस्त्रीयचतुरंकेषुत्र्यंकादिकमंतर्भावयदन्नमतीवलक्ष्यते अतएवकृतजयादितरधूतजयः श्रुत्युक्तः कृ
तायविजितायाधरेयाःसंयंतीतिभयोद्यूतंकृतसंज्ञोयः कृतायःसविजितोयेनतस्मैअधरेयाःत्र्यंकादयःअयाःसंयंतिउपनमंतेतेनजिताभवंती

सैषाविराडन्नादीति।अस्मिन्पक्षेब्रह्मैवाभिहितमितिनछंदोभिधानंसर्वथाप्यस्तिपूर्वस्मिन्वाक्येप्रकृतंब्रह्म

त्यर्थः एवंचसावाय्वादिदशात्मिकाएषाकृतशब्दिताविराडन्नंकृतत्वादन्नादीनीत्यर्थः सर्वथापीतिगायत्रीतिपदस्यलक्षकत्वेगौणत्वेपिचेत्य-
र्थःअत्रापरआहेत्यपरपदेनगौणत्वंस्वमतंनेतिद्योतयति अजहल्लक्षणापक्षेहिवाग्वैगायत्रीति वागात्मत्वंगायतिचत्रायतेचेति निरुक्तनाम
कत्वंचगायत्र्याउपाधित्वेनोपास्यत्वादुपपन्नतरंगौणपक्षेगायत्रीत्यागाचदुभयंसर्वात्मकत्वमात्रेणोपपादनीयं एवंगायत्रीपदस्यस्वार्थत्यागा
प्रसिद्धचतुष्पा त्वगुणद्वाराविमकृष्टलक्षणाचेति बह्वसमंजसम् ॥ ॥ ॥

ननुगायत्रीवाइदंसर्वमितिप्रथमगायत्रीश्रुतेः कथंलक्षणेत्याशंक्यवाक्यशेषगतसर्वात्मकत्वाद्यनेकबलवत्प्रमाणसंवादेनब्रह्मणितात्पर्यावग-
मादित्याह भूतादिपादेति एवंपदार्थमाह इतश्चेति सूत्रस्थादिपदार्थंदर्शयति ॥ भूतपृथिवीति अत्रसूत्रभाष्यकारयोः भूतादिभिश्चतुष्प

भूतादिपादव्यपदेशोपपत्तेश्चैवं। इतश्चैवमभ्युपगंतव्यमस्तिपूर्वस्मिन्वाक्येप्रकृतंब्रह्मेति। यतोभूतादीन्यादान्व्यपदि
शति। भूतपृथिवीशरीरहृदयादीनिहिनिर्दिश्याह सैषाचतुष्पदाषड्विधागायत्रीतिनहिब्रह्मानाश्रयणेकेवलस्यछं
दसोभूतादयः पादाउपपद्यंते। अपिचब्रह्मानाश्रयणेनेयमृक्संबध्येत। तावानस्यमहिमेति अनयाहिऋचास्वरसेनब्र
ह्मैवाभिधीयते। पादोस्यसर्वाभूतानित्रिपादस्यामृतंदिवीति सर्वात्मत्वोपपत्तेः। पुरुषसूक्तेपीयमृक्ब्रह्मपरतयैवसमा
म्नायते। स्मृतिश्चब्रह्मणएवंरूपतांदर्शयति। विष्टभ्याहमिदंकृत्स्नमेकांशेनस्थितोजगदिति। यद्वैतद्ब्रह्मेतिचनिर्देशःए
वंसतिमुख्यार्थउपपद्यते॥

दागायत्रीतिसंमतं षडक्षरैश्चतुष्पात्वंदृत्तिकारोक्तमप्रसिद्धंनकारसूचितंयुक्त्यंतरमाह अपिचेति
ब्रह्मपरसूक्तोपपन्नत्वाच्च तस्यास्तत्परत्वमित्याह पुरुषेति ब्रह्मपदस्यछंदोवाचित्वमुक्तंनिरस्यति यद्वैतद्ब्रह्मेति पूर्वस्यामृचिब्रह्मोक्तावि
त्यर्थः॥ ॥ ॥ ॥

हृदयस्यचतुर्दिक्षूर्ध्वंच पंचसुषयः संतितेषुब्रह्मस्थानत्वन्नगरस्यप्रागादिद्वारेषुक्रमेणप्राणव्यानापानसमानोदानाः पंचद्वारपालाइति ध्यानार्थं श्रुत्याकल्पितंतत्रहृदयछिद्रस्थप्राणेषुब्रह्मपुरुषत्वश्रुतिर्हृदिगायत्र्यारव्यब्रह्मणउपासनासंबंधितायांब्रह्मणोद्वारपालत्वाद्ब्रह्मपुरुषाइतिसं भवतीत्याह पंचब्रह्मेति दिविदिवइतिविभक्तिभेदात् प्रकृतप्रत्य भिज्ञानास्तीत्यर्कं नोपेक्षणीयमित्याह तत्परिहर्तव्यमिति परिहारंप्रतिजा

पंचब्रह्मपुरुषाइतिचहृदयसुषिषुब्रह्मपुरुषइतिश्रुतिः ब्रह्मसंबंधितायांविवक्षितायांसंभवति तस्मादस्तिपूर्वस्मिन्वाक्ये ब्रह्मप्रकृतंतदेवज्योतिर्वाक्येद्युसंबंधात्प्रत्यभिज्ञायमानंपरामृश्यत इतिस्थितं। उपदेशभेदान्नेतिचेन्नोभयस्मिन्नप्यविरोधा त्।२७।यद्यप्येनदुक्तंपूर्वमत्रिपादस्यामृतंदिवीतिसप्तम्याद्यौराधारत्वेनोपदिष्टेह पुनरथयदतः परोदिवइतिपंचम्यामर्यादात्वेनतस्मा दुपदेशभेदात् नतस्येह प्रत्यभिज्ञानमस्तीतितत्परिहर्तव्यं अत्रोच्यतेनायंदोषउभयस्मिन्नप्यविरोधात् उभयस्मिन्नपिसप्तम्यंतेपंच म्यंतेचोपदेशेनप्रत्यभिज्ञानंविरुध्यते तथा लोकेवृक्षाग्रसंबंधोपिश्येनउभयथोपदिश्यमानो दृश्यतेवृक्षाग्रेश्येनोवृक्षाग्रात्परतः श्येनइतिचएवंदिव्येवसत् ब्रह्मादिवः परमित्युपदिश्यते॥ नीते अत्रेतिसूत्रेनअर्थं वदन्परिहारमाह नायमिति एवंसर्वत्रव्यारव्येयं प्रधान- प्रातिपदिकार्थद्युसंबंधेनप्रत्यभिज्ञायाविभक्त्यर्थभेदोनप्रतिबंधकः कथंचिदाधारस्यापिमर्यादात्वसंभवात् यथावृक्षाग्रंस्वलग्नभागावछिन्नश्ये नस्याधारः सन्नेवस्वालग्नभागावछिन्नस्यतस्यैवमर्यादाभवति एवंदिविसूर्येहार्दाकाशेवा मुख्येआधारे तद्ब्रह्मादिवोमर्यादात्वंतदलग्नाकाशत्वाव- छिन्नब्रह्मप्रतिरूपयितादिवःपरमित्युच्यतइत्यर्थः॥

यथाकाशेनाप्यनवच्छिन्नं ब्रह्म गृहीत्वा पंचम्या द्यौमर्यादात्वमेव मुख्यं सदा नवायाँपोपद्यतिवत्सप्तम्यासामीप्यलक्षणया धारत्वं व्याख्येयमित्याह
अपरइति संबंधमत्वाधारत्वं मुख्यं पूर्वमुक्तम् दिवो वसादिति असंबद्धमत्तिमर्यादात्वं मुख्यमधुनोच्यते दिवः परमपीतिभेदः तस्माज्ज्योतिर्वा
क्यमुपास्ये ब्रह्मणि समन्वितमितिसिद्धं॥प्राणस्तथानुगमात्॥दिवोदासस्यापत्यं दैवोदासिः प्रतर्दनोनामराजा पुत्स्येन पुरुषकारेण च मरणेनेंद्र

अपरआह यथालोके वृक्षाग्रेणासंबंधोपिश्येनउभयथोपदिश्यमानो दृश्यते वृक्षाग्रेश्येनो वृक्षाग्रात्परतः श्येनइति च एवं
दिवः परमपि सत् ब्रह्म दिवीत्युपदिश्यते तस्मादस्ति पूर्वनिर्दिष्टस्यैव ब्रह्मणइहप्रत्यभिज्ञानं अतः परमेव ब्रह्म ज्योतिः
शब्दमितिसिद्धं॥प्राणस्तथानुगमात्।२८ अस्ति कौषीतकिब्राह्मणोपनिषदींद्रप्रतर्दनाख्यायिका प्रतर्दनोहवै दैवोदासि
रिंद्रस्य प्रियं धामोपजगाम युद्धेन च पौरुषेण चेत्यारभ्याम्नाता तस्यांश्रूयते सहोवाच प्राणोस्मि प्रज्ञात्मा तंमामायुरमृतमि
त्युपास्वेति तथोत्तरत्राप्यथ खलु प्राण एव प्रज्ञात्मा इदं शरीरं परिगृह्योत्थापयतीति। तथा॥ स्य प्रेमास्पदं गृहं जगाम तं हेंद्र उवाच
प्रतर्दन वरं ते ददामीति सहोवाच प्रतर्दनो यं त्वं मर्त्याय हिततमं मन्यसे तं वरं त्वमेवालोच्य मह्यं देहीति। तत इंद्र इदमाह। प्राणोस्मीत्यादि मुख्यं
प्राणं निरसितुं प्रज्ञात्मत्वमुक्तं निर्विशेषचिन्मात्रं निरस्यति। तं मामिति इदं प्राणस्येंद्रदेवतात्वे लिंगं मुख्यप्राणत्वे लिंगमाह। अथेति। वागादी १०३
नां देहधारणशक्त्यभावनिश्चयानंतरमित्यर्थः प्राणस्य देहधारकत्वमुत्थापकत्वं च प्रसिद्धमिति वक्तुं खलु शब्दः॥ ॥

प्राणस्यजीवलेवकर्तृत्वंलिंगमाह नवाचमिति आनंदत्वादिकंब्रह्मलिंगमाह अंतेचेति अनेके‌षुलिंगेषुदृश्यमानेषुबलाबलनिर्णयार्थमिदमधिक
रण मित्यगतार्थतामाह। अनेकलिंगेति पूर्वत्रप्रकृतब्रह्मवाचकयच्छब्दबलाज्योतिःश्रुतिःब्रह्मपरेत्युक्तं नतथेहप्राणश्रुतिप्रसंगेकिंचिद्बलम

नवाचंविजिज्ञासीत। वक्तारंविद्यादित्यादि अंतेचसएषप्राणएवप्रज्ञात्मानंदोजरोमृतइत्यादितत्रसंशयः किमिहप्रा
णशब्देनवायुमात्रमभिधीयते उत देवतात्मोतजीवोथवापरंब्रह्मेति नन्वतएवप्राणइत्यत्रवर्णितंप्राणशब्दस्यब्रह्मपर
त्वमिहापिचब्रह्मलिंगमस्ति आनंदोजरोमृतइत्यादिकथमिहपुनःसंशयःसंभवति अनेकलिंगदर्शनादितिब्रूमः नके
वलमिहब्रह्मलिंगमेवोपलभ्यते संतिहि इतरलिंगान्यपिमामेवविजानीहीतींद्रस्यवचनंदेवतात्मलिंगमिदंशरीरंपरिगृ
ह्योत्थापयतीतिप्राणलिंगं नवाचंविजिज्ञासीतवक्तारंविद्यादित्यादिजीवलिंगं अतउपपन्नःसंशयःतत्रप्रसिध्देर्वायुःप्रा-
णइतिप्राप्तेउच्यतेप्राणशब्दंब्रह्मविज्ञेयंकुतस्तथानुगमात्॥ तथाहिपौर्वापर्येणपर्यालोच्यमानेवाक्येपदार्थानांसमन्वयोब
ह्मप्रतिपादनपरउपलभ्यतेउपक्रमेतावद्वरंवृणीष्वेतींद्रेणोक्तःप्रतर्दनः परमंपुरुषार्थवरमुपचिक्षेपत्वमेवमेवृणीष्वयंत्वंम

स्ति मिथोविरुध्दानेकलिंगानामनिश्चायकत्वादितिप्रत्युदाहरणसंगत्यापूर्वपक्षयति तत्रेति पूर्वप्रधानश्रातिपदिकार्थबलात्तद्विभक्त्यर्थवा
धवद्वाक्यार्थज्ञानंप्रतिहेतुत्वेनप्रधानानेकपदार्थबलादेकवाक्यताभंगइति दृष्टांतसंगतिर्वोक्त्ता पूर्वपक्षेप्राणाद्यनेकोपास्तिःसिध्दांतेप्रत्यग्ब्रह्म
धीरितिविवेकः॥

तयाब्रह्मपरत्वेनपदानामन्वयावगमादितिहेत्वर्थमाह तथाहीति। हिततमत्वकर्मक्षयादिपदार्थानांसंबंधोब्रह्मणितात्पर्यनिर्णायकउपल-
भ्यतइत्युक्तंविवृणोति उपक्रमइत्यादिना यंमन्यसेतंवरंत्वमेवमयच्छेत्यर्थः सयःकश्चिन्मांब्रह्मरूपंवेदसाक्षादनुभवति तस्यविदुषोलोकेमो
नुध्यायहिततमंमन्यसइति तस्मैहिततमत्वेनोपदिश्यमानःप्राणःकथंपरमात्मानस्यात् नह्यन्यत्रपरमात्मज्ञानाद्धिततमप्रा-
प्तिरस्ति तमेवविदित्वातिमृत्युमेतिनान्यःपंथाविद्यतेयनायेत्यादिश्रुतिभ्यः तथासयोमांवेदनहवैतस्यकेनचनकर्मणालो-
कोमीयतेनस्तेयेननभ्रूणहत्ययेत्यादिनब्रह्मपरिग्रहेघटते ब्रह्मविज्ञानेनहिसर्वकर्मक्षयःप्रसिद्धः क्षीयंतेचास्यकर्माणित-
स्मिन्दृष्टेपरावरइत्याद्यासुश्रुतिषुप्रज्ञात्मत्वंचब्रह्मपक्षएवोपपद्यते नह्यचेतनस्यवायोःप्रज्ञात्मत्वंसंभवति। तथोपसंहारे
प्यानंदोजरोमृतइत्यानंदत्वादीनिनब्रह्मणोन्यत्रसम्यक्संभवंति। सनसाधुनाकर्मणाभूयान्भवति नोएवासाधुनाकर्मणाक
नीयानेषह्येवसाधुकर्मकारयत्येषउएवासाधुकर्मकारयत्येषलोकाधिपतिरेषलोकपालएषलोकेशइतिचसर्वमेतत् परस्मिन्ब्रह्म-
ण्याश्रीयमाणेनुगंतुंशक्यते नमुख्येप्राणेनस्मात्प्राणोब्रह्मानवक्तुरात्मोपदेशादितिचेदध्यात्मसंबंधभूमात्यस्मिन्। यदुक्तंप्राणोब्र
ह्मेतितदाक्षिप्यतेनपरंब्रह्मप्राणशब्दंकस्माद्वक्तुरात्मोपदेशात् वक्ताहीन्द्रोनामकश्चिद्विग्रहवान्देवताविशेषःस्वमात्मानंप्रतर्दनाया
चचक्षे मामेवविजानीहीत्युपक्रम्यप्राणोस्मिप्रज्ञात्मेत्यहंकारवादेनसएषवक्तुरात्मत्वेनोपदिश्यमानःप्राणःकथंब्रह्मस्यात् नहिब्र- १०४
ह्मणोवक्तृत्वंसंभवति अवागमनइत्यादिश्रुतिभ्यः॥ ॥ ॥ सोमहत्तापिपातकेननहमीयते नैवहिंस्यतेनप्रतिबध्यतेज्ञानाग्निनाकृ-
त्स्नराशेर्दग्धत्वादित्याह सयइतिसाध्वसाधुनीपुण्यपापेताभ्यामस्पृष्टत्वंतत्कारयितृत्वंनिरंकुशैश्वर्यंचसर्वमेतदित्यर्थः अहंकारवादेनस्वात्मवाचकशब्देनाच
चक्षेउक्तवानित्यर्थः

वाक्यस्यइंद्रोपासनापरत्वेलिंगांतरमाह तथाविग्रहेति त्रीणिशीर्षाणियस्येति त्रिशीर्षात्वष्टुःपुत्रोविश्वरूपोनामब्राह्मणः तंहतवानस्मिगौणोनियथार्थशब्द-
तीनिरुद्धेदांतवाक्यं तन्मुखेयेषांते रुन्मुखाः तेभ्योन्यान्वेदांतबहिर्मुखान्यतीनरण्यश्वभ्योदत्तवानस्मीत्यर्थः इंद्रेप्राणशब्दोपपत्तिमाह प्राणत्वंचेतिप
ठंतिलौकिकाअपीत्यर्थः बलवान्विनाप्राणशब्देनबलाभिमानीदेवतालक्ष्यतइतिभावः इंद्रोहितप्रदातृत्वाद्धितमः कर्मानधिकारादपापरत्वेवंव्या
ख्येयानीत्याहनिश्चितेचेतिकिमिंद्रपदेनविग्रहोपलक्षितश्चिन्मात्रमुच्यतेउतविग्रहः आद्येवाक्यस्यब्रह्मपरत्वंसिध्दंनद्वितीयइत्याह अध्यात्मेतिआत्म

तथाविग्रहसंबंधिभिरेवब्रह्मण्यसंभवद्भिर्धर्मैरात्मानंतुष्टाव त्रिशीर्षाणंत्वाष्ट्रमहनमरुन्मु खान्यतीन्सालावृकेभ्यः प्रायच्छमित्येव
मादिभ्यः प्राणत्वंचेंद्रस्यबलवत्त्वादुपपद्यते प्राणोवैबलमितिहिविज्ञायते बलस्यचेंद्रोदेवताप्रसिद्धायाचकाचित्बल कृतिरिंद्रकर्मैव
तदितिहिवदंति प्रज्ञात्मत्वमप्यप्रतिहतज्ञानत्वात् देवतात्मनः संभवति अप्रतिहतज्ञानादेवताइतिवदंतिनिश्चितेचैवंदेवतात्मोपदेशेहि
तत मन्त्रादिवचनानियथासंभवंतद्विषयाण्येवयोजयितव्यानितस्मादृक्कुरिंद्रस्यात्मोपदेशान्नप्राणोब्रह्मेत्याक्षिप्यप्रतिसमाधीय
तेअध्या त्मसंबंधभूमात्यस्मिन्निति अध्यात्मसंबंधः प्रत्यगात्मसंबंधस्तस्यभूमाबाहुल्यमस्मिन्नध्यायेउपलभ्यते यावद्धिअस्मिन्श
रीरेप्राणोवसतितावदायुरिति प्राणस्यैवप्रज्ञात्मनः प्रत्यग्भूतस्यायुःप्रदानोपसंहारयोः स्वातंत्र्यंदर्शयतिनदेवताविशेषस्यपराचीन-

निर्देहूधिगतंइत्यध्यात्मंप्रत्यगात्मासंबध्यतेयैः शरीरस्थत्वादिभिरिंद्रस्तनावसंभाविते र्धर्मैस्तेअध्यात्मसंबंधास्तेषांभूमेत्यर्थः आयुरत्र देहेप्राणवा
युसंचारः अस्तित्वेप्राणस्यस्थितौप्राणानामिंद्रियाणांस्थितिरित्यर्थःतः श्रुतिमाह अस्तित्वइति अथातोनिःश्रेयसादानमित्याद्याश्रुतिः इंद्रियोत्थापकत्वव
देहोत्थापकत्वमाह तथेति॥

वत्कृत्स्नंमुक्त्वासर्वाधिष्ठानत्वंदर्शितमित्याह इतिचोपक्रम्येति तत्तत्रनानाप्रपंचस्यात्मनिकल्पनायांयथादृष्टांतः लोकेप्रसिद्धस्यरथस्यारेषुनेमि
नाभ्योर्मध्यस्थशलाकास्वचक्रोपांतरूपोनेमिरर्पितोनाभौचक्रपिंडिकायामराअर्पिताः एवंभूतानिपंचपृथिव्यादीनिमीयंतइतिमात्राःभोग्याःश
ब्दादयःपंचेतिदशभूतमात्राःप्रज्ञामात्रास्वदशस्वर्पिताः इंद्रियजाःपंचशब्दादिविषयप्रज्ञाःमीयंतेआभिरितिमात्राःपंचधींद्रियाणिनेमिवत्
स्यतथास्त्वित्वेवप्राणानांनिःश्रेयसमित्यध्यात्ममेवेंद्रियाश्रयंप्राणंदर्शयतितथाप्राणएवप्रज्ञात्मेदंशरीरंपरिगृह्योत्थापयतीतिनवाचंवि
जिज्ञासीनवक्तारंविद्यात्॥ इतिचोपक्रम्यतद्यथारथस्यारेषुनेमिरर्पितोनाभावराअर्पिताः एवमेवैताभूतमात्राःप्रज्ञामात्रास्वर्पिताःप्र-
ज्ञामात्राःप्राणेर्पिताःसएषप्राणएवप्रज्ञात्मानंदोजरोमृतइतिविषयेंद्रियव्यवहारारनाभिभूतंप्रत्यगात्मानमेवोपसंहरति समेआत्मेतिवि-
द्यादितिचोपसंहारःप्रत्यगात्मपरिग्रहेसाधकःनपराचीनपरिग्रहेअयमात्माब्रह्मसर्वानुभूरितिचश्रुत्यंतरंतस्मादध्यात्मसंबंधबाहुल्या
त् ब्रह्मोपदेशएवायंनदेवतात्मोपदेशः कथंतर्हिवक्तुरात्मोपदेशःशास्त्रदृष्ट्यातूपदेशोवामदेववत् इंद्रोनामदेवतात्मास्वमात्मानंप-
रमात्मत्वेनाहमेवपरंब्रह्मेत्यार्षेणदर्शनेनयथाशास्त्रंपश्यन्नुपदिष्टातिस्ममामेवविजानीहीतियथातद्वैतत्पश्यन्नृषिर्वामदेवःप्रति
पेदे अहंमनुरभवंसूर्यश्चेतितद्वत् तद्योयोदेवानांप्रत्यबुध्यतसएवतदभवदितिश्रुतेः यत्पुनरुक्तंमामेवविजानीहीत्युक्त्वाविग्रह
ग्रात्यंप्राहकेषुअरेषुकल्पितमित्यत्राह नाभिस्थानीयेप्राणेसर्वंकल्पितमित्याहप्राणेर्पिताइतिसप्राणोपमस्वरूपमित्याहसमइतितर्हिप्रत्यगात्मनिस
मन्वयोनतुब्रह्मणितत्राह अयमितिअहंकारवादस्यगतिंपृच्छतिकथमितिउत्तरंसूत्रंतद्व्याख्यातिइंद्रइतिजन्मांतरकृत॥ ॥ १०५

श्रवणादिनास्मिन्जन्मनिस्वतःसिध्दंदर्शनमार्षम्॥ ॥विज्ञेयेंद्रस्तुत्यर्थःउपन्यासोनचेत्कथंतर्हिसइतिपृच्छतिकथमितिब्रह्मज्ञानस्तुत्यर्थः
सइत्याह विज्ञानेति नियामकंब्रूते यदितिपरेणतस्यमेइत्यादिनावाक्येनेत्यन्वयः॥ स्तुतिमाह एतदुक्तमितितस्मात्ज्ञानंश्रेष्ठमितिशेषःस्तुत

धर्मैरिंद्रआत्मानंतुष्टावत्वाष्ट्रवधादिभिरिति तत्परिहर्तव्यंअत्रोच्यतेनत्वाष्ट्रवधादीनांविज्ञेयेंद्रस्तुत्यर्थत्वेनोपन्यासोयस्मादेवंक-
र्माहंतस्मान्मांविजानीहीति॥कथंतर्हिविज्ञानस्तुत्यर्थत्वेनयत्कारणंचत्वाष्ट्रवधादीनिसाहसानिउपन्यस्यपरेणविज्ञानस्तुतिमनुसंदधा
ति।तस्यमेतत्रलोमचनमीयतेसयोमांवेदनहवैतस्यकेनचकर्मणालोकोमीयतइत्यादिनाएतदुक्तंभवतियस्मादीदृशान्यपिक्रूराणिक-
र्माणिकृतवतोममब्रह्मभूतस्यलोमापिनहिंस्यते सयोन्योपिमांवेदनतस्यकेनचिदपिकर्मणालोकोहिंस्यतइति विज्ञेयंतुब्रह्मैवप्राणो
स्मिप्रज्ञात्मेतिवक्ष्यमाणंतस्माद्ब्रह्मवाक्यमेतत्॥ ॥जीवमुख्यप्राणब्रह्मलिंगान्नेतिचेत्नोपासात्रैविध्यादाश्रितत्वादिहतद्योगातु य
द्यप्यध्यात्मसंबंधभूमदर्शनान्नपराचीनस्यदेवतात्मनउपदेशस्तथापिनब्रह्मवाक्यंभवितुमर्हति कुतःजीवलिंगान्मुख्यप्राणलिंगा
च्चजीवस्यतावदस्मिन्वाक्येविस्पष्टंलिंगमुपलभ्यते नवाचंविजिज्ञासीत वक्तारंविद्यादित्यादि अत्रहिवागादिभिः करणैर्व्यापृत-
स्यकार्यकरणाध्यक्षस्यजीवस्यविज्ञेयत्वमभिधीयते तथामुख्यप्राणलिंगमपि अथखलुप्राणएवप्रज्ञात्मेदंशरीरंपरिगृह्योत्थापय
तीति॥
ज्ञानविषयइंद्रइत्यतआह विज्ञेयंत्विति॥ ॥ ॥

शा०भा० देहोत्थापनंजीवल्लिंगंकिंनस्यात्तत्राह शरीरधारणंचेतिसर्वेवागादयःप्राणाःअहमहंश्रेष्ठइतिविवदमानाःप्रजापतिमुपजग्मुः स चतानुवाचयस्मि अ०१
१०६ न्नुत्क्रांतेशरीरंपापिष्ठतरंपतिष्यतिसवः श्रेष्ठइति तथाक्रमेणवागादिषूत्क्रांतेष्वपिमूकादिभावेनशरीरंस्वस्थमस्थात् मुख्यप्राणस्यतुउच्चिक्रा

शरीरधारणंचमुख्यप्राणस्यधर्मः प्राणसंवादेवागादीन्प्राणान् प्रकृत्यतान्वरिष्ठःप्राणउवाचमामोहमापद्यथाहमेवैतत्पंचधात्मानंप्र
भज्यैतत् बाणमवष्टभ्यविधारयामीतिश्रवणात् येत्विमंशरीरंपरिगृह्योतिपठंतितेषामिमंजीवमिंद्रियग्राममंवापरिगृह्यशरीरमु-
त्थापयतीतिव्याख्येयंप्रज्ञात्मत्वमपिजीवेतावच्चेतनत्वादुपपन्नंमुख्येऽपिप्राणेप्रज्ञासाधनप्राणांतराश्रयत्वादुपपन्नमेवजीवमु
ख्यप्राणपरिग्रहेचप्राणप्रज्ञात्मनोःसहवृत्तित्वेनाभेदनिर्देशःस्वरूपेणचभेदनिर्देशइत्युभयथानिर्देशउपपद्यते योवैप्राणःसाप्र
ज्ञायावाप्रज्ञासप्राणःसहह्येतावस्मिन्शरीरेवसतःसहोत्क्रामतइति ब्रह्मपरिग्रहेतुकिंकस्माद्भिद्येत तस्मादिहजीवमुख्यप्राणयो
रन्यतरउभौवाप्रतीयेयातांनब्रह्मेतिचेत् ॥

मिषयांसर्वेषांव्याकुलत्वापत्तौतान्वागादीन् वरिष्ठःप्राणउवाचयूयं मोहंमापद्यथ यतोहमेवैतत्करोमिकिंतत्पंचधाप्राणापानादिभावेनात्मानंवि-
भज्यएतद्यातिगच्छतीतिवानंतदेवबाणमस्थिरम् शरीरमवष्टभ्याश्रित्यधारयामीत्यर्थः द्विवचनसहवासोत्क्रांतिश्रुतेश्चनब्रह्मग्राह्यमित्याह १०६
जीवमुख्येति अभेदनिर्देशमाह योवाइति भेदमाह सहेति ॥ ॥ ॥ ॥

यद्दिजीवमुख्यप्राणयोर्लिंगादुपास्यत्वंतर्हिब्रह्मणोपिलिंगानामुक्तत्वादुपासनंस्यान्नचेष्टापत्तिःउपक्रमादिनानिश्चितैकवाक्यताभंगप्रसंगइत्याह नै
तदेवमित्यादिनानचस्वतंत्रपदार्थभेदाद्वाक्यभेदःकिन्नस्यादितिवाच्यंजीवमुख्यप्राणयोरुक्तलिंगानांब्रह्मणिनेतुंशक्यतयास्वातंत्र्यासिद्धेः अप्र-

नैतदेवमुपासात्रैविध्यात्। एवंसतित्रिविधमुपासनंप्रसज्येतजीवोपासनंमुख्यप्राणोपासनंब्रह्मोपासनंचेति नचैतदेकस्मिन्वाक्ये
ऽभ्युपगंतुंयुक्तंउपक्रमोपसंहाराभ्यांहिवाक्यैकत्वमवगम्यते मामेवविजानीहीत्युपक्रम्य प्राणोस्मिप्रज्ञात्मातंमाआयुरमृतमित्युपा
स्स्वेत्युक्त्वांतेसएषप्राणएवप्रज्ञात्मानंदोजरोमृतइत्येकरूपौउपक्रमोपसंहारौदृश्येतेतत्रार्थैकत्वंयुक्तमाश्रयितुं। नचब्रह्मलिंगम
न्यपरत्वेनपरिणेतुंशक्यं। दशानांभूतमात्राणांप्रज्ञामात्राणांचब्रह्मणोन्यत्रार्पणानुपपत्तेः आश्रितत्वाच्चान्यत्रापिब्रह्मलिंगव
शात् प्राणशब्दस्यब्रह्मणिप्रवृत्तेरिहापिचहिततमोपन्यासादिब्रह्मलिंगयोगात् ब्रह्मणिउपदेशएवायामितिगम्यते॥ ॥
यत्तुमुख्यप्राणलिंगंदर्शितमिदंशरीरंपरिगृह्योत्थापयतीति तदसत्प्राणव्यापारस्यापिपरमात्मायत्तत्वात्। परमात्मन्युप-
चरितुंशक्यत्वात् नप्राणेननापानेनमर्त्योजीवतिकश्चनइतरेणतुजीवतियस्मिन्नेतावुपाश्रितावितिश्रुतेः यदपिनवाच्यंवि-

ल्पपदार्थस्यफलवद्वाक्यार्थशेषत्वेनप्रधानवाक्यार्थानुसारेणतल्लिंगेनयनस्योचितत्वाच्चनहिप्रधानवाक्यार्थब्रह्मलिंगमन्यथानेतुंशक्यंनवा
तदुचितमित्याह नचब्रह्मलिंग मितिसूत्रशेषंव्याचष्टे। आश्रितत्वाच्चेति अन्यत्रातएवप्राणइत्यादौरुक्तेराश्रितत्वादिहापितस्यब्रह्मलिंगस्ययोगा
त् ब्रह्मपरएवप्राणशब्दइत्यर्थः॥

प्राणादिलिंगानि सर्वात्मके ब्रह्मण्यनायासेन नेतुं शक्यानीत्याह यत्त्वित्यादिना यस्मिन्नेतौ प्रेर्यत्वेन स्थितौ तेनेनेतरेण ब्रह्मणा सर्वे प्राणादिव्यापारं कुर्वंतीत्यर्थः विशेषं परिच्छेदाभिमान मत्यर्थः वक्तारं विद्यादिति न वक्तुर्ज्ञेयत्वमुच्यते तस्य लोकसिद्धत्वात् किंतु तस्य ब्रह्मत्वं बोध्यते तद्बोधाभि

जिज्ञासीत वक्तारं विद्यादित्यादिजीवलिंगं दर्शितं तदपि न ब्रह्मपक्षं निवारयति नहि जीवो नामात्यंतभिन्नो ब्रह्मणस्तत्त्व मस्यहं ब्रह्मास्मीत्यादिश्रुतिभ्यः बुध्याद्युपाधिकृतं तु विशेषमाश्रित्य ब्रह्मैव सन् जीवः कर्ता भोक्ता चेत्युच्यते तस्योपाधि कृतविशेषपरित्यागेन स्वरूपं ब्रह्म दर्शयितुं न वाचं विजिज्ञासीत वक्तारं विद्यादित्यादिना प्रत्यगात्माभिमुखीकरणार्थ मुपदेशो न विरुध्यते यद्वाचानभ्युदितं येन वागभ्युद्यते तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते इत्यादिश्च श्रुत्यंतरं वचनादि क्रियाव्यापृतस्यैवात्मनो ब्रह्मत्वं दर्शयति यत्पुनरेतदुक्तं सह ह्येतावस्मिन् शरीरे वसतः सहोत्क्रामत इति प्राणप्रज्ञात्मनो र्भेददर्शनं ब्रह्मवादिनो नोपपद्यत इति नैष दोषः ज्ञानक्रियाशक्तिद्वयाश्रययोः बुद्धिप्राणयोः प्रत्यगात्मोपाधिभूतयो र्भे दनिर्देशोपपत्तेः उपाधिद्वयो पहितस्य तु प्रत्यगात्मनः स्वरूपेणाभेद इत्यतः प्राण एव प्रज्ञात्मेत्येकीकरणमविरुद्धं ॥ ॥

मुख्यायलिङ्गादय इत्यत्र श्रुत्यंतरमाह यद्वाचेति येन चेतन्येन वागभ्युद्यते स्वकार्याभिमुख्येन प्रेर्यते तेन देवं वागादेरगम्यं ब्रह्मेत्यर्थः तत्त्वंपदवाच्य- योः स्वरूपतो भेदस्ताभ्यामुपलक्ष्यात्मस्वरूपाभेदादेकत्वं निर्दिश्यत इत्याह नैष दोष इति ॥ ॥ ॥

स्वमतेनसूत्रव्याख्यायवृत्तिकृन्मतेनव्याचष्टे । अथवेति उपासना त्रैविध्यसंगादि तिपूर्वमुक्तं अत्रत्रिप्रकारकस्यैक ब्रह्मविशेष्यकस्यैकस्योपास-
नस्यविवक्षितत्वादित्यर्थः अतोनवाक्यभेदइतिभावः देहेन्द्रियात्मकजीवनहेतुत्वंप्राणस्यायुष्ट्वं देहापेक्षया तस्यामुक्तेरवस्थानादमृतत्वंउत्थापय-
तीत्यकृथत्वमितिप्राणधर्मः जीवधर्ममाह । अथेतिबुद्धिप्राणयोः सहस्थित्युत्क्रांत्युक्त्यनंतरमित्यर्थः अत्रप्रज्ञापदेनसाभासाजीवाख्याबुद्धि-
रुच्यते तस्याः संबंधीनिदृश्यानिसर्वाणिभूतानियथैकंभवंत्यधिष्ठानचिदात्मनातथाव्याख्यास्यामइ तिउपक्रम्योक्तं वागेवेत्यादिवक्ष्यतेवास्याः

अथवानोपासात्रैविध्यादाश्रितत्वादिहतद्योगादित्यस्यायमन्योर्थः नब्रह्मवाक्येपिजीवमुख्यप्राणलिंगंविरुध्यतेकथमुप-
सात्रैविध्यात् त्रिविधमिहब्रह्मोपासनंविवक्षितंप्राणधर्मेणप्रज्ञाधर्मेणस्वधर्मेणचतत्रायुरमृतमुपास्स्वायुःप्राणइतिइदंशरीरं
परिगृह्योत्थापयतितस्मादेतदेवोक्थमुपासीतेतिचप्राणधर्मः अथयथास्यैप्रज्ञायैसर्वाणि भूतानिएकीभवंति तद्व्याख्यास्याम
इत्युपक्रम्यवागेवास्याएकमंगमदूदुहत् तस्यैनामत्तपरस्तात् प्रतिविहिताभूतमात्रा॥ कमंगमदूदुह दित्यादिपर्यायाणांसंक्षिप्तार्थमु-
च्यतेउत्पन्नाया असत्कल्पायाः साभासबुध्देर्नामप्रपंचविषयित्वमर्धंशरीरं अर्थात्मकरूपप्रपंचविषयित्वमर्धंशरीरमितिमिलित्वाविषयित्वाख्यं
पूर्णशरीरंमिंद्रियसाध्यंतत्रकर्मेंद्रियेषुवागेवास्याः प्रज्ञायाएकमंगंदेहार्धमदूदुहत् पूरयामास वागिंद्रियद्वारानामप्रपंचविषयित्वंबुद्धिर्लभतइत्य
र्थः चतुर्यीषष्ठ्यर्थातस्याः पुनर्नामकिलचक्षुरादिनाप्रतिविहिताज्ञापिता भूतमात्रारूपाद्यर्थरूपापरस्तादपरार्धकारणंभवतिज्ञानकरणद्वारार्थप्र
पंचविषयित्वंबुद्धिःप्राप्नोतीत्यर्थः॥

शां०भा० एवंबुद्धेः सर्वार्थद्रष्टृत्वमुपपाद्य तन्निष्ठचित्प्रतिबिंबद्वारा साक्षिणि द्रष्टृत्वाध्यासमाह प्रज्ञयेति बुद्धिद्वारा चिदात्मा वाचमिंद्रियं समारुह्य तस्याः प्रेर अ०१

१०८ को भूत्वा वाचा करणेन सर्वाणि नामानि वक्तृत्वेनाप्नोति चक्षुषा सर्वाणि रूपाणि पश्यतीत्येवं द्रष्टा भवतीत्यर्थः तथा च सर्वद्रष्टृत्वं चिदात्मनि द्रष्टृत्वा
ध्यासनिमित्तत्वं च बुद्धेर्धर्म इत्युक्तं भवति सर्वाधारत्वानंदत्वादिः ब्रह्मधर्म इत्याह तावा इति दशानां व्याख्यातं प्रज्ञा इंद्रियजा अधिकृत्य ग्राह्या भू

प्रज्ञया वाचं समारुह्य वाचा सर्वाणि नामान्याप्नोतीत्यादि प्रज्ञाधर्मः तावा एता दशैव भूतमात्रा अधिप्रज्ञं दश प्र-
ज्ञामात्रा अधिभूतं यद्धि भूतमात्रा न स्युः न प्रज्ञामात्राः स्युः यद्धि प्रज्ञामात्रा न स्युः न भूतमात्राः स्युः नह्यन्यतरतो
रूपं किंचन सिध्येत्। नो एतन्नाना तद्यथा रथस्यारेषु नेमिरर्पिता नाभावरा अर्पिता एवमेवैता भूतमात्राः प्रज्ञा
मात्रास्वर्पिताः प्रज्ञामात्राः प्राणेर्पिताः स एष प्राण एव प्रज्ञात्मेत्यादि ब्रह्मधर्मः तस्माद्ब्रह्मण एवैतदुपाधिद्व-
यधर्मेण स्वधर्मेण चैकमुपासनं त्रिविधं विवक्षितं॥

तमात्रा वर्तंते प्रज्ञामात्राः इंद्रियाणि ग्राह्यं भूतजातमधिकृत्य वर्तंत इति ग्राह्यग्राहकयोर्मिथः सापेक्षत्वमुक्तं साधयति यद्धीति तदेव स्फुटयति न-
हीति ग्राह्येण ग्राह्यस्वरूपं न सिध्यति किंतु ग्राहकेण एवं ग्राहकमपि ग्राह्यमनपेक्ष्य न सिध्यति। तस्मात्सापेक्षत्वादेतद्ग्राह्यग्राहकद्वयं वस्तुतो १०८
न भिन्नं किंतु चिदात्मन्यारोपितमित्याह नो इति तद्यथेत्यादिकृतव्याख्यानं सूत्रार्थमुपसंहरति। तस्मादिति॥

अन्यधर्मेणान्यस्योपासनंकथमित्याशंक्याश्रितत्वादित्याह। अन्यत्रापीति। उपाधिर्जीवः तदन्यधर्मेणोपासनमियमसंगताव्याख्या तथाहिनताव
दारुण्याद्यनेकगुणविशिष्टाप्राप्तक्रयणवदुपासात्रयविशिष्टस्यब्रह्मणोविधिःसंभवतिसिध्दस्यविध्यनर्हत्वात् नापिब्रह्मानुवादेनोपासात्रय
विधिः वाक्यभेदान्नचनानाधर्मविशिष्टमेकमुपासनंविधीयतइतिवाच्यंतादृशविधिवाक्यस्यात्राश्रवणात् नचतंमामायुरमृतमित्युपास्वेति
अत्रमामितिजीवनायुरितिप्राणेनामृतमिति ब्रह्मणास्वस्वधर्मवताविशिष्टोपासनाविधिरितिवाच्यंसर्वेषांधर्मिणां अश्रवणात् ब्रह्माश्रुतेश्च

अन्यत्रापिमनोमयःप्राणशरीरइत्यादा वुपाधिधर्मेणब्रह्मणउपासनमाश्रितंइहापितद्युज्यते वाक्य
स्योपक्रमोपसंहाराभ्यामेकार्थत्वावगमात् प्राणप्रज्ञाब्रह्मलिंगावगमाच्चतस्मात्ब्रह्मवाक्यमेतदितिसि
द्धं॥ इतिश्रीमच्छारीरकमीमांसाभाष्येशंकरभगवत्पादकृतौप्रथमाध्यायस्यप्रथमःपादः॥ छ॥ ॥

प्राणोवाअमृतमितिप्राणस्यैवामृतत्वश्रुतेःअतउपासनाविधिलुब्धेनवक्तारंविद्यात् एतदेवोक्थमुपासीतसम आत्मेतिविद्यादितिजीवप्राणब्र
ह्मोपासनविधयःअन्येगुणविधयइतिस्वीकृत्यैकवाक्यत्वंत्याज्यंतच्चायुक्तं उपक्रमादिनैकवाक्यतानिर्णयात् तस्माज्ज्ञेयप्रत्यक्ब्रह्मपरमिदं
वाक्यमित्युपसंहरति तस्मादिति॥ ॥ इतिश्रीमत्परमहंसपरिव्राजकाचार्यश्रीगोविंदानंदभगवत्पादकृतौश्रीमच्छारीरकमीमांसा
व्याख्यायांभाष्यरत्नप्रभायांप्रथमाध्यायस्यप्रथमःपादःसमाप्तः॥ छ॥ ॥ ॥

इतिशारीरकभाष्येप्रथमाध्यायस्यप्रथमः पादः समाप्तः

अथशारीरभाष्येप्रथमाध्यायस्यतृतीयःपादःप्रारंभः

श्रीगणेशायनमः ।। श्रीसरस्वत्यैनमः ।। उँ द्युभ्वोतमूमपदमक्षरमीक्षणीयंश्रीराममल्पत्वद्दिमांतमथीशितारं इंद्रादिवेद्यमखिलस्यचशासितारं-
ज्योतिर्नमः पदम निद्रमजंमजेहं एवंरूढिबहुलानांप्रायेणसविशेषवाक्यानांसमन्वयोद्वितीयपादेदर्शितः अधुनायौगिकपदबहुलानांनिर्विशेषमथा-
नामांवाक्यानांसमन्वयंवक्तुंतृतीयपादआरभ्यते अनोत्राधिकरणानांश्रुत्यध्यायपादसंगतयस्तत्रपूर्वस्मिन्पक्रमस्येसाधारणशब्दस्यवाक्यशेषस्थ
द्युमूर्धत्वादिनाब्रह्मपरत्वमुक्तंतद्वदत्राप्युपक्रमस्यसाधारणायतनत्वस्यवाक्यशेषस्थसेतुश्रुत्यावरुद्धतः परिच्छिन्नेप्रधानादौ व्यवस्थेतिदृष्टांत

द्युभ्वाद्यायतनंस्वशब्दात् इदंश्रूयतेयस्मिन्द्यौः पृथिवीचांतरिक्षमोतंमनः सहप्राणैश्चसर्वैः तमेवैकंजानथ आत्मान
मन्यावाचोमुंचथ अमृतस्यैषसेतुरिति । अत्रयदेतत् द्युप्रभृतीनामोतत्ववचनादायतनंकिंचदवगम्यते तत्किंपरंब्रह्म-
स्यादाहोस्विदर्थांतरमितिसंदिह्यते अत्रार्थांतरंकिमप्यायतनंस्यादितिप्रासंकस्मात् ।।

लक्षणाधिकरणसंगतिः पूर्वपक्षेप्रधाना
द्युपास्तिः सिद्धांतेनिर्विशेषब्रह्मधीरितिफलंमुंडकवाक्यमुदाहरति । इदमिति यस्मिन्लोकत्रयात्माविराट्प्राणैः सर्वैःसहमनः सूत्रात्मकंतत्का
रादव्याकृतंकारण मोतं कल्पितंतदपवादेनतमेवाधिष्ठानात्मानंप्रत्यगभिन्नंजानथश्रवणादिना अन्या अनात्मवाचोविमुंचथविशेषेणनिःशे
षंत्यजथएषवाग्विमोकपूर्वकात्मसाक्षात्कारोऽमृतस्यमोक्षस्यासारापारदुर्वारसंसारवारिधेः परपारस्यसेतुरिवसेतुःप्रापकइतिमातृवत्
श्रुतिर्मुमुक्षून्उपदिशति तत्रायतनत्वस्यसाधारणधर्मस्यदर्शनात्संशयमाह । तत्किमिति ।। ७ ।।

अमृतस्यब्रह्मणः सेतुरितिषष्ठ्याब्रह्मणोभिन्नत्वेनसेतोः श्रुतत्वादेषशब्दपरामृष्टं द्युभ्वाद्यायतनमब्रह्मैवसेतुरित्याह। अमृतस्येति। भेदश्रव
णात्सेतुरितिश्रवणाच्चेत्यर्थः तत्रभेदश्रवणंव्याख्यातंसेतुश्रवणंस्वयंविवृणोति। पारवानिति। अनंतंकालतः अपारंदेशतः जलविधारकमुख्यसे
तोर्ग्रहणासंभवात् गौणसेतुग्रहेकर्तव्येमुख्यसेतुविनाभूतपारवत्वगुणवानेवकश्चित्स्यात्स्थः नतुमुख्यस्यानियतविधारणगुणवानीश्वरइतिभा

अमृतस्यैषसेतुरितिश्रवणात् पारवान्हिलोकेसेतुः प्रख्यातः नचपरस्यब्रह्मणःपारवत्वंशक्यमभ्युपगंतुमनंतमपारमिति
श्रवणात् अर्थांतरेचायतनेपरिगृह्यमाणेस्मृतिप्रसिद्धंप्रधानंपरिगृहीतव्यम् तस्यकारणत्वादायतनोपपत्तेः श्रुतिप्रसिद्धो
वावायुर्वास्यात् वायुर्वैगौतमसूत्रंवायुनावैगौतमसूत्रेणायंचलोकः परश्चलोकः सर्वाणिचभूतानिसंदृब्धानिभवंतीतिवा
योरपिविधारणत्वश्रवणात्। शारीरोवास्यात्। तस्यापिभोक्तृत्वाद्भोग्यंप्रपंचंप्रत्यायतनत्वोपपत्तेरित्येवंप्राप्तइदमाह। द्युभ्वा
द्यायतनमिति द्यौश्चभूश्चद्युभ्वौ द्युभ्वावादीयस्यतदिदंद्युभ्वादि। यदेतस्मिन्वाक्येद्यौः पृथिव्यंतरिक्षमनःप्राण इत्येवमात्मकंजग
दोतत्वेननिर्दिष्टंतस्यायतनंपरंब्रह्मभवितुमर्हतिकुतः स्वशब्दादात्मशब्दादित्यर्थः आत्मशब्दोहिभवतितमेवैकंजानथआत्मा
नमिति॥ वः यथालोकेमणयः सूत्रेणग्रथिताः एवं हेगौतमसमष्टिलिंगात्मकवायुनास्थूलानिसर्वाणिसंदृब्धानिग्रथितानिभवंतीतिश्रुत्य
र्थः आत्मशब्दात्पक्षद्वयमप्ययुक्तमित्यतआह। शारीरोवेति। सद्वितीयत्वेनसेतुशब्दोपपत्तेश्चेत्यर्थः॥ ॥ ॥

नन्वात्मशब्दोजीवेसंभवतीत्यतआह।आत्मशब्दश्चेति।उपाधिपरिच्छिन्नस्यजीवस्यसर्ववस्तुप्रत्यक्त्वंमुख्यंनास्तीत्यर्थः उपक्रमस्थसाधारणायतनत्व
स्यगौणसेतुत्वलिंगात्प्रथमश्रुतात्मश्रुत्याब्रह्मत्वनिश्चयइतिभावः स्वशब्दादित्यस्यार्थांतरमाह।क्वचिच्चेति।प्रजानामुत्पत्तौसदेवमूलंस्थितावा

आत्माशब्दश्चपरमात्मपरिग्रहेसम्यगवकल्पते।नार्थांतरपरिग्रहे क्वचिच्चस्वशब्देनैवब्रह्मणआयतनत्वं
श्रूयतेसन्मूलाःसोम्येमाःसर्वाःप्रजाःसदायतनाःसत्प्रतिष्ठाइतिस्वशब्देनैवचेहपुरस्तादुपरिष्टाच्चब्रह्म
संकीर्त्यतेपुरुषएवेदंविश्वंकर्मतपोब्रह्मपरामृतमिति ब्रह्मैवेदममृतंपुरस्तात्ब्रह्मपश्चात्ब्रह्मदक्षिण
तश्चोत्तरेणेतिचतत्रत्वा यतनायतनवद्भावश्रवणात् सर्वंब्रह्मेतिचसामानाधिकरण्यात् यथानेकात्म
कोवृक्षःशाखास्कंधोमूलंचेत्येवंनानारसोविचित्रआत्मेत्याशंकासंभवति तांनिवर्तयितुंसावधारणमाह
तमेवैकंजानथआत्मानमिति।एतदुक्तंभवति नकार्यप्रपंचविशिष्टोविचित्रआत्माविज्ञेयः किंतर्हि

यतनंलयेप्रतिष्ठेतिब्रह्मवाचिसत्पदेनछांदोग्येब्रह्मणआयतनत्वश्रुतेरत्रापितथेत्यर्थः अर्थांतरमाह स्वशब्देनैवेतियस्मिन्द्यौरितिवाक्या २
त्पूर्वोत्तरवाक्ययोःपुरुषब्रह्मादिशब्देनब्रह्मसंकीर्तनान्मध्येपिब्रह्मग्राह्यमित्यर्थः।पुरुषइति।पूर्ववाक्यं।ब्रह्मैवेत्युत्तरवाक्यंसर्वस्मादिक्षु

स्थितंसर्वंब्रह्मैवेत्यर्थः उत्तरेणोत्तरस्यांदिशिउद्दालकवाक्यस्यसविशेषब्रह्मपरत्वमाशंक्यवाक्यंव्याचष्टे। तत्रेत्यादिना। सामानाधिकर ण्याद्धिचित्रआत्मेतिसंबंधः॥ यस्मिन्सर्वमोतंतमेवैकमित्येवकारैकशब्दाभ्यांनिर्विशेषंज्ञेयमित्युक्त्वाहेत्वंतरमाह। विकारानृतेति। वि-

अविद्याकृतंकार्यप्रपंचंविद्ययाप्रविलापयंतस्त्वमेवैकमायतनभूतमात्मानंजा नीथैकरसमिति यथायस्मिन्नास्तेदेवदत्तस्तदानयेत्युक्ते आसनमेवानयतिनदेव दत्तंतद्वदायतनभूतस्यैवैकरसस्यात्मनोविज्ञेयत्वमुपदिश्यते॥ विकारानृताभिसंध स्यचापवादः मृत्योःसमृत्युमाप्नोतियइहनानेवपश्यतीतिसर्वंब्रह्मेतितुसामा नाधिकरण्यंप्रपंचप्रविलापनार्थंनानेकरसत्वप्रतिपादनार्थंसयथासैंधवघनोनंतरो बाह्यः कृत्स्नोरसघनएवैवंवा अरेयमात्मानंतरोबाह्यः कृत्स्नःप्रज्ञानघनएवेत्येकरस

कारानृतेकल्पितेअभिसंधोभिमानोयस्यतस्यानर्थभाक्त्वेननिंदाश्रुतेश्चकूटस्थंसत्यंज्ञेयमित्यर्थः कथंतर्हिसामानाधिकरण्यंतत्राह सर्वं ब्रह्मेतियथ्योरःसस्थाणुरितिवत्प्रपंचस्तद्ब्रह्मेतिसर्वोद्देशेनब्रह्मत्वविधानात्बाधनार्थंनतुयद्ब्रह्मतत्सर्वमितिनानारसत्वार्थमित्यर्थः तत्र

नियामकमाह सयथेति। लवणपिंडोंतर्बहिश्चरसांतरशून्यः सर्वोलवणैकरसोयथाएवमरेमैत्रेयिचिदेकरसआत्मेत्यर्थः यद्यपिपारवत्व
सावयवत्वादिकंमुख्यसेतव्यभिचारितथापिसेतोर्जलादिबंधनरूपंयद्विधारणंतदेवव्यभिचारित्वेपिसेतुपदार्थैकदेशत्वाद्गुणत्वेनग्रा

ताश्रवणात्। तस्माद्युभ्वाद्यायतनंब्रह्म यच्चूक्तंसेतुश्रुतेः सेतोश्चपारवत्वोपपत्तेः
ब्रह्मणोर्थांतरेण द्युभ्वाद्यायतनेनभवितव्यमिति। अत्रोच्यते। विधारणत्वमात्र
मेवसेतुश्रुत्याविवक्ष्यते नपारवत्वादिनहिमृद्दारुमयोलोकेसेतुर्दृष्टइत्यत्रापि
मृद्दारुमयएवसेतुरभ्युपगम्यते सेतुशब्दार्थोपिविधरणत्वमात्रमेवनपारवत्वा
दिषिञोबंधनकर्मणः सेतुशब्दव्युत्पत्तेः॥

त्यंनतुपदार्थबहिर्भूतंपारवत्वादिकमित्याह। अत्रोच्यतइति। दृष्ट
त्वाच्चद्रूहेतिप्रसंगमाह। नहीति। अत्रश्रुतौपरेणेतिशेषः विधारणस्यशब्दार्थत्वंस्फुटयति। षिञ्इति। सिनोतीतिबध्नातीतिसेतुःपदार्थै २
कदेशोविधारणमित्यर्थः तथाचामृतपदस्यभावप्रधानत्वादमृतत्वस्यसेतुर्विधारकंब्रह्मास्येवामृतत्वंनान्यस्येत्यर्थः॥ ॥ ॥

यद्वाधुभ्वाद्याधारो ब्रह्मनसेतुशब्दार्थः किंतव्यवहितंज्ञानमित्याह।अपरइति। फलितमाह। तत्रयदुक्तमिति। ज्ञानेसेतौगृहीतेसतीत्यर्थः। मुक्तेरुप
सृप्यंप्रत्यकूत्वेनप्राप्यंपरब्रह्मतस्यात्रोक्तेरितिसूत्रार्थःमुक्तिप्रतियोगिनंबंधंदर्शयंति।देहादिष्विति॥तद्विपर्ययेणेति।उक्तपंचक्लेशात्मकबं-

अपरआहतमेवैकंजानथआत्मानमिति यदेतत्संकीर्तितमात्मज्ञानं यच्चैतदन्यावाचोविमुंचथेतिवाग्विमोचनंतदत्रामृ
तत्वसाधनत्वादमृतस्यैषसेतुरितिसेतुश्रुत्यासंकीर्त्यते नतुधुभ्वाद्यायतनं। तत्रयदुक्तंसेतुश्रुतेःब्रह्मणोर्थांतरेणधुभ्वा
द्यायतनेनभाव्यमित्येतदयुक्तं।मुक्तोपसृप्यव्यपदेशात्। इतश्चपरमेवब्रह्मधुभ्वाद्यायतनंयस्मान्मुक्तोपसृप्यतास्य
व्यपदिश्यमानादृश्यते। मुक्तेरुपसृप्यंमुक्तोपसृप्यंदेहादिष्वनात्मस्वहमस्मीतिआत्मबुद्धिरविद्यातस्तत्पूजनादौराग
स्तत्परिभवादौद्वेषःतदुच्छेददर्शनाद्भयंमोहश्चेत्येवमयमनंतभेदोनर्थव्रातःसंततःसर्वेषांनःप्रत्यक्षःतद्विपर्ययेणा
विद्यारागद्वेषादिदोषमुक्तैरुपसृप्यंगम्यतेतदितिधुभ्वाद्यायतनंप्रकृत्यव्यपदेशोभवति। कथंभिद्यतेहृदयग्रंथिश्छिद्यं
तेसर्वसंशयाःक्षीयंतेचास्यकर्माणितस्मिन्दृष्टेपरावरे इत्युक्त्वाब्रवीति तथाविद्वान्नामरूपाद्विमुक्तःपरात्परंपुरुषमुपैति
दिव्यमिति॥

धनिरस्तात्मनास्थितमित्यर्थः यथानद्योगंगाद्याः नामरूपेविहायसमुद्रात्मनातिष्ठंति तथाब्रह्मात्मविदपिसंसारंवि
हायपरात्कारणात् अव्यक्तात्परंपूर्णस्वयंज्योतिरानंदंप्रत्यक्त्वेनप्राप्यतिष्ठतीत्याह तथाविद्वानिति॥

यद्वा द्युभ्वाद्याधारो ब्रह्मनसेतुशब्दार्थः किंत्वव्यवहितं ज्ञानमित्याह । अपरइति । फलितमाह । तत्रयदुक्तमिति । ज्ञानेसेतौगृहीतेसतीत्यर्थः । मुक्तैरुप सृप्यंप्रत्यक्त्वेनमाप्यंपरब्रह्मतस्यात्रोक्तेरितिसूत्रार्थः मुक्तिमतियोगिनंबंधंदर्शयंति । देहादिष्विति ।। तद्विपर्ययेणेति । उक्तपंचक्लेशात्मकबं-

अपरआहतमेवैकंज्ञानथआत्मानमिति यदेतत्संकीर्तितमात्मज्ञानं यच्चैतदन्यावाचोविमुंचथेति वाग्विमोचनं तदत्रामृ तत्वसाधनत्वादमृतस्यैषसेतुरितिसेतुश्रुत्यासंकीर्त्यते नतुद्युभ्वाद्यायतनं । तत्रयदुक्तंसेतुश्रुतेः ब्रह्मणोर्थांतरेण द्युभ्वा द्यायतनेनभाव्यमित्येतदयुक्तं । मुक्तोपसृप्यव्यपदेशात् । इतश्चपरमेवब्रह्म द्युभ्वाद्यायतनंयस्मान्मुक्तोपसृप्यतास्य व्यपदिश्यमानादृश्यते । मुक्तैरुपसृप्यंमुक्तोपसृप्यंदेहादिष्वनात्मस्वहमस्मीतिआत्मबुद्धिरविद्यातत्तस्तत्पूजनादौराग स्तत्परिभवादौद्वेषः तदुच्छेददर्शनाद्भयंमोहश्चेत्येवमयमनंतभेदोनर्थव्रातः संततः सर्वेषांनः प्रत्यक्षः तद्विपर्ययेणा विद्यारागद्वेषादिदोषमुक्तैरुपसृप्यंगम्यतेतदितिद्युभ्वाद्यायतनंप्रकृत्यव्यपदेशोभवति । कथंभिद्यतेहृदयग्रंथिश्छिद्यं तेसर्वसंशयाः क्षीयंतेचास्यकर्माणितस्मिन्दृष्टेपरावरे इत्युक्त्वाब्रवीति तथाविद्वान्नामरूपाद्विमुक्तः परात्परंपुरुषमुपैति दिव्यमिति ॥

धनिरत्वात्मनास्थितमित्यर्थः यथानद्योगंगाद्याः नामरूपेविहायसमुद्रात्मनातिष्ठंति तथाब्रह्मात्मविदपिसंसारंवि हायपरात्कारणात् अव्यक्तात्परंपूर्णंस्वयंज्योतिरानंदंप्रत्यक्त्वेनप्राप्यतिष्ठतीत्याह तथाविद्वानिति ॥

इदंप्रधानादेः किंनस्यादत आह। ब्रह्मणश्चेति। अस्यमुमुक्षोः हृदीप्तिपदेनात्मधर्मत्वंकामानांनिरस्तंयदाकामनिवृत्तिरथतदाऽमृतोभवतिमरण
हेत्वभावान्नकेवलमनर्थनिवृत्तिः किंत्वत्रदेहेतिष्ठन्नेवब्रह्मानंदमश्नुतइत्यर्थः लिंगांतरमाह। अपिचेति। धीरोविवेकीतमेवात्मानंविज्ञायवि

ब्रह्मणश्चमुक्तोपसृप्यत्वंप्रसिद्धंशास्त्रेयदासर्वेप्रमुच्यंतेकामायेस्यहृदिश्रिताःअथमर्त्योमृतोभ
वत्यत्रब्रह्मसमश्नुतइत्येवमादौप्रधानादीनांतुनक्वचिन्मुक्तोपसृप्यत्वमस्तिप्रसिद्धं अपिचतमेवैकं
जानथआत्मानमन्यावाचोविमुंचथेतिवाग्विमोकपूर्वकविज्ञेयत्वमिहद्युभ्वाद्यायतनस्योच्यते
तच्चश्रुत्यंतरेब्रह्मणोदृष्टंतमेवधीरोविज्ञायप्रज्ञांकुर्वीतब्राह्मणः नानुध्यायात् बहून्शब्दान्वाचो
विग्लापनंहितदिति तस्मादपिद्युभ्वाद्यायतनंपरंब्रह्मानानुमानमतच्छब्दात् यथाब्रह्मणःप्रतिपा
दकोवैशेषिकोहेतुरुक्तोनैवमर्थांतरस्यवैशेषिकोहेतुःप्रतिपादकोस्तीत्याह। नानुमानंसांख्यस्मृति
परिकल्पितंप्रधानमिहद्युभ्वाद्यायतनत्वेनप्रतिपत्तव्यं। कस्मादतच्छब्दात्। तस्याचेतनस्यप्रधानस्य

शुद्धंलक्ष्यपदार्थंज्ञात्वावाक्यार्थज्ञानंकुर्यात् ज्ञानार्थिनोज्ञानप्रतिबंधककर्मकांडादेर्वैमुख्यमाह। नेति। बहूनित्युक्तत्वाअल्पान्वेदांतशब्दानं
गी

इदंप्रधानादेः किंनस्यादतआह। ब्रह्मणश्चेति। अस्यमुमुक्षोः हृदीतिपदेनात्मधर्मत्वंकामानांनिरस्तंयदाकामनिवृत्तिरथतदाऽमृतोभवतिमरण हेत्वभावान्नकेवलमनर्थनिवृत्तिः किंत्वत्रदेहेतिष्ठन्नेवब्रह्मानंदमश्नुतइत्यर्थः लिंगांतरमाह। अपिचेति। धीरोविवेकीतमेवात्मानंविज्ञायवि

ब्रह्मणश्चमुक्तोपसृप्यत्वंप्रसिद्धंशास्त्रेयदासर्वेप्रमुच्यंतेकामायेस्यहृदिश्रिताः अथमर्त्योमृतोभ वत्यत्रब्रह्मसमश्नुतइत्येवमादौप्रधानादीनांतुनक्वचिन्मुक्तोपसृप्यत्वमस्तिप्रसिद्धं अपिचतमेवैकं जानथआत्मानमन्यावाचोविमुंचथेतिवाग्विमोकपूर्वकविज्ञेयत्वमिह द्युभ्वाद्यायतनस्योच्यते तच्चश्रुत्यंतरेब्रह्मणोदृष्टंतमेवधीरोविज्ञायप्रज्ञांकुर्वीतब्राह्मणः नानुध्यायाद्बहूञ्शब्दान्वाचो विग्लापनंहितदिति तस्मादपि द्युभ्वाद्यायतनंपरंब्रह्मनानुमानमतच्छब्दात् यथाब्रह्मणःप्रतिपा दकोवैशेषिकोहेतुरुक्तोनैवमर्थांतरस्यवैशेषिकोहेतुःप्रतिपादकोस्तीत्याह। नानुमानंसांख्यस्मृति परिकल्पितंप्रधानमिहद्युभ्वाद्यायतनत्वेनप्रतिपत्तव्यं। कस्मादतच्छब्दात्। तस्याचेतनस्यप्रधानस्य

शुद्धंलक्ष्यपदार्थंज्ञात्वावाक्यार्थज्ञानंकुर्यात् ज्ञानार्थिनोज्ञानप्रतिबंधककर्मकांडादेर्वैमुख्यमाह। नेति। बहूनित्युक्तत्याऽल्पान्वेदांतशब्दानं ४

गी

करोति। अष्टौस्थानानिवर्णानामुरः कंठः शिरस्तथा जिह्वामूलंचदंताश्चनासिकोष्टौचतालुचेति एतानिवागिंद्रियस्थानत्वाद्वाकशब्देनोच्यंते तेषांशोषणमात्र मनात्मशब्दोच्चारणफलंतध्यानान्मनसोग्लानिमात्रमित्यर्थः। वैशेषिकइति। असाधारण आत्मशब्दादिरित्यर्थः अतच्छ

प्रतिपादकः शब्दस्तच्छब्दोनतच्छब्दः अतच्छब्दः नत्यत्राचेतनस्यप्रधानस्यप्रतिपादकः कश्चि च्छब्दोस्ति येनाचेतनंप्रधानंकारणत्वेनायतनत्वेनवावगम्येत तद्विपरीतस्यचेतनस्यप्रतिपाद कशब्दोत्रास्ति यः सर्वज्ञः सर्वविदित्यादिः अतएवनवायुरपिद्युभ्वाद्यायतनत्वेनाश्रीयते॥ प्रा णभृच्च। यद्यपिप्राणभृतोविज्ञानात्मनआत्मत्वंचेतनत्वंचसंभवति तथापिउपाधिपरिछिन्नज्ञा नस्यसर्वज्ञत्वाद्यसंभवेसत्यस्मादेवातच्छब्दात्प्राणभृदपिनद्युभ्वाद्यायतनत्वेनाश्रयितव्यः नचोपा धिपरिछिन्नस्याविभोः प्राणभृतोद्युभ्वाद्यायतनत्वमपिसम्यक्संभवति पृथग्योगकरणमुत्त रार्थंकृतश्चनप्राणभृद्युभ्वाद्यायतनत्वेनाश्रयितव्यः। भेदव्यपदेशाच्च। भेदव्यपदेशश्चेह भवति।

व्दादित्यस्यार्थांतरमाह। तद्विपरीतस्येति। अतएवतच्छब्दा इव॥ प्राणभृच्चेतिसूत्रेचकारः पूर्वसूत्रस्थनञोनुषंगार्थः सर्वज्ञपदसमानाधिक रण-

आत्मशब्दो न जीववाचीत्यतछब्दस्तस्मादित्यर्थः ननु नानुमानप्राणभृतावतच्छब्दादित्येकमेव सूत्रं किमर्थं न कृतं उभयनिरासहेतोरेकत्वादित्यत आह। पृथगिति। योगः सूत्रं उत्तरसूत्रस्य हेतूनां जीवमात्रनिरासेनान्वयेऽपि सुखबोधार्थं प्राणभृच्चेति पृथक् सूत्रकरणमित्यर्थः तानेव हेतूनाकांक्षा

तमेवैकं जानथ आत्मानमिति ज्ञेयत्वावभावेन प्राणभृत्त्वावन्मुमुक्षुत्वात् ज्ञातापरिशेषादात्मशब्दवाच्यं ब्रह्म ज्ञेयं द्युभ्वाद्यायतनमिति गम्यते न प्राणभृत्। कुतश्च न प्राणभृत् द्युभ्वाद्यायतनत्वेनाश्रयितव्यः। प्रकरणात्। प्रकरणं चेदं परमात्मनः कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवतीत्येकविज्ञानेन सर्वविज्ञानापेक्षणात् परमात्मनि हि सर्वात्मके विज्ञाते सर्वमिदं विज्ञातं स्यात् न केवले प्राणभृति। कुतश्च न प्राणभृत् द्युभ्वाद्यायतनत्वेनाश्रयितव्यः। स्थित्यदनाभ्यां च। द्युभ्वाद्यायतनं च प्रकृत्य द्वा सुपर्णा सयुजा सखायेत्यत्र स्थित्यदने निर्दिश्येते तयोरन्यः पिप्पलं स्वाद्वत्तीति कर्मफलाशनं अनश्नन्नन्यो ऽभिचाकशीतीत्यौदासीन्येनावस्थानं ताभ्यां स्थित्यदनाभ्यां ईश्वरक्षेत्रज्ञौ तत्र गृह्येते॥

द्वारा व्याचष्टे। कुतश्चनेत्यादिना। यद्यपि विशुद्धप्रत्यगात्मैवात्र ज्ञेयः तथापि जीवत्वाकारेण ज्ञातुर्ज्ञेयाद्भेदात् न ज्ञेयरूपत्वमित्यर्थः एवं च जीवत्वलिंगविशिष्टत्वेन जीवस्य द्युभ्वादिवाक्यार्थत्वं निरस्यते न शुद्धरूपेणेति मंतव्यम्॥ ॥ ॥ ५

ननुस्थित्येश्वरस्याद नाच्जीवस्यद्वासुपर्णेत्यत्रोक्तावपि ईश्वरआयतनवाक्येनकिमर्थंग्राह्य इत्यतआह । यद्विनेश्वरइति । अत्रनेश्वरः शुद्धतन्मा
त्रग्राह्यः नसर्वज्ञत्वादिविशिष्टः तस्यात्राप्रतिपाद्यत्वात् तथाचप्रतिपाद्यार्थस्याकस्मान्मध्ये वचनासंभवादाद्यवाक्येनग्रहणंकार्यमित्यभिसंधि
तमज्ञात्वाशंकते । ननुतवापीति । ब्रह्मस्वरूपप्रतिपादनार्थमकस्मादप्रकृतस्यापिलोकेप्रसिद्धस्यजीवस्यानुवादसंभवइतिपरिहरति । नेति
ननुद्वासुपर्णेत्यत्रबुद्धिजीवयोरुक्तेः कथमिदंसूत्रमित्यतआह । गुहामिति । स्थितपदनाभ्यामीश्वरक्षेत्रज्ञयोरनुवादेनैक्यंदर्शितमित्यर्थः न

यदिनेश्वरोद्युभ्वाद्यायतनत्वेनविवक्षितः ततस्तस्यप्रकृतस्येश्वरस्यक्षेत्रज्ञात्पृथग्वचनमवकल्पते अन्यथाह्यप्रकृतवचन
माकस्मिकमसंबद्धंस्यात् । ननुतवापिक्षेत्रज्ञस्येश्वरात्पृथग्वचनमाकस्मिकमेवप्रसज्येत नतस्याविवक्षितत्वात् क्षेत्रज्ञो
हिकर्तृत्वेनभोक्तृत्वेनचप्रतिशरीरंबुद्ध्युपाधिसंबद्धोलोकतएवप्रसिद्धोनासौश्रुत्यातात्पर्येणविवक्ष्यते ईश्वरस्तु लोकतो ।

न्वत्रजीवेशयोनानुवादोऽपैंगिव्याख्याविरोधादतः सूत्रासंगतिरित्यतआह । यदापीति । तदापीसूत्रस्यासंगतिर्नास्तीत्यर्थः अदनवाक्येनबुद्धि
मनूद्यस्थितिवाक्येनबुद्ध्यादिविलक्षणशुद्धप्रत्यक्ब्रह्मणोज्ञेयस्योक्तेर्द्युभ्वादिवाक्येतदेवग्राह्यंनबुद्ध्युपहितोजीवइतिसूत्रसंगतिमाह ।
कथमित्यादिना नन्वत्रानुपहितोजीवउक्तोनपरंब्रह्मेत्यतआह । यस्त्विति । पौनरुक्त्यंशंकते । तदेतदिति । द्युभ्वादिवाक्यस्यब्रह्मपरत्व
मित्यर्थः समाधत्ते । प्रपंचार्थमिति । सेतुशब्दव्याख्यानंतुभूतयोनेः प्रत्यगात्मत्वस्फुटीकरणार्थमित्यर्थः तस्मात्मुंडकोपनिषद्ब्रह्मणि

समन्वितेतिसिध्दं। भूमासंप्रसादादध्युपदेशात्। छांदोग्यमुदाहरति। इदमिति। नाल्पेसुखमस्ति भूमैवसुखंतस्मान्निरतिशयसुखराशि

प्रसिध्दत्वात् श्रुत्यातात्पर्येणाविवक्ष्यतइति नतस्याकस्मिकंवचनंयत्कंगुहांप्रविष्टावात्मानौ हीत्यत्राप्येतद्दर्शितं द्वासुपर्णे त्यस्यामृचीश्वरक्षेत्रज्ञावुच्येतेइति। यदापिपैंग्युपनिषत्कृतेनव्याख्यानेनास्यामृचिसत्वक्षेत्रज्ञाउच्येते तदापिनविरोधः कश्चित्कथंप्राणभृदिहघटादिच्छिद्रवत्सत्वाद्युपाध्यभिमानित्वेनप्रतिशरीरंगृह्यमाणोद्युभ्वाद्यायतनंनभवतीतिनिषिध्यते॥ यस्तुसर्वशरीरेषूपाधिभिर्विनोपलक्ष्यतेपरएवसभवति यथाघटादिच्छिद्राणिघटादिभिरुपाधिभिर्विनोपलक्ष्यमाणानि महाकाशएवभवंतितद्वत्प्राणभृतः परस्मादन्यत्वानुपपत्तेः प्रतिषेधोनोपपद्यते तस्मात्सत्वाद्युपाध्यभिमानिनएवद्युभ्वाद्या यतनत्वप्रतिषेधः तस्मात्परमेवब्रह्मद्युभ्वाद्यायतनं तदेतदद्रश्यत्वादिगुणकोधर्मोक्तेरित्यनेनैवसिध्दं तस्यैवहिभूतयोनिवाक्यस्यमध्येइदंपठितंयस्मिंद्यौः पृथिवीचांतरिक्षमितिप्रपंचार्थंतुपुनरुपन्यस्तं। भूमासंप्रसादादध्युपदेशात्। इदंसमामनंतिभूमात्वेवविजिज्ञासितव्यइतिभूमानंभगवोविजिज्ञासइति यत्रनान्यत्पश्यतिनान्यच्छृणोतिनान्यद्विजानाति सभूमाअथयत्रान्यत्पश्यत्यन्यच्छृणोति अन्यद्विजानातितदल्पमित्यादितत्रसंशयः किंप्राणोभूमास्यादाहोस्वित्परमात्मेति॥ ॥

नाभूमैवविचार्यइति नारदंप्रतिसनत्कुमारेणोक्तेसतिनारदोब्रूते। भूमानमिति। भूम्नोलक्षणमद्वितीयत्वमाह। यत्रेति। भूमलक्षणंपरिच्छिन्नलक्षणोक्त्यास्फुटयति। अथेति

ननुस्थित्येश्वरस्यादनाज्जीवस्यद्वासुपर्णेत्यत्रोक्तावपिईश्वरआयतनवाक्येनकिमर्थंग्राह्य इत्यतआह। यद्वित्वेश्वरइति। अत्रचेश्वरः शब्दतन्मा त्रग्राह्यः नसर्वज्ञत्वादिविशिष्टः तस्यात्राप्रतिपाद्यत्वात् तथाचप्रतिपाद्यार्थस्याकस्मान्मध्ये वचनासंभवादाद्यवाक्येन ग्रहणंकार्यमित्यभिसंधि तमज्ञात्वाशंकते। ननुतथापीति। ब्रह्मस्वरूपप्रतिपादनार्थमकस्मादप्रकृतस्यापिलोकेप्रसिद्धस्यजीवस्यानुवादसंभवइतिपरिहरति। नेति ननुद्वासुपर्णेत्यत्रबुद्धिजीवयोरुक्तेः कथमिदंसूत्रमित्यतआह।गुहामिति। स्थित्यदनाभ्यामीश्वरक्षेत्रज्ञयोरनुवादेनैक्यंदर्शितमित्यर्थः न

यदित्वेश्वरोद्युभ्वाद्यायतनत्वेनविवक्षितः ततस्तस्यप्रकृतस्येश्वरस्यक्षेत्रज्ञात्पृथग्वचनमवकल्पते अन्यथाह्यप्रकृतवचन माकस्मिकमसंबध्दंस्यात्। ननुतवापिक्षेत्रज्ञस्येश्वरात्पृथग्वचनमाकस्मिकमेवप्रसज्येत नतस्याविवक्षितत्वात् क्षेत्रज्ञो हिकर्तृत्वेनभोक्तृत्वेनचप्रतिशरीरंबुध्युपाधिसंबध्दोलोकतएवप्रसिध्दोनासौश्रुत्यातात्पर्येणविवक्ष्यते ईश्वरस्तुलोकतो ऽ

न्वत्रजीवेशौनानुवाद्यौपैंगिव्याख्याविरोधादतः सूत्रासंगतिरित्यतआह। यदापीति। तदापीसूत्रस्यासंगतिर्नास्तीत्यर्थः अदनवाक्येनबुद्धि मनूद्यस्थितिवाक्येनबुध्यादिविलक्षणशुध्दप्रत्यक् ब्रह्मणोज्ञेयस्योक्तेर्द्युभ्वादिवाक्येतदेवग्राह्यंनबुध्युपहितोजीवइतिसूत्रसंगतिमाह। कथमित्यादिना नन्वत्रानुपहितोजीवउक्तोनपरंब्रह्मेत्यतआह। यस्त्विति। पौनरुक्त्यंशंकते। तदेतदिति। द्युभ्वादिवाक्यस्यब्रह्मपरत्व मित्यर्थः समाधत्ते। प्रपंचार्थमिति। सेतुशब्दव्याख्यानंतुभूतयोनेः प्रत्यगात्मत्वस्फुटीकरणार्थमित्यर्थः तस्मान्मुंडकोपनिषद्ब्रह्मणि

अत्रसंशयबीजंप्रश्नपूर्वकमाह ।कुतइत्यादिना । बहोर्भावइति पृथ्व्यादिभ्यइमनिजितिइमनिच्प्रत्ययेकृते बहोर्लोपोभूचबहोरितिसूत्रेणबहोः पर-
स्येमनिच्प्रत्ययस्यादेरिकारस्यलोपस्यात् । बहोस्थानेभूइत्यादेशश्चस्यादित्युक्तेः भूमन्निितिशब्दोनिष्पन्नः तस्यचभावार्थकेमनिच्प्रत्ययांतत्वाद्

कुतःसंशयः भूमेतितावत्बहुत्वमभिधीयते बहोर्लोपोभूचबहोरिति भूमशब्दस्यभावप्रत्ययांततास्मरणात्
किमात्मकंपुनस्तद्बहुत्वमितिविशेषाकांक्षायांप्राणोवाआशायाभूयानितिसंनिधानात् प्राणोभूमेतिप्रतिभाति।
तथाश्रुतंह्येवमेवभगवद्दृशेभ्यस्तरतिशोकमात्मविदितिसोहंभगवः शोचामितंमाभगवान्शोकस्यपारंता-
रयत्वितिप्रकरणोत्थानात्परमात्माभूमेत्यपिप्रतिभाति तत्रकस्योपादानंन्याय्यंकस्यवाहानमितिभवतिसंश
यः किंतावत्प्राप्तंप्राणोभूमेतिकस्मात्भूयःप्रश्नप्रतिवचनादर्शनात् यथात्धस्तिभगवोनाम्नोभूयइतिवाग्वाव
नाम्नोभूयसीतिवाचोभूयइतिमनोवाववाचोभूयइतिचनामादिभ्योत्याप्राणात् भूयःप्रश्नप्रतिवचनप्रवाहः

हुत्वंवाच्यंतत्किंधर्मिकमित्याकांक्षायांसंनिहितप्रकरणस्थः प्राणोधर्मीतिभातिवाक्योपक्रमस्थआत्मापिस्वप्रतिपादनापेक्षोधर्मित्वेनभातीतिस
न्निहितव्यवहितप्रकरणाभ्यांसंशयइत्यर्थः पूर्वमात्मशब्दात् द्युभ्वाद्यायतनंब्रह्मेत्युक्तंतदयुक्तंतरतिशोकमात्मवित् इत्यब्रह्मण्यप्यात्म

शा॰भा॰ शब्दप्रयोगादित्याक्षेपसंगत्या पूर्वपक्षयति । प्राणो भूमेति । धर्मधर्मिणोरभेदात्सामानाधिकरण्यं द्रष्टव्यं पूर्वोत्तरपक्षयोः प्राणोपास्तिः ब्रह्म- म॰तृ॰पा॰
७ ज्ञानं च फलं क्रमेण मंतव्यं अत्राध्याये भूयः प्रश्नोत्तरभेदादर्थभेदो दृश्यते भूमा तु प्राणात्परं भूयः प्रश्नविनैवोक्तलिंगेन प्राणादभिन्न इत्याह ।

प्रवृत्तो नैवं प्राणात्परं भूयः प्रश्नप्रतिवचनं दृश्यते अस्ति भगवः प्राणाद्भूय इति ॥ प्राणमेव
तु नामादिभ्य आशांतेभ्यो भूयांसं प्राणो वाव आशाया भूयानित्यादिना समर्पयन् सुत्का प्राणद-
र्शिनश्चातिवादित्वमतिवाद्यसि इत्यतिवाद्यस्मीति ब्रूयान्नापह्नुवीत इत्यभ्यनुज्ञायैष तु वा
अतिवदति यः सत्येनातिवदतीति प्राणव्रतमतिवादित्वमनुकृष्यापरित्यज्यैव प्राणं सत्यादि
परंपरया भूमानमवतारयन् प्राणमेव भूमानं मन्यत इति गम्यते कथं पुनः प्राणे भूमनि व्या-
ख्यायमाने यत्र नान्यत्पश्यतीत्येतद्भूम्नो लक्षणपरं वचनं व्याख्यायत इत्युच्यते । सुषुप्ताव-

कस्मादित्यादिना । प्राणाद्भूय इति न दृश्यत इति पूर्वेण संबंधः ॥ नन्वेष तु वा अतिवदतीति तुशब्देन प्राणप्रकरणविच्छेदात् न प्राणो भूमेत्यत आह । ७
प्राणमेवेति । नामाद्याशांतानुपास्यान् तीत्य प्राणं श्रेष्ठं वदतीत्यतिवादी प्राणवित् तं प्रत्यतिवाद्यसीति केनचित् प्रश्ने कृते अस्मीति ब्रूयात् नाह

मतिवादीत्यपन्हवंकुर्यादित्युक्तंप्राणविदंएषइतिपरामृश्यसत्यवचनध्यानमननश्रद्धादिधर्मपरंपरांविधायभूमोपदेशान्नप्रकरणविच्छेदः तु
शब्दोनामाद्युपासकस्यातिवादित्वनिरासार्थइत्यर्थः भूम्नोलक्षणवचनंसुखत्वममृतत्वंचप्राणेप्रश्नपूर्वकंयोजयति। कथंपुनरित्यादिना।प्रा

स्वायांप्राणग्रस्तेषुकरणेषुदर्शनादिव्यवहारनिवृत्तिदर्शनात् संभवतिप्राणस्यापियत्रनान्यत्पश्यतीत्येतल्लक्षणं
तथाचश्रुतिः नशृणोतिनपश्यतीत्यादिनासर्वकरणव्यापारप्रत्यस्तमयरूपांसुषुप्त्यवस्थामुक्त्वाप्राणाग्नयएवैत-
स्मिन्पुरेजाग्रतीतितस्यामेवावस्थायांपंचवृत्तेःप्राणस्यजागरणंब्रुवंतीप्राणप्रधानांसुषुप्त्यवस्थांदर्शयति यत्रैत
त्भूम्नः सुखत्वंश्रुतंयोवैभूमातत्सुखमितितदप्यविरुद्धंयत्रैषदेवःस्वप्नान्नपश्यत्यथैतस्मिन्शरीरेसुखंभवती
तिसुषुप्तावस्थायामेवसुखश्रवणात् यश्चयोवैभूमातदमृतमितितदपिप्राणस्याविरुद्धंप्राणोवाअमृतमितिश्रु
तेः कथंपुनः प्राणंभूमानंमन्यमानस्यतरतिशोकमात्मविदित्यात्मविविदिषयाप्रकरणस्योत्थानंउपपद्येत ॥

णग्रस्तेषुप्राणेलीनेषुनशृणोतिसुषुप्तपुरुषइतिशेषः गार्हपत्योहवाएषोपानोव्यानोन्वाहार्यपचनआहवनीयःप्राणइतिश्रुतेःप्राणाअग्नय
इहपुरेशरीरेजाग्रतिसव्यापाराएवतिष्ठंतीत्यर्थः देवोजीवः अथतदास्वप्नादर्शनकालेसुखश्रवणात्प्राणस्यसुखत्वमविरुद्धमित्यन्वयः
॥

आत्मपदेनोपक्रमविरोधं परिहरति प्राणएवेति प्राणस्यात्मत्वं कथमित्याशंक्य श्रुतत्वादित्याह तथाहीति सर्वंसमर्पितमितिचसर्वाधिष्ठानं प्राणंस्वीकरोतिश्रुतिरित्यन्वयः अतआत्मत्वंप्राणेपिमुख्यमितिभावः भूमरूपत्वंयोजयति सर्वात्मत्वेति संप्रसादशब्देनप्राणंलक्षयि-

प्राणएवेहात्माविवक्षितइतिब्रूमः तथाहिप्राणोहिपिताप्राणोमाताप्राणोभ्राता प्राणःस्वसाप्राणआचार्यः प्राणोब्राह्मणइतिप्राणमेवसर्वात्मानंकरोतियथावाअ रानाभौसमर्पिताएवमस्मिन्प्राणेसर्वंसमर्पितमितिचसर्वात्मत्वारनाभिनिदर्शना- भ्यांचसंभवतिवैपुल्यात्मिकाभूमरूपताप्राणस्यतस्मात्प्राणोभूमेत्येवंप्राप्तं ततइद मुच्यते परमात्मैवहभूमाभवितुमर्हति नप्राणः कस्मात्संप्रसादादध्युपदेशात् संप्र सादइतिसुषुप्तस्थानमुच्यते सम्यक्प्रसीदत्यस्मिन्नितिनिर्वचनात् तथाबृहदारण्य केचस्वप्नजागरितस्थानाभ्यांसहपागत् तस्यांचसंप्रसादावस्थायांप्राणोजागर्तीति

तुंमुख्यार्थंदर्शयति संप्रसादइति सवाएषतस्मिन्संप्रसादे स्थित्वापुनराद्रवतीतिप्रयोगाच्चतत्सदंसुषुप्तिवाचकमित्याह बृहदिति

वाच्यार्थसंबंधात्प्राणोलक्ष्यइत्याह तस्यांचेति अत्रसूत्रइत्यर्थः भूमाप्राणाद्भिन्नः प्रश्नाध्यायेतस्मादूर्ध्वमुपदिष्टत्वात् नामादेरूर्ध्व
मुपदिष्टवागादिवदित्यर्थः विपक्षेहेतूछेदकंबाधकमाह प्राणएवचेदितितस्यैवतस्मादूर्ध्वमुपदिष्टत्वमयुक्तंनामादिषुअहृदृष्टंने

प्राणोऽत्रसंप्रसादोभिप्रेयतेप्राणादूर्ध्वंभूम्नउपदिश्यमानत्वादित्यर्थः प्राणएवचेद्भूमास्यात् सए-
वतस्मादूर्ध्वमुपदिश्येतेत्यश्लिष्टमेतत्स्यात् नहिनामैवनाम्नोभूयइतिनाम्नऊर्ध्वमुपदिष्टं किंतर्हि
नाम्नोन्यदर्थांतरमुपदिष्टंवागाख्यंवाग्वाचनाम्नोभूयसीति तथावागादिभ्योत्थाप्राणादर्थांतरमेव
तत्रतत्रोर्ध्वमुपदिष्टंतद्वत्प्राणादप्यूर्ध्वमुपदिश्यमानोभूमाप्राणादर्थांतरभूतोभवितुमर्हति ॥ नन्वि
हनास्तिप्रश्नोस्तिभगवः प्राणाद्भूयइतिनापिप्रतिवचनमस्तिप्राणाद्वावभूयोस्तीतिकथंप्राणाद
धिभूमोपदिश्यते इत्युच्यतेप्राणविषयमेवचातिवादित्वमुत्तरात्रुकृष्यमाणंपश्यामः एषतुवाअ
तिवदति यःसत्येनातिवदतीतितस्मान्नास्तिप्राणादध्युपदेशइति अत्रोच्यते नतावत्प्राणविषय

स्यर्थः ॥ हेत्वसिद्धिंशंकते नन्विहेतिप्रकृतप्राणविस्तारामर्शकएषशब्दोनभवति तस्ययच्छब्दपरतंत्रत्वेनसत्यनि वादित्वानिवात्

अतः प्राणप्रकरणंविच्छिन्नमितिहेतुसिद्धिरित्याह अत्रोच्यतइति सत्येनातिवादित्वंविशेषस्तृतीयएषइत्युक्तेन पूर्वानुकर्षइत्यर्थः यएषप्राणविदतिवदतिइत्यनूद्यसत्यंवदेदितिविधानात् नप्राणप्रकरणविच्छेदः इतिदृष्टांतेनशंकते। नन्विति सत्यशब्दोक्त्यवा

स्यैवातिवादित्वस्यैतदनुकर्षणमितिशक्यंवक्तुंविशेषवादाद्यः सत्येनातिवदतीति ननुविशेषवादोप्ययंप्राण विषयएवभविष्यति कथंयथैषोग्निहोत्रीयः सत्यंवदतीत्युक्तेनसत्यवदनेनाग्निहोत्रित्वंकेनतर्हिअग्निहोत्रेणै वतत्सत्यवदनंत्वग्निहोत्रिणोविशेषउच्यते तथैषतुवाअतिवदतियः सत्येनातिवदतीत्युक्तेनसत्यवदनेनातिवा दित्वंकेनतर्हिप्रकृतेनप्राणविज्ञानेनैवसत्यवदनंतुप्राणविदोविशेषोविवक्ष्यतइतिनेतिब्रूमः श्रुत्यर्थपरित्यागप्र संगात् श्रुत्याह्यत्रसत्यवदनेनातिवादित्वंप्रतीयते यः सत्येनातिवदतिसोतिवदतीतिनात्रप्राणविज्ञानस्यसंकी- र्तनमस्तिप्रकरणात्तुप्राणविज्ञानंसंबध्येत तत्रप्रकरणानुरोधेनश्रुतिः परित्यक्ता स्यात्॥

धितेरूढोत्रब्रह्मवाचकः

तदन्यस्यमिथ्यात्वात् सत्यवचनेत्वबाधितार्थसंबंधात् लाक्षणिकइतिनात्रलक्ष्यवचनविधिरित्याह नेतिब्रूमइतिकिंचसत्येनब्रह्म णातिवदतीतितृतीयाश्रुत्याब्रह्मकरणकमतिवादित्वश्रुतंतस्यप्रकरणाद्बाधोनयुक्तइत्याह श्रुत्याहीत्यादिना नात्रेतिसत्यवाक्येत्य- र्थः॥

एवंसत्येनेतिश्रुत्याप्रकरणंबाध्यमित्युक्तातुशब्देनापिबाधमाह। प्रकृतेतिविजिज्ञास्यत्वलिंगाच्चपूर्वोक्ताभिन्नमित्याह सत्यंत्वेवेति प्रक-
रणविच्छेदेदृष्टांतमाह तस्मादितिश्रुतिलिंगबलादेतत्सत्यंप्रकृतात्प्राणात्प्राधान्येनभिन्नंद्रष्टव्यमित्यर्थः एवमतिवादित्वस्यब्रह्मसंबंधो

प्रकृतव्यावृत्त्यर्थश्चतुशब्दोनसंगच्छेतैषतुवाअतिवदतीतिसत्यंत्वेवविजिज्ञा
सितव्यमितिचप्रयत्नांतरकरणमर्थांतरविवक्षांसूचयति तस्माद्यथैकवेदप्रशं
सायांप्रवृत्तायामेषतुमहाब्राह्मणोयश्चतुरोवेदानधीतइत्येकवेदेभ्योर्थांतरभूत
श्चतुर्वेदः प्रशस्यतेतादृगेतद्द्रष्टव्यंनचप्रश्नप्रतिवचनरूपयैवार्थांतरविवक्षया
भवितव्यमितिनियमोस्तिप्रकृतसंबंधासंभवकारितत्वादर्थांतरविवक्षायाः तत्र
प्राणांतमनुशासनंश्रुत्वातूष्णींभूतंनारदंस्वयमेवसनत्कुमारोव्युत्पादयति यस्मा
णाविज्ञानेनविकारानृतविषयेणातिवादित्वमनतिवादित्वमेवतदेषतुवाअतिव

त्त्याप्राणलिंगत्वंनिरस्तंयत्तुप्रश्नंविनोक्तत्वलिंगात् भूमाप्राणइतितन्नतस्याप्रयोजकत्वादित्याह नचेतिप्रश्नभेदादर्थभेदइतिननियमः

एकस्यात्मनो मैत्रेय्या बहुशः पृष्टत्वात्तस्यां विनोक्त चतुर्वेदस्य प्रकृतैकवेदाद्भिन्नत्वदर्शनाच्चेत्यर्थः तत्र यथा चतुर्वेदत्वस्य प्रकृतासंबंधा दर्थभेदः एवमिहापीति स्फुटयति तत्रेत्यादिना सत्यपदेन प्राणोक्तिरित्यत आह तत्र सत्यमिति विज्ञानं निदिध्यासनं आदिपदात्मन

वदति यः सत्येनातिवदतीति तत्र सत्यमिति परं ब्रह्मोच्यते परमार्थरूपत्वात् सत्यं ज्ञानमनंतं ब्रह्मेति च श्रुत्यंतरात् तथाप्युत्पादितायनारदाय सोऽहं भगवः सत्येनाति वदामीत्येवं प्रवृत्ताय विज्ञानादिसाधनपरंपरया भूमानमुपदिशति॥ तत्र यत्प्रा णादधि सत्यं वक्तव्यं प्रतिज्ञातं तदेवेह भूमेत्युच्यत इति गम्यते तस्मादस्ति प्राणा दधि भूम्न उपदेश इत्यतः प्राणादन्यः परमात्मा भूमा भवितुमर्हति एवं चेहात्मवि विदिषया प्रकरणस्योत्थानमुपपन्नं भविष्यति प्राण एवेहात्मा विवक्षित इत्येतदपि नोपपद्यते न हि प्राणस्य मुख्यया वृत्त्यात्मत्वमस्ति न चान्यत्र परमात्मज्ञानाच्छोकनिवृत्ति

नश्रद्धासाध्यश्रवणमनः शुद्धिनिष्ठाल्लब्धेतु कर्माणि गृह्यंते इमान्यपि श्रवणादीनि ज्ञेयस्य सत्यस्य ब्रह्मत्वे लिंगानि॥ एवं श्रुतिलिंगै

प्राणस्यावांतरप्रकरणंबाधित्वाप्रस्तुतंसत्यंब्रह्मभूमपदोक्तंवकुत्वधर्मीत्याह तन्नयादितिकिंचसंनिहितादपिव्यवहितंसाकांक्षंब
लीयइतिन्यायेनसंनिहितंनिराकांक्षंप्राणंदृष्ट्वावाक्योपक्रमस्यआत्मात्वप्रतिपादनायभूमवाक्यापेक्षः इहभूमाप्रात्यइ त्याह

रस्तिनान्यःपंथाविद्यतेयनायेतिश्रुत्यंतरात् तंमाभगवानुशोकस्यपारंतारयत्वितिचोप
क्रम्योपसंहरति तस्मैमृदितकषायायतमसःपारंदर्शयति भगवान्सनत्कुमारइतित
मइतिशोकादिकारणमविद्योच्यते प्राणांतेनानुशासनेनप्राणस्यान्यायत्ततोच्येतात्मनः
प्राणइतिचब्राह्मणंप्रकरणांतेपरमात्मविवक्षाभविष्यतिभूमात्रप्राणएवेतिचेन्नसभ
गवःकस्मिन्प्रतिष्ठितइतिस्वेमहिम्नीत्यादिनाभूम्नएवाप्रकरणसमाप्तेरनुकर्षणात् वैपु
ल्यात्मिकाचभूमरूपतासर्वकारणत्वात्परमात्मनःसुतरामुपपद्यते ॥

एवंचेति किंचशोकस्यपारमित्युपक्र-
म्यतमसःपारमित्युपसंहारात् शोकस्यमूलोछेदंविनातरणायोगाच्चशोकपदेनमूलतमोगृह्यते तन्निवर्तकज्ञानगम्यत्वलिंगात् आ
त्माब्रह्मेत्याह नचान्यत्रेतिब्राह्मणमात्मायत्तत्वंप्राणस्यवदतीतिसंबंधः नन्विदंचरमंब्राह्मणंब्रह्मपरम स्तुततःप्रागुक्तोभूमाप्राणइति
शंकतेप्रकरणांतइतितच्छब्देनभूमानुकर्षात् मैवमित्याह नेति ॥

भूम्नो ब्रह्मत्वे लिंगांतरमाह धर्मेति सूत्रं यदुक्तं भूम्नो लक्षणं सुखत्वममृतत्वं च प्राणे सुयोज्यमिति तदनूद्य विघटयति योप्यसावित्यादि
ना सति बुध्याद्युपाधावात्मनो द्रष्टृत्वादिस्तदभावे सुषुप्तौ तदभाव इत्यसंगत्वज्ञानार्थं सत्योपनिषदि न शृणोति न पश्यतीति परमात्मा

धर्मोपपत्तेश्च अपि च ये भूम्नि श्रूयंते धर्मास्ते परमात्मन्युपपद्यंते यत्र नान्यत्पश्यति नान्यच्छृणोति नान्य
द्विजानाति स भूमेति दर्शनादिव्यवहाराभावं भूमन्यवगमयति परमात्मनि चायं दर्शनादिव्यवहाराभावो
वगतो यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येदिति श्रुत्यंतरात् योप्यसौ सुषुप्त्यवस्थायां दर्शनादिव्यवहारा
भाव उक्तः सोप्यात्मन एवासंगत्वविवक्षया उक्तो न प्राणस्वभावविवक्षया परमात्मप्रकरणात् यदपि
तस्यामवस्थायां सुखमुक्तं तदप्यात्मन एव सुखरूपत्वविवक्षयोक्तं यत आह एषोस्य परम आनंद एतस्यै-
वानंदस्यान्यानि भूतानि मात्रामुपजीवंतीति इहापि यो वै भूमा तत्सुखं नाल्पे सुखमस्ति भूमैव सुख

नं प्रकृत्योक्तं तथा तत्रैवात्मनः सुखत्वमुक्तं न प्राणस्य यतः श्रुत्यंतरमात्मन एव सुखत्वमाह तस्मादित्यर्थः आमयो नाशादिदोषः तत्स
हितं सामयमार्तं नश्वरं स एवाधस्तात्स उपरिष्टादिति सर्वगतत्वं स एवेदं सर्वमिति सर्वात्मत्वं च श्रुतं तस्माद्भूमाध्यायो निर्गुणे समन्वित

इतिसिध्दं॥ अक्षरंबृहदारण्यकंपठतिकस्मिन्निति यद्भूतंभवच्चभविष्यच्चतत्सर्वंकस्मिन्नोतमितिगार्ग्यापृष्टेनमुनिनायाज्ञवल्क्येनाव्या
कृताकाशः कार्यमात्राश्रयःउक्तःआकाशः कस्मिन्नोतइतिद्वितीयप्रश्नेसमुनिरुवाच तदव्याकृतस्याधिकरणमेतदक्षरंअस्थूलादिरूप

मितिसामयस्कृत्वनिराकरणेनब्रह्मैवसुखंभूमानंदर्शयति योवैभूमातदमृतमित्य
मृतत्वमपीहश्रूयमाणंपरमकारणंगमयति विकाराणाममृतत्वस्यापेक्षिकत्वादतो-
न्यदार्तमितिचश्रुत्यंतरात् तथाचसत्यत्वंस्वमहिमप्रतिष्ठितत्वंसर्वगतत्वंसर्वात्मत्व
मितिचैतेधर्माः श्रूयमाणाः परमात्मन्येवोपपद्यंतेनान्यत्र तस्माद्भूमापरमात्मेतिसि
ध्दं॥ अक्षरमंबरांतधृतेः कस्मिन्नुखल्वाकाशओतश्चप्रोतश्चेति सहोवाचैतद्वैतदक्षरं
गार्गिब्राह्मणाअभिवदंत्यस्थूलमनण्वित्यादिश्रूयतेतत्रसंशयः किमक्षरशब्देनवर्ण
उच्यतेकिंवापरमेश्वरइतितत्राक्षरसमाम्नायइत्यादावक्षरशब्दस्यवर्णेप्रसिध्दत्वात्

मित्यर्थः उभयत्राक्षरशब्दप्रयोगात्संशयः तथासत्यशब्दोब्रह्मणिरूढः इतिब्रह्मभूमेत्युक्तंतथाक्षरशब्दोवर्णेरूढइतिदृष्टांतेनपूर्वपक्षः

शा०भा० तत्रोंकारोपास्तिः फलंसिध्धांतेनिर्गुणब्रह्मधीरितिविवेकः नन्वनक्षरतीत्य चलत्वानाशित्वयोगात् ब्रह्मण्यप्यक्षरशब्दोमुख्यइत्यत प्र०तृ०पा०
१२ आह प्रसिध्यतिक्रमस्येतिरूढिर्योगमपहरतीतिन्यायादित्यर्थः वर्णस्योंकारस्यसर्वाश्रयत्वंकथमित्याशंक्य ध्यानार्थमिदं यथाश्रुत्यत

प्रसिद्धिव्यतिक्रमस्यन्याय्युक्तत्वात् ॐकारएवेदंसर्वमित्यादौचश्रुत्यंतरेवर्णस्याप्युपास्यत्वेनसर्वात्मकत्वावधारणा
त् वर्णएवाक्षरशब्द वाच्यइत्येवंप्राप्तेउच्यते परएवात्माक्षरशब्दवाच्यः कस्मात् अंबरांतधृतेः पृथिव्यादेराकाशांतस्य
विकारजातस्यधारणात् तत्रहिपृथिव्यादेः समस्तविकारजातस्य कालत्रयविभक्तस्याकाशएवतदोतंचप्रोतंचेत्या
काशेप्रतिष्ठितत्वमुक्त्वाकस्मिन्नुखल्वाकाशओतश्चप्रोतश्चेत्यनेनप्रश्नेनेदंअक्षरमवतारितं तथाचोपसंहृतमेत
स्मिन्नुखल्वक्षरेगार्ग्याकाशओतश्चप्रोतश्चेति नचेयमंबरांतधृतिर्ब्रह्मणोन्यत्रसंभवति यदप्योंकारएवेदंसर्वमि-
तितदपिब्रह्मप्रतिपत्तिसाधनत्वात्स्तुत्यर्थंद्रष्टव्यंतस्मान्नक्षरत्यश्नुतेचेतिनित्यत्वव्यापित्वाभ्यामक्षरंपरमेवब्रह्म॥

रेसर्वात्मत्वमित्याह ॐकारइति प्रश्नप्रतिवचनाभ्यांआकाशांतजगदाधारत्वेतात्पर्यनिश्चयान्नध्यानार्थतातस्तल्लिंगबलाद्रूढिंबाधि १२
त्वायोगवृत्तिर्ग्राह्येतिसिध्धांतयतिएवमित्यादिना॥ ॥ ॥

आकाशंमूतंकृत्वाशंकते स्यादेतदिति चेतनकर्तृकशिक्षाया अप्रश्रुतेर्मैवमित्याह सा चेतिसूत्रं व्याचष्टे साचेति चकारआकाशस्यमूर्तत्व
निरासार्थः भूताकाशस्यकार्यतः पातिनः श्रुतसर्वकार्याश्रयत्वायोगात् अव्याकृतमज्ञानमेवाकाशः प्रधानशब्दितइतितदाश्रयत्वाच्च

स्यादेतत्कार्यस्य चेत्कारणाधीनत्वंअंबरांतधृतिरभ्युपगम्यते प्रधानकारणवादिनोपीयमुपपद्यते कथमंबरांतधृतेर्ब्रह्म
त्वप्रतिपत्तिःअतउत्तरंपठति। साचप्रशासनात्। साचांबरांतधृतिः परमेश्वरस्यैवकर्म कस्मात्प्रशासनात् प्रशासनंहीह
श्रूयते एतस्यवाक्षरस्यप्रशासनेगार्गिसूर्याचंद्रमसौविधृतौतिष्ठतइत्यादिप्रशासनंच पारमेश्वरंकर्मनाचेतन स्यप्रधान
स्यप्रशासनंसंभवति नह्यचेतनानांघटादिकारणानांमृदादीनां घटादिविषयप्रशासनमस्ति अन्यभावव्यावृत्तेश्च। अन्यभाव
व्यावृतेश्चकारणात् ब्रह्मैवाक्षरशब्दवाच्यं तस्यैवांबरांतधृतिः कर्मनान्यस्यकस्यचित् किमिदमन्यभावव्यावृत्तिरिति अन्य
स्यभावोन्यभावस्तस्माद्व्यावृत्तिरन्यभावव्यावृत्तिरितिऽएतदुक्तंभवति यदन्यद्ब्रह्मणोक्षरशब्दवाच्यमिहशंक्यतेतद्भावा
दिदमंबरांतविधारणमक्षरं व्यावर्तयतिश्रुतिः तद्वाएतदक्षरंगार्ग्यदृष्टंद्रष्टृअश्रुतंश्रोतृअमतंमंतृअविज्ञातंविज्ञात्रित्तितत्राद्द
ष्टत्वादिव्यपदेशः प्रधानस्यापिसंभवति द्रष्टृत्वादिव्यपदेशस्तुनतस्यसंभवत्यचेतनत्वात्॥ क्षरंनप्रधान धानमित्यर्थः विधृतौ
विषयत्वेनधृतौ प्रश्नपूर्वकंसूत्रंव्याकरोतिकिमिदमितिघटत्वात्व्यावृत्तिरितिभ्रांतिंनिरस्यति एतदितिअंबरांतस्याधारमक्षरंश्रुतिरचेतन
त्वाद्व्यावर्तयतीत्यर्थः॥

जीवनिरासपरत्वेनापिसूत्रंयोजयति। तथेति। अन्यभावोभेदः तन्निषेधादितिसूत्रार्थः तर्हिशोधितोजीवएवाक्षरंनपरइत्यतआह नहीतिशो
धितेजीवत्वंनास्तीत्यर्थः तस्माद्गार्गिब्राह्मणंनिर्गुणाक्षरेसमन्वितमितिसिद्धं ईक्षतिकर्मव्यपदेशात्सः प्रश्नोपनिषदमुदाहरति एवमिति
पिप्पलादोगुरुः सत्यकामेनपृष्टोब्रूतेहेसत्यकामपरंनिर्गुणमपरंसगुणंब्रह्मैतदेवयोयमोंकारः साहिप्रतिमेवविष्णोरस्यप्रतीकस्तस्मा

स्यथानान्यदतोस्तिद्रष्टृ नान्यदतोस्तिमंतृनान्यदतोस्तिश्रोतृनान्यदतोस्तिविज्ञातृ
त्यात्मभेदप्रतिषेधात् नाशारीरस्याप्युपाधिमतोक्षरशब्दवाच्यत्वमचक्षुष्कमश्रो-
त्रमवागमनइत्युपाधिमत्ताप्रतिषेधात् नहिनिरुपाधिकः शारीरोनामभवति। तस्मा
त्परमेवब्रह्माक्षरमितिनिश्चयः। ईक्षतिकर्मव्यपदेशात्सः। एतद्वैसत्यकामपरंचापरंच
ब्रह्मयदोंकारस्तस्माद्विद्वानेतेनैवायतनेनैकतरमन्वेतीतिप्रकृत्यश्रूयते। यःपुनरेतंत्रि

त्प्रणवंब्रह्मात्मनाविद्वानेतेनैवोंकारध्यानेनायतनेनप्राप्तिसाधनेनयथाध्यानंपरमपरंवाप्नोतीतिप्राप्नोतीतिप्रकृत्यमध्येएकमात्रद्विमात्रों
कारयोर्ध्यानमुक्त्वाब्रवीतियःपुनरिति इत्थंभावेतृतीयाब्रह्मोंकारयोरभेदोपक्रमात् योत्पकारादिमात्रात्रयेएकस्यामात्रायाअकारस्य

रूप्यादिकंजाग्रदादिविभूतिंचजानातितेनसम्यक्ज्ञाता एकमात्रायस्योंकारस्यसएकमात्रएवंमात्राद्वयस्यसम्यग्विभूतिज्ञानेद्विमात्र
स्तथात्रिमात्रस्तमोंकारंपुरुषंयोभिध्यायीतस्तओंकारविभूतित्वेनध्यातैःसामभिःसूर्यद्वाराब्रह्मलोकंगत्वापरमात्मानंपुरुषंईक्षत
इत्यर्थःसंशय तद्बीजंचाह किमित्यादिनाअस्मिंत्रिमात्रइत्यर्थः॥ पूर्वत्रपूर्वपक्षत्वेनोक्तेॐकारेबुध्दिस्थंध्यातव्यंनिश्चीयतइति

मात्रेणोमित्यनेवाक्षरे परंपुरुषमभिध्यायीतेति।किमस्मिन्वाक्येपरंब्रह्मा
भिध्यातव्यमुपदिश्यते अहोस्विदपरमित्येतेनैवायतनेनपरमपरंचैकतर
मन्वेतीतिप्रकृतत्वात्संशयः॥ तत्रापरमिदंब्रह्मेतिप्राप्तंकस्मात्सतेजसिसू
र्येसंपन्नःसामामभिरुन्नीयतेब्रह्मलोकमितिचतद्विदोदेशापरिच्छिन्नस्यफ
लस्योच्यमानत्वात् नहिपरब्रह्मविद्देशापरिच्छिन्नंफलमश्नुवीतेतियुक्तंसर्व

प्रसंगसगतिः यदापूर्वत्रवर्णैरूढस्याक्षरशब्दस्यलिंगात्ब्रह्मणिवृत्तिरुक्तातद्वदत्रापिब्रह्मलोकप्राप्तिलिंगात्परशब्दस्यहिरण्यगर्भे
वृत्तिरितिदृष्टांतेनपूर्वपक्षयति तत्रापरमितिकार्यपरब्रह्मणोरूपाप्तिरुभयत्रफलंसउपासकःसूर्येसंपन्नःप्रविष्टःनत्तुवस्तुदान

ईश्वरइतिध्यानात् विंदतेवस्त्वित्यल्पमपिफलंब्रह्मोपासकस्यश्रुतमित्यतआह नहीति अन्यत्रतयात्वेपिअत्रपरवित् परमपरविद्
परमन्वेतीत्युपक्रमात् परविदोपरप्राप्तिरयुक्ताउपक्रमविरोधात् नचात्रपरप्राप्तिरेवोक्तेतिवाच्यंपरस्यसर्वगतत्वात् अत्रैवप्राप्तिसं
भवेनसूर्यद्वारागतिवैयर्थ्यात् तस्मादुपक्रमानुगृहीतादपरप्राप्तिरूप लिंगात्परंपुरुषमितिपरश्रुतिर्बाध्येत्यर्थः परस्तुतेर्गौणिप्र-

गतत्वात् परस्यब्रह्मणः नन्वपरब्रह्मपरिग्रहेपरंपुरुषमितिविशेषणंनोप
पद्यते नैषदोषः पिंडापेक्षयाप्राणस्यपरत्वोपपत्तेः इत्येवंप्राप्तेभिधीयतेपर
मेवब्रह्मेहाभिध्यातव्यमुपदिश्यते कस्मात् ईक्षतिकर्मव्यपदेशात् ईक्षतिः
दर्शनंदर्शनव्याप्यमीक्षतिकर्मईक्षतिकर्मत्वेनास्याभिध्यातव्यस्यपुरुषस्य
वाक्यशेषेव्यपदेशोभवति सएतस्माज्जीवघनात्परात्परंपुरिशयंपुरुषमीक्षते

इतिनन्वितिपिंडः स्थूलोविराट् तदपेक्षयासूत्रस्यपरत्वमितिसमाध्यर्थः सूत्रेसशब्दईश्वरपरइतिभ्रांतिज्ञानेनतंव्याचष्टे परमेवेति १४
सउपासकएतस्माद्धिरण्यगर्भात्परंपुरुषंब्रह्माहमितीक्षतइत्यर्थः॥ ॥ ॥

नन्वीक्षणविषयोऽप्यपरोऽस्तु तत्राह तत्राभिध्यायतेरिति नन्वीक्षणं प्रमात्वाद्विषयसत्यतामपेक्षत इति भवतु सत्यः पर ईक्षणीयः ध्यातव्यस्तु सत्योऽपरः किं न स्यादित्यत आह स एवेति श्रुतिभ्यां प्रत्यभिज्ञानात्स एवायमिति सौत्रः सशब्दो व्याख्यात अत्रैवं सूत्रयोजना ॐकारेणो-

नन्वभिध्यायतेरतथाभूतमपि वस्तु कर्म भवति मनोरथकल्पितस्यापि अभिध्यायति कर्मत्वात् ईक्षतेस्तु तथाभूतमेव वस्तु लोके कर्म दृष्टमित्यतः परमात्मैवायं सम्यग्दर्शनविषयभूत ईक्षतिकर्मत्वेन व्यपदिष्ट इति गम्यते स एव चेह परपुरुषशब्दाभ्यामभिध्यातव्यः प्रत्यभिज्ञायते। नन्वभिध्याने परः पुरुष उक्त ईक्षणे तु परात्परः कथमितर इतरः प्रत्यभिज्ञायत इत्यत्रोच्यते। परपुरुषशब्दौ तावदुभयत्र साधारणौ न चात्र जीवघनशब्देन प्रकृतोऽभिध्यातव्यः परः पुरुषः परामृश्यते। येन तस्मात्परात्परोऽयं

ध्येयः स पर एवात्मा नास्य दशेर्ध्येर्ईक्षणीयत्वोक्तेरत्र च श्रुतिप्रत्यभिज्ञानात्स एवायमिति ननु शब्दभेदात् न प्रत्यभिज्ञेति शंकते नन्विति परात्पर इति शब्दभेदं अंगीकृत्य श्रुतिभ्यामुक्तप्रत्यभिज्ञाया अविरोधमाह अत्रेति नन्वेतस्माज्जीवघनात्परादित्येतत्पदेनोपक्रान्त

ध्यातव्यपरामर्शादीक्षणीयः परमात्माध्येयादन्यइत्यतआह नचात्रेति ध्यानस्यतत्फलेक्षणस्यचलोकेसमानविषयत्वाध्येयएवेक्षणीय
एवंचोपक्रमोपसंहारयोरेकवाक्यताभवतीतिभावः ससामभिरुन्नीयतेब्रह्मलोकंसएवतस्माज्जीवघनादित्येतत्पदेनसन्निहिततरोब्र

मीक्षितव्यः पुरुषोन्यास्यात् कस्तर्हिजीवघनइत्यत्रउच्यते घनोमूर्तिर्जीवलक्षणो घनोजीवघनः
सैंधवखिल्यवत् यःपरमात्मनोजीवरूपः खिल्यभावउपाधिकृतः परश्चविषयेंद्रियेभ्यः सो
त्रजीवघनइति ॥ अपरआह ससामभिरुन्नीयते ब्रह्मलोकमित्यतीतानंतरवाक्यनिर्दिष्टोयो
ब्रह्मलोकः परश्चलोकांतरेभ्यः सोत्रजीवघनइत्यत्रउच्यतेजीवानांहिसर्वेषांकरणपरिवृतानांसर्व
करणात्मनिहिरण्यगर्भेब्रह्मलोकनिवासिनिसंघातोपपत्तेः भवतिब्रह्मलोकोजीवघनः तस्मात्प
रोयःपरमात्मेक्षणकर्मभूतः सएवाभिध्यानेपिकर्मभूतइतिगम्यते परंपुरुषमितिनविशेषणं

ह्मलोकस्वामीपरामृश्यतइतिप्रश्नपूर्वकंव्याचष्टे कस्तर्हीत्यादिनामूर्तौघनइतिसूत्रादितिभावः सैंधवखिल्योलवणपिंडः खिल्यवदल्यो १५
भावः परिछेदोयस्यसखिल्यभावः ॥ एतत्पदेनब्रह्मलोकोवापरामृश्यतेत्याह अपरइतिजीवघनशब्दस्यब्रह्मलोकेलक्षणांदर्शयति

जीवानांहीति व्यष्टिकरणाभिमानिनांजीवानांघनः संघातोयस्मिन् सर्वकरणाभिमानिनिजीवघनस्तत्स्वामिकत्वात् परंपरासंबंधेनलो-
कोलक्ष्यइत्यर्थः तस्मात्परः सर्वलोकातीतः शुद्धइत्यर्थः परपुरुषशब्दस्यपरमात्मनिमुख्यत्वाच्च सएवध्येयइत्याह परमिति यस्मा
त्परंनापरमस्तिकिंचित्सएवमुख्यः परः नतुपिंडात्परः सूत्रात्मेत्यर्थः किंचपरशब्देनोपक्रमेनिश्चितंपरंब्रह्मैवात्रवाक्यशेषेध्यातव्य

परमात्मपरिग्रहएवावकल्पते परोहिपुरुषोत्रपरमात्मैवभवति यस्मात्परंकिंचिदन्यन्नास्तिपुरुषान्नपरंकिं-
चित्साकाष्ठासापरागतिरितिचश्रुत्यंतरात् परंचापरंचब्रह्मयदोंकारइतिचविभज्यानंतरमोंकारेणपरंपुरुषम
भिध्यातव्यंब्रुवन्परमेवब्रह्मपरंपुरुषंगमयति यथापादोदरस्त्वचाविनिर्मुच्यते एवंहवैसपाप्मनाविनिर्मुच्यत
इतिपाप्मविनिर्मोकफलवचनंपरमात्मानमिहाभिध्यातव्यंसूचयति अथयदुक्तंपरमात्माभिध्यायिनोनदेशप
रिच्छिन्नंफलंयुज्यतइतिअत्रोच्यते त्रिमात्रेणोंकारेणालंबनेनपरमात्मानमभिध्यायतःफलंब्रह्मलोकप्राप्तिःक्र
मेणचसम्यग्दर्शनोत्पत्तिरिति क्रममुक्त्यभिप्रायमेतद्भविष्यतीत्यदोषः॥ मित्याह परंचापरंचेति पापनिवृत्तिलिंगाच्चे
त्याह यथेतिपादोदरःसर्पः ॐकारे परब्रह्मोपासनयासूर्यद्वाराब्रह्मलोकंगत्वापरंब्रह्मेक्षित्वात देवशांतमभयंप्राप्नोतीत्यविरोधमा
ह अत्रोच्यतइति एवमेकवाक्यतासमर्थप्रकरणानुगृहीतपरपुरुषश्रुतिभ्यां परब्रह्ममत्यभिज्ञयाब्रह्मलोकप्राप्तिलिंगंबाधित्वा

वाक्यंप्रणवध्येयेब्रह्मणिसमन्वितमितिसिध्दं ॥ दहरउत्तरेभ्यः छांदोग्यमुदाहरति अथेतिभूमविद्यानंतरंदहरविद्यारंभार्थो ऽथशब्दः ब्रह्म।णोभिव्यक्तिस्थानत्वाद्ब्रह्मपुरंशरीरंअस्मिन्‌यत्प्रसिध्दंदहरमल्पंहृत्पद्मंतस्मिन्हृदयेयदंतराकाशशब्दितंब्रह्मतदन्वेष्टव्यंविचार्यज्ञेयमित्यर्थः अत्राकाशोजिज्ञास्यैतदंतस्यंवेति प्रथमंसंशयः कुत्स्यः तत्रयथाकाशस्तदासंशयद्वयंतत्राकाशशब्दाद

दहरउत्तरेभ्यः।अथयदिदमस्मिन्ब्रह्मपुरेदहरंपुंडरीकंवेश्मदहरोस्मिन्नंतराकाशस्तस्मिन्यदंतस्तदन्वेष्टव्यंतद्वाव
विजिज्ञासितव्यंइत्यादिवाक्यंसमाम्नायते तत्रयोयंदहरेहृदयपुंडरीकेदहरआकाशःश्रुतःसकिंभूताकाशोथवा
विज्ञानात्माथवापरमात्मेतिसंशय्यते कुतःसंशयः आकाशब्रह्मपुरशब्दाभ्यामाकाशशब्दोत्ययंभूताकाशेपर-
स्मिंश्चप्रयुज्यमानोदृश्यते तत्रकिंभूताकाशएवदहरःस्यात् किंवापरइतिसंशयःतथाब्रह्मपुरमितिकिंजीवोत्र
ब्रह्मनामातस्येदंपुरंशरीरं ब्रह्मपुरमथवापरस्यैवब्रह्मणःपुरंब्रह्मपुरमिति तत्रजीवस्यपरस्यवान्यतरस्यपुरःस्वा
मिनोदहराकाशत्वेसंशयः॥

कंसंशयमुक्त्वाब्रह्मपुरशब्दात् संशयांतरमाह तथाब्रह्मपुरमितीति अत्रशब्देजीवस्यब्र-
ह्मणोवापुरमितिसंशयः तत्रतस्मिन्संशयेसतीतियोजना ॥ परपुरुषशब्दस्यब्रह्मणिमुख्यत्वाद्ब्रह्मध्येयमित्युक्तंतथेहाप्या १६
काशपदस्यभूताकाशेरूढत्वाद्भूताकाशोध्येयइतिदृष्टांतेनपूर्वपक्षयति तत्राकाशेत्यादिनादहरवाक्यस्यानंतरंप्रजापतिवाक्य
स्य

चसगुणेनिर्गुणेचसमन्वयोक्तेः श्रुत्यादिसंगतयः पूर्वपक्षेभूताकाशाद्युपास्तिः सिध्दांतेसगुणब्रह्मोपास्त्यानिर्गुणधीरितिफलभेदः नचाकाशस्तल्लिंगादित्यनेनास्यपुनरुक्तताशंकनीया अत्रतस्मिन्यदंतरस्तदन्वेष्टव्यमित्याकाशांतस्थस्यान्वेष्टव्यत्वादिलिंगान्वयेन दहराकाशस्यब्रह्मत्वेस्पष्टलिंगाभावात् ननु भूताकाशस्याल्पत्वंकथमेकस्योपमानत्वंउपमेयत्वंचकथंउभेअस्मिन्द्यावापृथिवी अंतरेवसमाहितेउभावग्निश्चवायुश्चेत्यादिनाश्रुतसर्वाश्रयत्वंचकथमित्याशंक्यक्रमेणपरिहरति तस्येत्यादिना त्हृदयापेक्षयाल्प

तत्राकाशशब्दस्यभूताकाशेरूढत्वात् भूताकाशएवदहरशब्दइतिभासंतस्यचदहरायतनापेक्षयादहरत्वंयावान्वा अयमाकाशस्तावानेषोंतर्हृदयआकाशइतिचबाह्याभ्यंतरभावकृतभेदेनास्योपमानोपमेयभावोद्यावापृथिव्या- दिचतस्मिन्नंतःसमाहितमवकाशात्मनाकाशस्यैकत्वात् अथवाजीवोदहरइतिभासंब्रह्मपुरशब्दाज्जीवस्यहीदंपु रंसच्छरीरंब्रह्मपुरमित्युच्यतेतस्यस्वकर्मणोपार्जितत्वात् भक्त्याचतस्यब्रह्मशब्दवाच्यं॥ त्वंध्यानार्थकल्पितभेदात्साद

श्यंस्वतएकत्वात्सर्वाश्रयत्वमित्यर्थः नन्वेषआत्मेत्यात्मशब्दोभूतेनयुक्तइत्यरुचेराह अथवेति भक्त्येतिचैतन्यगुणयोगेनेत्यर्थः ॥ ॥मुख्यंब्रह्मगृह्यतामित्यतआह नहीति अस्तुपुरस्वामीजीवोत्हृदयस्याकाशस्तुब्रह्मेत्यतआह तत्रेति पुरस्वामिनएवतदंत स्थत्वसंभवात् नान्यापेक्षेत्यर्थः व्यापिनोंतस्थत्वंकथमित्यतआह मनइति आकाशपदेनदहरमनूद्यकथ्योक्तोपमादिकंब्रह्माभेद विवक्षयाभविष्यतीत्याह॥

आकाशेति ननुजीवस्याकाश पदार्थत्वमयुक्तमित्याशंक्यतर्हि भूताकाश एव दहरोस्तुतस्मिन्नंतरस्थंकिंचिध्येयमिति पक्षांतरमा
ह नचात्रेतिपरमंतस्थंवस्तुतद्विशेषणत्वेनाधारत्वेन दहराकाशस्यतच्छब्देनोपादानादित्यर्थः यद्वा अन्वेष्यत्वादिलिंगाद्दहरस्य

नहीपरस्यब्रह्मणः शरीरेणस्वस्वामिभावः संबंधोस्तितत्रपुरस्वामिनः पुरैकदेशेवस्थानंदृष्टं
यथाराज्ञः मनउपाधिकश्चजीवोमनश्चप्रायेणहृदयेप्रतिष्ठितमित्यतोजीवस्यैवेदंहृदयांत
रवस्थानंस्यात् दहरत्वमपितस्यैवाराग्रोमापितत्वादवकल्पते आकाशोपमितत्वादिचब्रह्मा
भेदविवक्षयाभविष्यति नचात्रदहरस्याकाशस्यान्वेष्टव्यत्वंविजिज्ञासितव्यत्वंचश्रूयतेत
स्मिन्यदंतरितिपरविशेषणत्वेनोपादानादित्यतउत्तरंब्रूमः परमेश्वरएवदहराकाशोभवितु

ब्रह्मत्वनिश्चयात् आकाशस्तल्लिंगादित्यनेनगतार्थत्वमितिशंका अत्रनिरसनीयाअन्वेष्यत्वादेः परविशेषणत्वेनग्रहणात् दहर १७
स्यब्रह्मत्वेलिंगंनास्तीत्यर्थः अपहतपाप्मत्वादिलिंगोपेतात्मश्रुत्याकेवलाकाशश्रुतिर्बाध्येतिसिध्दांतयति परमेश्वरइत्यादिना

आकाशस्याक्षेपपूर्वकमितिसंबंधः तमाचार्यंप्रतियदिब्रूयुः त्द्दयमेवतावदल्पंतत्रत्याकाशोल्पतरः किंतदत्राल्पेविद्यते यद्वि-
चार्यज्ञेयमिति तदा आचार्योब्रूयादाकाशस्याल्पतानिवृत्तिमित्यर्थः॥ वाक्यस्यतात्पर्यमाह तत्रेति निवर्तयतिआचार्यइतिशे

महीतनभूताकाशोजीवोवाकस्मादुत्तरेभ्योवाक्यशेषगतेभ्योहेतुभ्यः तथाहिद्रष्टव्यतयावि
हितस्यदहरस्याकाशस्यतंचेद्ब्रूयुरित्युपक्रम्यकिंतदत्रविद्यते यदन्वेष्टव्यंयद्वाविजिज्ञासि
तव्यंइत्येवमाक्षेपपूर्वकंप्रतिसमाधानवचनंभवतिसब्रूयाद्यावान्वा अयमाकाशस्तावानेषों
तर्हृदयआकाशउभेअस्मिन् द्यावापृथिवीअंतरेवसमाहितेइत्यादि॥ तत्रपुंडरीकदहरत्वे
नप्राप्तदहरत्वस्याकाशस्यप्रसिध्दाकाशोपम्येनदहरत्वंनिवर्तयन् भूताकाशत्वंदहरस्याकाशस्य

षः नन्वाकाशशब्देनरूढ्याभूताकाशस्यभानात् कथंतन्निवृत्तिरित्याशंक्याह यद्यपीति ननुरामरावणयोर्युध्दंरामरावणयोरि
वेत्यभेदेप्युपमादृष्टेतिचेत् न अभेदे सादृश्यस्यानन्वयेन युध्दस्यनिरुपमत्वेतात्पर्यात् अनन्वयालंकारइतिकाव्यविदः पूर्वोक्ति

मनूद्यनिरस्यति नन्वित्यादिनासीताश्लिष्टइवाभाति कोदंडप्रभयायुतइत्यादौप्रभायोगसीताश्लेषरूपविशेषणभेदाद्भेदाश्रय-
णमेकस्यैवश्रीरामस्योपमानोपमेयभावसिध्यर्थमगत्या कृतमित्यत्रुदाहरणंद्रष्टव्यंनैवमत्राश्रयणंयुक्तं वाक्यस्याल्पत्वनिवृत्ति

निवर्तयतीतिगम्यते यद्यप्याकाशशब्दोभूताकाशेरूढस्तथापितेनैवतस्योपमानोपपद्यतइति भूताकाशशंकापि
निवर्तिताभवति नन्वेकस्याप्याकाशस्यबाह्याभ्यंतरत्वकल्पितेनभेदेनोपमानोपमेयभावः संभवतीत्युक्तंनैवसं-
भत्यगतिकाहीयंगतिर्यत्काल्पनिकभेदाश्रयणमपिचकल्पयित्वाभेदमुपमानोपमेयभावंवर्णयतः परिछिन्नत्वा
दभ्यंतराकाशस्यनबाह्याकाशपरिमाणवत्त्वमुपपद्यते ननुपरमेश्वरस्यापिज्यायानाकाशादितिश्रुत्यंतरान्नैवाका
शपरिमाणत्वमुपपद्यते नैषदोषः पुंडरीकवेष्टनभासदहरत्वनिवृत्तिपरत्वाद्वाक्यस्यनतावत्त्वप्रतिपादनपरत्वं
उभयप्रतिपादनेहिवाक्यंभिद्येत ॥

परत्वेनगतिसन्द्भावात् किंच हार्दाकाशस्यांतरत्वात्यागेअल्पत्वेनव्यापकबाह्याकाशसा
दृश्यंनयुक्तमित्याह अपिचेति आंतरत्वत्यागेतु अत्यंताभेदान्नसादृश्यमितिभावः ननुहार्दाकाशस्याल्पत्वनिवृत्तौतावत्त्वेचतात्प- १८
र्येकिंनस्यादित्यतआह। उभयेति अतोल्पत्वनिवृत्तावेवतात्पर्यमितिभावः॥ ॥ ॥

नन्वेतत्पदपरामृष्टदहरस्यस्वापेजीवगम्यत्वेपिब्रह्मत्वेकिमायातमित्याशंक्यतथाहि दृष्टमितिव्याचष्टे तथाहीतिलोकेपिदृष्टमित्य-
र्थांतरमाहलोकेतिगतिलिंगंव्याख्यायशब्दंव्याचष्टे तथेतिजीवभूताकाशयोर्ब्रह्मलोकशब्दस्याप्रसिध्देरितिभावः ब्रह्मण्यपित
स्याप्रसिध्दिंशंकते नन्विति निषादस्थपतिन्यायेनसमाधत्तेगमयेदितिषष्ठेचिंतितंस्थपतिर्निषादः शब्दसामर्थ्यात् रौद्रीमिष्टिंनि
धाय एतयानिषादस्थपतिंयाजयेदित्याम्नायते तत्रनिषादानांस्थपतिः स्वामीति षष्ठीसमासेनत्रैवर्णिकोयात्यः अग्निविद्यादिसाम

तथात्यहरहर्जीवानांसुषुप्तावस्थायांब्रह्मविषयंगमनंदृष्टंश्रुत्यंतरेसतासोम्यतदासंपन्नोभवतीत्येवमादौलोकेपि
किलगाढंसुषुप्तमाचक्षते ब्रह्मीभूतोब्रह्मतांगतइति तथाब्रह्मलोकशब्दोपिप्रकृतेदहरेप्रयुज्यमानोजीवभूताकाशश
कांनिवर्तयन् ब्रह्मतामस्यगमयति ननु कमलासनलोकमपिब्रह्मलोकशब्दोगमयेद्यदिब्रह्मणोलोकइतिषष्ठीसमासवृ
त्याव्युत्पाद्येतसामानाधिकरण्यवृत्यातुव्युत्पाद्यमानोब्रह्मैवलोकोब्रह्मलोकइतिपरमेवब्रह्मगमयिष्यतिएतदेवाहर
हर्ब्रह्मलोकगमनंदृष्टंब्रह्मलोकशब्दस्यसामानाधिकरण्यवृत्तिपरिग्रहेलिंगम् नत्यहरहरिमाः प्रजाः कार्यब्रह्मलोक

र्थ्यात् नतुनिषादश्चासौस्थपतिरितिकर्मधारयेननिषादोयात्योसामर्थ्यादितिप्राप्तेसिध्दांतः निषादएवस्थपतिः स्यात् निषादशब्दस
निषादेशक्तत्वात् तस्याश्रुतषष्ठ्यर्थसंबंधलक्षकत्वकल्पनायोगात् श्रुतद्वितीयाविभक्तेः पूर्वपदसंबंधकल्पनायांलाघवात् अतः ॥

निषादस्येष्टिसामर्थ्यमात्रं कल्प्यमिति तद्वद्ब्रह्मलोकशब्दे कर्मधारय इत्यर्थः कर्मधारये लिंगं चास्तीति व्याचष्टे एतदेवेति सूत्रे चकार उक्त न्यायसमुच्चयार्थः॥ सर्वजगद्धारणलिंगाच्च दहरः पर इत्याह धृतेरिति नन्वथशब्दाद्दहरप्रकरणं विच्छिन्नं श्रुता धृतिर्न दहरलिंगमिति शंकते कथमिति य आत्मेति प्रकृताकर्षात् अथशब्दो दहरस्य धृतिगुणविधिप्रारंभार्थ इत्याह दहरोस्मिन्नित्यादिना श्रुतौ विधृतिश-

सत्यलोकाख्यं गच्छंतीति शक्यं कल्पयितुं॥ धृतेश्च महिम्नोस्यास्मिन्नुपलब्धेः धृतेश्च हेतोः परमेश्वर एवायं दहरः कथं दहरोस्मिन्नंतराकाश इति हि प्रकृत्याकाशौपम्यपूर्वकं तस्मिन्सर्वसमाधानमुक्त्वा तस्मिन्नेवचात्मशब्दं प्रयुज्यापहतपाप्मत्वादिगुणयोगं चोपदिश्य तमेवानतिवृत्तप्रकरणं निर्दिशत्यथ य आत्मा स सेतुर्विधृतिरेषां लोकानामसंभेदायेति तत्र विधृतिरित्यात्मशब्दसामानाधिकरण्याद्विधारयितोच्यते क्तिचः कर्तरि स्मरणात् यथोदकसंतानस्य विधारयिता लोके सेतुः क्षेत्रसंपदामसंभेदायैवमयमात्मा एषामध्यात्मादिभेदभिन्नानां लोकानां वर्णाश्रमादीनां च विधारयिता सेतुरसंभेदायासंकरायेति एवमिह प्रकृते

ब्द कर्तृत्वाचित्वात् क्तिनंतः सूत्रे तु महिशब्दसामानाधिकरण्यात् धृतिशब्दः क्तिनंतो विधारणं ब्रूते स्त्रियां क्तिन्निति भावे क्तिन्नो वि २१
धानादिति विभागः सेतुरसंकरहेतुः विधृतिस्तु स्थितिहेतुरित्यपौनरुक्त्यमाह यथोदकेति सूत्रं योजयति एवमिहेति धृतेश्च दहरः

अस्तकोदोषस्तत्राह तत्रेति सर्वनामभ्यांदहराकाशमाकृष्यात्मत्वादिगुणानुक्तागुणैः सहतस्यैवध्येयत्वंवाक्यशेषोब्रूतेनतद्विरोधइत्यर्थः तस्मि
न्यदंतरितितत्पदेनव्यवहितमपिहृदयंयोग्यतया ग्राह्यमित्याह तस्मादिति यद्वा आकाशस्तस्मिन्यदंतरस्तदुभयमन्वेष्टव्यमितियोजनास्त्र

तत्रवाक्यशेषोनोपपद्येतास्मिन्कामाः समाहिताः एषआत्मापहतपाप्मेतिहिप्रकृत्यद्यावापृथिव्यादिसमाधानाधार
माकाशमाकृष्याथयइहात्मानमनुविद्यव्रजंत्येतांश्चसत्यान्कामानिति समुच्चयार्थेनचशब्देनात्मानंचकामाधारमा
श्रितांश्चकामान्विज्ञेयान्वाक्यशेषोदर्शयति तस्माद्वाक्योपक्रमेपिदहरएवाकाशोहृदयपुंडरीकाधिष्ठानः सहांत
स्थैः समाहितैः पृथिव्यादिभिः सत्यैश्चकामैर्विज्ञेयउक्तइतिगम्यते सचोक्तेभ्योहेतुभ्यः परमेश्वरइति गतिशब्दाभ्यां
तथाहिदृष्टंलिंगंच दहरः परमेश्वरउत्तरेभ्योहेतुभ्यइत्यक्तमतएवोत्तरेहेतवइदानींप्रपंच्यंते इतश्चपरमेश्वरएवद
हरोयस्माद्दहरवाक्यशेषेपरमेश्वरस्यैवप्रतिपादकौगतिशब्दौभवतः इमाः सर्वाः प्रजाः अहरहर्ब्रह्मगच्छंत्य एतंब्रह्म
लोकंनविंदंतीति तत्रप्रकृतं दहरंब्रह्मलोकशब्देनाभिधायतद्विषयागतिः प्रजाशब्दवाच्यानांजीवानांअभिधीयमा
नादहरस्यब्रह्मतांगमयति॥

चयति सहांतस्थैरिति दहराकाशस्यब्रह्मत्वेहेत्वंतरमाहगतीतिप्रजाजीवाएतंहृदयस्थंदहरंब्र-
ह्मस्वरूपंलोकमहरहः प्रत्यहंस्वापेगच्छंत्यस्तदात्मनास्थिता अप्यनृताज्ञानेनावृतास्तंनजानंतिअतः पुनरुक्तिर्घ्नंतीत्यर्थः॥

दहरेउक्तलिंगान्यन्यथासिध्दानितेषांतदंतस्थगुणत्वादित्यक्तंस्मारयित्वादूषयति यदपीत्यादिनाउत्तरत्राकाशस्वरूपप्रतिपा दना न्यथानुपपत्यापूर्वंतस्यान्वेष्यत्वादिकमित्यत्रान्यथोपपत्तिंशंकते नन्विति एतदाकाशस्वरूपंआक्षेपबीजमाकाशस्याल्पत्वंउपक्रमया

व्यत्वंविजिज्ञासितव्यत्वंचश्रूतंपरविशेषणत्वेनोपादानादित्यत्रब्रूमः यद्याकाशो नान्वेष्टव्यत्वेनोक्तःस्यात् यावान्वाअयमाकाशस्तावानेषोंतर्हृदयआकाशइत्या द्याकाशस्वरूपप्रदर्शनंनोपयुज्येत नन्वेतदप्यंतर्वर्तिवस्तुसद्भावदर्शनायैवप्रदर्श्य ते तंचेद्ब्रूयुः यदिदमस्मिन्ब्रह्मपुरेदहरंपुंडरीकंवेश्मदहरोस्मिन्नंतरआकाशःकिंत त्रविद्यते यदन्वेष्टव्यंयद्वावविजिज्ञासितव्यमित्याक्षिप्यपरिहारावसरेआकाशौ पम्योपक्रमेणद्यावापृथिव्यादीनामंतःसमाहितत्वदर्शनात् नैतदेवंएवंहिसतिय दंतःसमाहितंद्यावापृथिव्यादितदन्वेष्टव्यंविजिज्ञासितव्यंचोक्तंस्यात्॥ ॥

निरस्यांतस्थवस्तूक्तेस्तदंतस्थमेवध्येयमित्यर्थः तर्हिजगदेवध्येयंस्यादित्याह नैतदेवमिति॥ ॥ ॥

एवमाकाशोपमितत्वाद्दहरगकाशोनभूतमित्युक्तं सर्वाश्रयत्वादिलिंगेभ्यश्चनचेत्याह नचेत्यादिना विगताजिघत्साजग्धुमिच्छायस्यसोयं
विजिघत्सः बुभुक्षाशून्यइत्यर्थः प्रथमश्रुतब्रह्मशब्देनतत्सापेक्षचरमश्रुतषष्ठीविभक्त्यर्थः संबंधोनेयः ननुब्रह्मणः पुरमितिषष्ठ्या
स्वस्वामिभावोग्राह्यः निरपेक्षेणतत्सापेक्षंबाध्यमितिन्यायादित्याह अत्रब्रूमइतिशरीरस्यब्रह्मणातदुपलब्धिस्थानत्वरूपसंबंधे

नचकल्पितभेदेपुंडरीकवेष्टितेआकाशैकदेशेद्यावापृथिव्यादीनामंतःसमाधानमुपपद्यते एषआत्माऽपहत
पाप्माविजरोविमृत्युर्विशोकोविजिघत्सोपिपासः सत्यकामः सत्यसंकल्पइतिचात्मत्वापहतपाप्मत्वादयश्चगुणान
भूताकाशेसंभवंति यद्यप्यात्मशब्दोजीवेसंभवति तथापीतरेभ्यः कारणेभ्योजीवाशंकापिनिवर्तिताभवति नह्यु-
पाधिपरिच्छिन्नस्याराग्रोपमितस्यजीवस्यपुंडरीकवेष्टनकृतंदहरत्वंशक्यंनिवर्तयितुं ब्रह्माभेदविवक्षयाजीवस्यस
र्वगतत्वादिविवक्ष्यतइतिचेन्न यदात्मतयाजीवस्यसर्वगतत्वादिविवक्ष्यते तस्यैवब्रह्मणः साक्षात्सर्वगतत्वादिविव
क्ष्यतामितियुक्तं यदप्युक्तंब्रह्मपुरमितिजीवेनपुरस्योपलक्षितत्वाद्राज्ञइवजीवस्यैवेदंपुरंस्वामिनः पुरैकदेशवर्ति

मानमाह सइति पूर्षुशरीरेषुपुरिहृदयेशयतइतिपुरुषइत्यन्वयः ननुब्रह्मशब्दस्यजीवेप्यन्नादिनाशरीरवृद्धिहेतोर्मुख्यत्वान्नषष्ठ्य
र्थः कथंचिन्नेयइत्यतआह। अथचेति बृहयतिदेहमितिब्रह्मजीवः तत्स्वामिकेपुरेहृदयंब्रह्मवेश्मभवतुराजपुरेमैत्रसद्मवदित्यर्थः

अनंतफललिंगादपिदहरः परमात्मेत्याह तद्यथेति अथकर्मफलाद्वैराग्यानंतरमिहजीवदशायांआत्मानंदहरंतदाश्रितांश्चसत्यका

त्वमस्तितत्रब्रूमः परस्यैवेदंब्रह्मणः पुरंसच्छरीरंब्रह्मपुरमित्यच्यते ब्रह्मशब्दस्य
तस्मिन्मुख्यत्वात् तस्याप्यस्मिन्पुरेणानेनसंबंधउपलब्ध्यधिष्ठानत्वात्॥ सएतस्मा
ज्जीवघनात्परात्परंपुरिशयंपुरुषमीक्षतेसवाअयंपुरुषःसर्वासुपूर्षुपुरिशयइ
त्यादिश्रुतिभ्यः अथवाजीवपुरेएवास्मिन् ब्रह्मसन्निहितमुपलक्ष्यतेयथाशालग्रा-
मेविष्णुःसंनिहितइतितद्वत्॥ तद्यथेहकर्मचितोलोकःक्षीयते एवमेवामुत्रपुण्य
चितोलोकःक्षीयतइतिकर्मणामंतवत्फलत्वमुक्त्वाथयइहात्मानमनु विद्यव्रजंत्येतां
श्चसत्यान्कामान्तेषांसर्वेषुलोकेषुकामचारोभवतीति प्रकृतदहराकाशविज्ञानस्या
नंतफलवत्त्वंब्रुवन्परमात्मत्वमस्यसूचयति यदप्येतदुक्तंनदहरस्याकाशस्यान्वेष्ट

मादिगुणान् आचार्योपदेशेनानुविद्यध्यानेनानुभूययेपरलोकंगच्छंति तेषांसर्वलोकेष्वनंतमैश्वर्यंस्वेच्छयासंचलनादिकंभवतीत्यर्थः

अस्य धृतिरूपस्यनियमनस्यचमहिम्नोऽस्मिन्परमात्मन्येवश्रुत्यंतरउपलब्धेरितिसूत्रार्थः धृतेश्चेतिचकारःसेतुपदोक्तनियामकलिंगप्राप्त्यं तत्रनियमनेश्रुत्यंतरोपलब्धिमाह एतस्येति॥ धृतोंतामाह तथेति आसमंतात्प्रकाशतेदीप्यते इतिस्वयंज्योतिषिब्रह्मण्याकाशशब्दः

दहरेविधारण लक्षणंमहिमानंदर्शयत्ययंचमहिमापरमेश्वरएवश्रुत्यंतरादुपलभ्यते एतस्यवाक्षरस्यप्रशासनेगार्गि सूर्याचंद्रमसौविधृतौतिष्ठतइत्यादेः॥ तथान्यत्रापिनिश्चितेपरमेश्वरवाक्येश्रूयते एषसर्वेश्वरएषभूताधिपतिरेषभू तपालएषसेतुर्विधारणएषांलोकानामसंभेदायेत्येवंविधृतेश्चहेतोः परमेश्वरएवायंदहरः प्रसिद्धेश्च इतश्चपरमेश्व रएवदहरोऽस्मिन्नंतराकाशइत्युच्यते यत्कारणमाकाशशब्दः परमेश्वरेप्रसिद्धः आकाशोहवैनामनामरूपयोर्निर्वहि ता सर्वाणिहवाइमानिभूतान्याकाशादेवसमुत्पद्यंते इत्यादिप्रयोगदर्शनात् जीवेतुनक्वचिदाकाशशब्दः प्रयुज्यमानो दृश्यते भूताकाशस्तुसत्यामप्याकाशशब्दप्रसिद्धौउपमानोपमेयभावाद्यसंभवान्नगृहीतव्यइत्युक्तं इतरपरामर्शा
त्स

स्यविभुत्वगुणतोवाप्रसिद्धिः प्रयोगप्राचुर्यंयदिएषआत्मापहतपाप्मेत्यादिवाक्यशेषबलेनदहरः तर्हिजीवोपीत्याशंक्यनिषेधति इतरे तिजीवस्यवाक्यशेषमाह अथेति दहरोक्त्यनंतरंमुक्तोपसृप्यंशुद्धंब्रह्मोच्यते यएषसंप्रसादोजीवोऽस्मात्कार्यकरणसंघातात् सम्यगु

त्थाय आत्मानं तस्माद्विविच्य विविक्तं आत्मानं स्वेन ब्रह्मरूपेणाभिनिष्पद्य साक्षात्कृत्य तदेव प्रत्यक्परं ज्योतिरुपसंपद्यते प्राप्नोतीति व्याख्येयं यथा मुखं व्यादाय स्वपितीति वाक्यं सुस्वा मुखं व्यादत्ते इति व्याख्यायते तद्वत् ज्योतिषो नात्मत्वं निरस्यति एष इति संप्र

इति चेन्नासंभवात् यदि वाक्यशेषबलेन दहर इति परमेश्वरः परिगृह्येतास्तीतरस्यापि जीवस्य वाक्यशेषे परामर्शः अथ य एष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते एष आत्मेति होवाचेति अत्र हि संप्रसादशब्दः श्रुत्यंतरे सुषुप्तावस्थायां दृष्टत्वात् दवस्थावंतं जीवं शक्नोत्युपस्थापयितुं नार्थांतरं तथा शरीरव्यपाश्रयस्यैव जीवस्य शरीरात्समुत्थानं संभवति॥ यथाकाशव्यपाश्रयाणां वाय्वादीनामाकाशात्समुत्थानं तद्वत् यथा चादृष्टोपि लोके परमेश्वरविषय आकाशशब्दः परमेश्वरधर्मसमभिव्याहारादाकाशो ह वै नाम नामरूपयोर्निर्वहितेत्येवमादौ परमेश्वरविषयोऽभ्युपगतः एवं जीवविषयोपि भविष्यति तस्मादि-

प्रसादेरत्वाचरित्वेति श्रुत्यंतरं अवस्थावदुत्थानमपि जीवस्य लिंगमित्याह तथेति तदाश्रितस्य तस्मात्समुत्थाने दृष्टांतः यथेति ननु काप्याकाशशब्दो जीवे न दृष्ट इत्याशंक्योक्तावस्थोत्थानलिंगबलात्कल्प्य इत्याह यथा चेति नियामकाभावाज्जीवो दहरः किं न स्यादि ति

प्राप्तेनियामकमाह नैतदित्यादिनादहरेश्रुतधर्माणामसंभवात् नजीवोदहर इत्यर्थः तर्हिपुनरुक्तिस्तत्राह अतिरेकेति उत्तराच्चेत्य-
धिकाशंकानिरासार्थमित्यर्थः कातर्हिजीवपरामर्शस्यगतिस्तत्राह पठिष्यंतीति जीवस्यस्वापस्थानभूतब्रह्मज्ञानार्थोयंपरामर्श
इतिवक्ष्यते असंभवादितिहेतोरसिद्धिमाशंक्यपरिहरति उत्तराच्चेत्यादिसूत्रंनिराकृतायाः जीवाशंकायाः प्रजापतिवाक्यबलात्पु

नरपरामर्शात् दहरोस्मिन्नंतराकाशइत्यत्रसएवजीवउच्यते इतिचेन्नैतदेवंस्यात् कस्मादसंभवात् नहिजीवोबु
ध्याद्युपाधिपरिच्छेदाभिमानीसन्नाकाशेनोपमीयते नचोपाधिधर्मानभिमन्यमानस्यापहतपाप्मत्वादयोध-
र्माः संभवंतिप्रपंचितंचैतत्प्रथमसूत्रे अतिरेकाशंकापरिहरायात्र पुनरुपन्यस्तंपठिष्यति चोपरिष्टात् अन्यार्थ
श्चपरामर्शइति उत्तराच्चेदाविर्भूतस्वरूपस्तु इतरपरामर्शाद्याजीवाशंकाजातासाअसंभवात् निराकृताअथे-
दानींमृतस्येवामृतसेकात्पुनः समुत्थानंजीवाशंकायाः क्रियतेउत्तरस्मात्प्राजापत्याद्वाक्यात् यआत्मापह
तपाप्मेत्यपहतपाप्मत्वादिगुणकआत्मानमन्वेष्टव्यंविजिज्ञासितव्यंचप्रतिज्ञाय यएषोक्षिणिपुरुषोदृश्यते एष
आत्मेतिब्रुवंन्नक्षिस्थम्॥ नः समुत्थानंक्रियतेतत्रजीवस्यैवापहतपाप्मत्वादिग्रहणेनासंभवासिद्धेरित्यर्थः कथंतत्रजीवोक्तिरित्या
ह तत्रेत्यादिना यद्यप्युपक्रमेजीवशब्दोनास्तितथाप्यपहतपाप्मत्वादिगुणकमात्मानमुपक्रम्यतस्यजाग्रदाद्यवस्थात्रयोपन्यासादवस्थालिंगेनजीवनि
श्चयात्तस्यैवनेगुणाः संभवंतीतिसमुदायार्थः इंद्रप्रजापतिर्ब्रूतेयएषइति॥

प्राधान्याद्दक्षिग्रहणं सर्वैरिंद्रियैर्विषयदर्शनरूपजाग्रदवस्थापनमित्याह द्रष्टारमिति महीयमानः वासनामयैर्विषयैः पूज्यमान इति स्वप्न पर्याये यद्यत्रेति सुषुप्तिपर्यायेन जीवमेव प्रजापतिर्व्याचष्टे इत्यन्वयः यत्र काले तदेतत्स्वपनं यथा स्यात् तथा सुप्तः सम्यक् अस्तो निरस्तः करणग्रामो यस्य स समस्तः अत एवोपरतकरणत्वात्तत्कृतकालुष्यहीनः संप्रसन्नः स्वप्नप्रपंचमज्ञानमात्रत्वेन विलापयति अतो ज्ञान

द्रष्टारं जीवमात्मानं निर्दिशति एतं त्वेव ते भूयोनुव्याख्यास्यामीति च तमेव पुनः पुनः परामृश्य य एव स्वप्ने महीयमानश्चरत्येष आत्मेति यद्यत्रैतत्सुप्तः समस्तः संप्रसन्नः स्वप्नं न विजानात्येष आत्मेति च जीवमेवावस्थांतरगतं व्याचष्टे तस्यैवापहतपाप्मत्वादि दर्शयत्येतदमृतमभयमेतद्ब्रह्मेति नाह खल्वयमेवं संप्रत्यात्मानं जानात्ययमहमस्मीति नो एवेमानि भूतानीति च सुषुप्तावस्थायां दोषमुपलभ्य एतं त्वेव ते भूयोनुव्याख्यास्यामि नो एवान्यत्रैत

सत्वात्सुप्त्याद्यवस्थाविलक्षणः एष स्वचैतन्येन कारणशरीरसाक्षी तस्य साक्ष्यस्य सत्तास्फूर्तिप्रदत्वादात्मेत्यर्थः चतुर्थपर्याये ब्रह्मोक्तेः तस्यैवापहतपाप्मत्वादिगुणा इत्याशंक्य तस्यापि पर्यायस्य जीवत्वमाह नाहेति अहेति निपातः खेदार्थे विद्यमानो हीं द्भ्रुवाचन खलु सुप्तः पुमानयं संप्रति सुषुप्त्यवस्थायामयं देवदत्तोहमित्येवमात्मानं जानाति नो एवनैवेमानि भूतानि किंतु विनाशमेव प्राप्तो भवति नाह मत्र

भोग्यं पश्यामि इति दोषमुपलभ्य पुनः प्रजापतिमुपससाद तं दोषं श्रुत्वा प्रजापतिराह एतमिति एतस्मात्प्रकृतात्मनोन्यत्रान्यं न व्याख्यास्यामित्युपक्रम्य मघवन्मर्त्यं वा इदं शरीरं इति निंदापूर्वकं जीवमेव दर्शयतीत्यर्थः ॥ तस्मात्प्रजापतिवाक्यान्नतोसंभवासिध्देः सिध्दां तयति तं प्रतीति अवस्थात्रयशोधनेनाविर्भूतं शोधितत्वमर्थस्य वाक्योत्थवृत्त्यभिव्यक्तमित्यर्थः तर्हि सूत्रे पुल्लिंगेन जीवोक्तिः कथं

दस्मादिति चोपक्रम्य शरीरसंबंधनिंदापूर्वकमेष संप्रसादोस्माच्छरीरात्समुत्थाय परंज्योतिरूपसंपद्य स्वेन रूपेणाभिनिष्पद्यते स उत्तमः पुरुष इति जीवमेव शरीरात्समुत्थितं उत्तमपुरुषं दर्शयति ॥ तस्माद स्ति संभवो जीवे पारमेश्वराणां धर्माणामतो दहरोस्मिन्नंतराकाश इति जीव एवोक्त इति चेत्कश्चिद्ब्रूयात् तं प्रति ब्रूयादाविर्भूतस्वरूपस्त्विति तुशब्दः पक्षव्यावृत्त्यर्थः नोत्तरस्मादपि वाक्यादिह जीवस्याशंकासंभवतीत्यर्थः कस्माद्यतस्तत्रापि

ज्ञानेन जीवत्वस्य निवृत्तत्वादित्यत आह भूतपूर्वमिति ज्ञानात्पूर्वमविद्यातत्कार्यं प्रतिबिंबितत्वरूपं जीवत्वमभूदिति कृत्वा ज्ञानानंतरं ब्रह्मरूपोपि जीवनाम्नोच्यत इत्यर्थः विश्वतैजसप्राज्ञतुरीयपर्यायचतुष्टयात्मकप्रजापतिवाक्यस्य तात्पर्यमाह एतदिति जन्मनाशवत्वात्प्रतिबिंबवद्बिंबदेहो नात्मेति ज्ञापनार्थं प्रजापतिरिंद्रविरोचनौ प्रत्युवाचोदशराव आत्मानमवेक्ष्य यदात्मनो न विजानीथ-

स्तन्मेऽमृतमित्यादिब्राह्मणेनेत्याहोदशरावेति उदकपूर्णेशरावे प्रतिबिंबात्मानं देहं दृष्ट्वास्वस्याज्ञातं यत्तन्मत्यं वाच्यमित्युक्तश्रुत्यर्थः व्युत्थाप्यविचाल्याभिनिष्पत्तेइत्यर्थे तदुक्तं भवतीति संबंधः किमुक्तमित्यत आह यदस्येतिजीवत्वरूपेणजीवं नव्याचष्टेलोकसिध्द-

आविर्भूतस्वरूपोजीवोविवक्ष्यते आविर्भूतंस्वरूपमस्येत्याविर्भूतस्वरूपः भूतपूर्वगत्या जीववचनंएतदुक्तंभवति यएषोक्षिणीत्यक्षिलक्षितंद्रष्टारंनिर्दिश्योदशराव ब्राह्मणेनैनं शरीरात्मतायाव्युत्थाप्यैवंत्वेवतइतिपुनःपुनस्तमेवव्याख्येयत्वेनाकृष्यस्वप्नसुषुप्तोपन्यासक्रमेणपरंज्योतिरुपसंपद्यस्वेनरूपेणाभिनिष्पद्यतइति यदस्यपारमार्थिकंस्वरूपंपरं ब्रह्मतद्रूपतयैनंजीवंव्याचष्टेनजैवेनरूपेणयत्परंज्योतिरुपसंपत्तव्यंश्रुतंतत्परंब्रह्मतच्चाप हतपाप्मत्वादिधर्मकं॥

त्वात् किंतुनमनूद्यपरस्परव्यभिचारिणीभ्योवस्थाभ्योविविच्यब्रह्मस्वरूपंबोधयतिअ तोपह्रह्मतदेवापहतपाप्मत्वादिधर्मकंनजीवइत्युक्तंभवतिशोधितस्यब्रह्माभेदेनतध्दर्मोक्तेरित्यर्थः एवमवस्थोपन्यासस्यविवेका २४
र्थत्वान्नजीवलिंगत्वंएतदमृतमेतद्ब्रह्मेतिलिंगोपेतश्रुतिविरोधादिनिमंतव्यं॥

ननुजीवत्वब्रह्मत्वविरुध्द्धर्मवतोः कथमभेदस्तत्राह तदेवेति अन्वयव्यतिरेकाभ्यांजीवत्वस्याविद्याकल्पितत्वादविरोधः इतिमत्वा दृष्टांते-
नान्वयमाह यावदितिव्यतिरेकमाह यदेति अविद्यायांसत्यांजीवत्वंवाक्योत्थप्रबोधात्तन्निवृत्तौत्तन्निवृत्तिरित्याविद्यकंत्वादित्यर्थः संसारि

तदेवजीवस्यपारमार्थिकंस्वरूपंतत्वमसीत्यादिशास्त्रेभ्योनेतरदुपाधिकल्पितंयावदेवहि
स्थाणाविवपुरुषबुध्दिंद्वैतलक्षणामविद्यांनिवर्तयन् कूटस्थनित्यदृक्स्वरूपमात्मानम
हंब्रह्मास्मीतिनप्रतिपद्यतेतावज्जीवस्यजीवत्वं यदातुदेहेंद्रियमनोबुध्दिसंघाताद्व्युत्था
प्यश्रुत्याप्रतिबोध्यते नासित्वंदेहेंद्रियमनोबुध्दिसंघातः नासिसंसारी किंतर्हितद्यत्सत्यं
सआत्माचैतन्यमात्रस्वरूपस्तत्वमसीति तदाकूटस्थनित्यदृक्स्वरूपंआत्मानंप्रबुध्या-
स्माच्छरीराद्यभिमानात्समुत्तिष्ठन् सएवकूटस्थनित्यदृक्स्वरूपआत्माभवति सयोहवै

त्वस्यकल्पितत्वेसतियत्सिध्दंतदुपनिगमयति तदेवचास्येति समुत्थायस्वेनरूपेणाभिनिष्पद्यतइतिश्रुतिंव्याख्यातुंआक्षिपतिकथंपुनरि
त्यादिनाकूटस्थनित्यस्यस्वरूपमित्यन्वयः मलसंगिनोहिक्रिययामलनाशादभिव्यक्तिर्नतुकूटस्थस्यासंगिनइत्याह सुवर्णेतिदृष्टांतरं

पार्थिवोमलः अभिभूतेत्यस्यव्याख्यानमनभिव्यक्तेति असाधारणो भास्वरत्वादिः अभिभावकः सौरालोकः ॥ जीवस्वरूपस्याभिभवेबाध
कमाह दृष्टेति विज्ञानघनएवेतिश्रुत्याचिन्मात्रस्तावदात्मातच्चैतन्यंचक्षुरादिजन्यवृत्तिव्यक्तं दृष्ट्यादिपदवाच्यंसद्व्यवहारांगंजीवस्वरूपंम

तत्परंब्रह्मवेदब्रह्मैवभवतीत्यादिश्रुतिभ्यस्तदेवचास्यपारमार्थिकंस्वरूपंयेनशरीरात्समुत्था-
यस्वेनरूपेणाभिनिष्पद्यतेकथंपुनःस्वस्वरूपंस्वेनैवचनिष्पद्यतइतिसंभवतिकूटस्थनित्यस्यसु
वर्णादीनांद्रव्यांतरसंपर्कादभिभूतस्वरूपाणां अनभिव्यक्तासाधारणविशेषाणांक्षारप्रक्षे
पादिभिः शोध्यमानानांस्वरूपेणाभिनिष्पत्तिस्यात् तथानक्षत्रादीनामहन्यभिभूतप्रकाशा
नांअभिभावकवियोगेरात्रौस्वरूपेणाभिनिष्पत्तिःस्यात् ननुतथाचैतन्यज्योतिषोनित्यस्य
केनचिदभिभवःसंभवत्यसंसर्गित्वात्व्योम्नइव ॥ दृष्टविरोधाच्च दृष्टिश्रुतिमतिविज्ञातयो
हिजीवस्यस्वरूपं तच्चशरीरादसमुत्थितस्यापिजीवस्यसदानिष्पन्नमेवदृश्यते सर्वोहिजीवः

वति तस्याभिभूतत्वे दृष्टोव्यवहारोविरुध्येतहेत्वभावाद्व्यवहारोनस्यादित्यर्थः अज्ञस्यापिस्वरूपंदृशिषुव्यक्तमित्यंगीकार्यंव्यवहारदर्शना

दित्याह तच्चेति। अन्यथेत्युक्तं स्फुटयति तच्चेदिति स्वरूपं चेत् ज्ञानिन एव व्यज्येत ज्ञानात्पूर्वं व्यवहारोच्छित्तिरित्यर्थः अतः स्वदैव व्यक्तरूपत्वादित्यर्थः सदावृत्तिषु व्यक्तस्य वस्तुतोऽसंगस्यात्मनः आविद्यकदेहाद्यविवेकरूपस्य मलसंगस्य सत्वात्तद्विवेकापेक्षया समुत्थानादि

पश्यन् शृण्वन् मन्वानो विजानन् व्यवहरत्यन्यथा व्यवहारानुपपत्तिः तच्चेच्छरीरात्समुत्थितस्य निष्पद्येत प्राक् समुत्थानात् दृष्टो व्यवहारो विरुध्येत अतः किमात्मकमिदं शरीरात्समुत्थानं किमात्मिका वा स्वरूपेणाभिनिष्पत्तिरित्यत्रोच्यते प्राग्विवेकविज्ञानोत्पत्तेः शरीरेंद्रियमनोबुद्धिविषयवेदनोपाधिभिरविविक्तमिव जीवस्य दृष्ट्यादिज्योतिः स्वरूपं भवति यथा शुद्धस्य स्फटिकस्य स्वाच्छ्यं शौक्ल्यं च स्वरूपं प्राग् विवेकग्रहणाद्रक्तनीलाद्युपाधिभिरविविक्तमिव भवति प्रमाणजनितविवेकग्रहणात्तु पराचीनस्फटिकः स्वाच्छ्येन शौक्ल्येन च स्वरूपेणाभिनिष्पद्यत इत्युच्यते प्रागपि तथैव सन् तथा देहाद्युपाध्यविविक्तस्यैव सतो जीवस्य श्रुतिकृतविवेकज्ञानं शरीरात्समुत्थानं विवेकविज्ञानफलं स्वरूपेणाभिनिष्पत्तिः॥

श्रुतिरित्युत्तरमाह अत्रेति वेदना हर्षशोकादिः अविविक्तमिवेति तादात्म्यस्य संगस्य कल्पितत्वमुक्तं तत्र कल्पितसंगे दृष्टांतो यथेति श्रुतिकृतमिति त्वंपदार्थश्रुत्या योऽयं विज्ञानमयः प्राणेष्वित्याद्यया सिद्धमित्यर्थः॥ ॥ ॥

प्राणादिभिन्नशुध्दत्वंपदार्थज्ञानस्यवाक्यार्थसाक्षात्कारः फलमित्याह केवलेतिसशरीरत्वस्यसत्यत्वात्समुत्थानमुत्क्रांतिरितिव्याख्ये।
यंनविवेकइत्याशंक्याह तथाविवेकेति उक्तश्रुत्यनुसारेणेत्यर्थः शरीरेष्वशरीरमवस्थितमितिश्रुतेः अविवेकमात्रकल्पितंसशरीरत्वं
अतोविवेकएवसमुत्थानमित्यर्थः ननुस्वकर्मार्जितेशरीरेभोगस्यापरिहार्यत्वात् कथंजीवतएवस्वरूपाविर्भावइत्यतआह शरीर-

केवलात्मस्वरूपावगतिस्तथाविवेकाविवेकमात्रेणैवात्मनोऽशरीरत्वंसशरीरत्वंचमंत्रवर्णात् अशरीरंशरीरेष्वितिशरी-
रस्थोपिकौंतेयनकरोतिनलिप्यतइतिचसशरीरत्वाशरीरत्वविशेषाभावस्मरणात् तस्माद्विवेकविज्ञानाभावादनाविर्भू
तस्वरूपः सन् विवेकज्ञानादाविर्भूतस्वरूपइत्युच्यतेनत्वन्यादृशावाविर्भावानाविर्भावौस्वरूपस्यसंभवतः स्वरूपत्वादेव
एवंमिथ्याज्ञानकृतएवजीवपरमेश्वरयोर्भेदोनवस्तुकृतः व्योमवदसंगत्वाविशेषात् कुतश्चैतदेवंप्रतिपत्तव्यं यतोयएषो
क्षिणिपुरुषोदृश्यते इत्युपदिश्यैतदमृतमभयमेतत् ब्रह्मेत्युपदिशति योक्षिणिप्रसिध्दोद्रष्टाद्रष्टृत्वेनविभाव्यतेसो

स्योपीति अशरीरवत् शरीरस्थस्यापिसंबंधाभावस्मृतेर्जीवतोमुक्तिर्युक्तेत्यर्थः अविरुध्देश्रुत्यर्थेसूत्रशेषोयुक्तइत्याह तस्मादि
तिअन्यादृशौसत्यावित्यर्थः ज्ञानाज्ञानकृतावाविर्भावतिरोभावावितिस्थितेभेदोप्यंशांशित्वकृतोनिरस्तइत्याह एवमितिअंशादि २६
शून्यत्वमसंगत्वं आत्माद्रव्यत्वव्याप्यजातिशून्यः विभुत्वात् व्योमवदित्यात्मैक्यसिध्देर्भेदोमिथ्येत्यर्थः प्रजापतिवाक्याच्चभेदोमिथ्ये

त्याकांक्षापूर्वकमाह कुतश्चेत्यादिना एतच्छेदस्यसत्यत्वमेवनास्तीतिकुतइत्यन्वयः॥ छायायांब्रह्मदृष्टिपरमिदंवाक्यंनाभेदपरमि
त्यत आह नापीति यस्यज्ञानात्कृतकृत्यतासर्वकामप्राप्तिस्तमात्मानमन्विच्छावइतिप्रवृत्तयोरिंद्रविरोचनयोर्पदेशनात्मच्छायांप्रजापति
र्ब्रूयात् तदामृषावादीस्यादित्यर्थः प्रथमवद्द्वितीयादिपर्यायेष्वावृतास्ववस्थासुअनुस्यूतात्माब्रह्मत्वेनोक्तइत्याहतथेति अवस्थाभेदेप्यनु-
मृताभयलक्षणात् ब्रह्मणोन्यश्चेत्स्यात्तदामृताभयब्रह्मसामानाधिकरण्यंनस्यात् ॥ नापिप्रतिच्छायात्मायमक्षिलक्षितोनि
र्दिश्यते प्रजापतेर्मृषावादित्वप्रसंगात् तथाद्वितीयेपर्यायेयएषस्वप्नेमहीयमानश्चरतीतिनप्रथमपर्यायनिर्दिष्टदक्षिपुरुषाद्द्र
ष्टुरन्योनिर्दिष्टः एतंत्वेवतेभूयोनुव्याख्यास्यामीत्युपक्रमात् किंचाहपद्यस्वप्नेहस्तिनमद्राक्षंनेदानींतंपश्यामीतिदृष्टमेवप्रतिबु-
द्धः प्रत्याचष्टेद्रष्टारंतुतमेवप्रत्यभिजानातियएवाहंस्वप्नमद्राक्षंसएवाहंजागरितंपश्यामीति तथातृतीयपर्यायेनाहखल्वयमे
वंसंप्रत्यात्मानंजानात्ययमहमस्मीतिनोएवेमानीतिसुषुप्तावस्थायांविशेषविज्ञानाभावमेवदर्शयति नविज्ञातारंप्रतिषेधति यत्तु
तत्रविनाशमेवापीतोभवतीतितदपिविशेषविज्ञानविनाशाभिप्रायमेव नविज्ञातृविनाशाभिप्रायंनहिविज्ञातुर्विज्ञातेर्विपरिलो
पोविद्यतेविनाशित्वादितिश्रुत्यंतरात्॥ स्यूतोयुक्तिमाह किंनेति सुषुप्तौबातुर्व्यावृत्तिमाशंक्याह तथातृतीयइति सुषुप्तोनिर्विकल्प
ज्ञानरूपआत्मास्तीत्यत्रबृहदारण्यकश्रुतिमाह नहीति बुद्धेः साक्षिणोनाशोनास्तिनाकाशाभाववादित्यर्थः॥ ॥

एवमेवावस्थाभिरसंगत्वेनोक्त आत्मैव तुरीयेपि ब्रह्मत्वेनोक्त इत्याह तथेति श्रुतेरेकदेशिव्याख्यां दूषयति केचित्त्विति जीवपरयो
र्भेदादिति भावः श्रुतिबाधान्नैवमित्याह तेषामिति संनिहितो जीव एव सर्वनामार्थ इत्यर्थः उक्तस्य पुनरुक्तौ भूय इति युज्यते तथतूपक्र

तथा चतुर्थेपि पर्याये एतं त्वेव ते भूयोनुव्याख्यास्यामि नो एवान्यत्रैतस्मादित्युपक्रम्य मघवन्मर्त्यं वा इदं शरीरमित्यादिना प्रपं
चेन शरीराद्युपाधिसंबंधमत्याख्यानेन संप्रसादशब्दोदितं जीवं स्वेन रूपेणाभिनिष्पद्यत इति ब्रह्मस्वरूपापन्नं दर्शयन्न परस्मा
त् ब्रह्मणोमृताभयस्वरूपादन्यं जीवं दर्शयति केचित्तु परमात्मविवक्षायां एतं त्वेव त इति जीवाकर्षणमन्याय्यं मन्यमाना एतमे
व वाक्योपक्रमे सूचितमपहतपाप्मत्वादिगुणकमात्मानं ते भूयोनुव्याख्यास्यामीति कल्पयंति तेषामेतमिति संनिहितावल
लंबिनी सर्वनामश्रुतिर्विप्रकृष्येत भूयश्श्रुतिश्चोपरुध्येत पर्यायांतराभिहितस्य पर्यायांतरेणानभिधीयमानत्वात् एतं त्वेव
त इति च प्रतिज्ञाय प्राक् चतुर्थात्पर्यायादन्यमन्यं व्याचक्षाणस्य प्रजापतेः प्रतारकत्वं प्रसज्येत तस्माद्यदविद्याप्रत्युपस्थापित
मपारमार्थिकं जैवं रूपं कर्तृभोक्तृ रागद्वेषादिदोषकलुषितमनेकानर्थयोगि तद्विलयनेन तद्विपरीतमपहतपाप्मत्वादिगुण
कं पारमेश्वरं स्वरूपं विद्यया प्रतिपद्यते सर्पादिविलयनेनेव रज्ज्वादीन्॥ तपरमात्मनश्चतुर्थ एवोक्तेस्तद्बाध इत्याह भूय इति

लोकसिद्धजीवानुवादेन ब्रह्मत्वं बोध्यत इति स्वमतमुपसंहरति तस्मादिति व्याख्यानांतरासंभवादित्यर्थः विलयनं शोधनं विद्यया
महावाक्येनेति यावत्॥

येतुसंसारंसत्यमिच्छंतितेषामिदंशारीरकमेवोत्तरमित्याह अपरेत्वित्यादिना शारीरकस्यार्थंसंक्षेपेणोपदिशति एकएवेति अविद्यामाय
योर्भेदंनिरसितुंसामानाधिकरण्यंआवरणविक्षेपशक्तिरूपशब्दप्रवृत्तिनिमित्तभेदात्सहप्रयोगः ब्रह्मैवाविद्यया संसरतिनततोन्यो
जीवइतिशारीरकार्थइत्यर्थः तर्हिसूत्रकारः किमितिभेदंब्रूतेतत्राह यत्विति परमात्मनोसंसारित्वसिध्यर्थंजीवान्भेदंदर्शयति तस्य

अपरेतुवादिनः पारमार्थिकमेवजैवंरूपमितिमन्यंते अस्मदीयाश्च केचित् तेषांसर्वेषामात्मैकत्वसम्यग्दर्शनप्रतिपक्ष
भूतानांप्रतिबोधायेदंशारीरकमारब्धमेक एवपरमेश्वरः कूटस्थनित्योविज्ञानधातुरविद्ययामाययामायाविवदनेकधा-
विभाव्यते नान्योविज्ञानधातुरस्तीति यत्विदंपरमेश्वरवाक्येजीवमाशंक्यप्रतिषेधतिसूत्रकारः नासंभवादित्यादिना तत्रा
यमभिप्रायः नित्यशुध्दबुध्दमुक्तस्वभावेकूटस्थनित्ये एकस्मिन्नसंगेपरमात्मनि तद्विपरीतंजैवंरूपंव्योम्नीवतलमलिन-
तादिपरिकल्पितं तदात्मैकत्वप्रतिपादनपरवाक्यैर्न्यायोपेतैर्द्वैतवादप्रतिषेधैश्चापनेष्यामीति परमात्मनोजीवादन्यत्वं
दर्शयति जीवस्यतुनपरस्मादन्यत्वंप्रतिपिपादयिषति किंत्वनुवदत्येवाविद्याकल्पितंलोकप्रसिध्दंजीवभेदं एवंहिस्वा
भाविककर्तृभोक्तृत्वानुवादेनप्रवृत्ताःकर्मविधयोनविरुध्यंतइतिमन्यते॥ संसारित्वनिश्चयाभावेतद्भेदोक्तावपिजीवस्य
संसारित्वानपायादित्यर्थः अधिष्ठानस्यकल्पितान्भेदेपिकल्पितस्याधिष्ठानान्नतुपृथक्सत्वमित्याह जीवस्यत्विति कल्पितभे-
दानुवादस्यफलमाह एवंहीति॥

सूत्रेष्वभेदोनोक्त इति भ्रांतिं निरस्यति प्रतिपाद्यमिति आत्मेति तूपगच्छंतीत्यादिसूत्राणि आदिपदार्थः नन्वद्वैतस्य शास्त्रार्थत्वे द्वैता
पेक्षाविधिविरोधस्तत्राह वर्णितश्चेति अद्वैतमजानतः कल्पितद्वैताश्रयाविधयो न विदुष इति सर्वमुपपन्नमित्यर्थः एवं प्रजापतिवा-

प्रतिपाद्यं तु शास्त्रार्थमात्मैकत्वमेव दर्शयति शास्त्रदृष्ट्यातूपदेशो वामदेववदित्यादिना वर्णितश्चास्माभिर्विद्वदविद्व
द्भेदेन कर्मविरोधपरिहारः अन्यार्थश्च परामर्शः अथ यो दहरवाक्यशेषे जीवपरामर्शो दर्शितः अथ य एष संप्रसाद इ-
त्यादिः स दहरे परमेश्वरे व्याख्यायमानेन जीवोपासनोपदेशो न प्रकृतविशेषोपदेश इत्यनर्थकत्वं प्राप्नोतीत्यत आह
अन्यार्थोऽयं जीवपरामर्शः न जीवस्वरूपपर्यवसायी किं तर्हि परमेश्वरस्वरूपपर्यवसायी कथं संप्रसादशब्दोदितो जी
वो जागरितव्यवहारे देहेंद्रियपंजराध्यक्षो भूत्वा तद्वासनानिर्मितांश्च स्वप्नान्नाडीश्चरन्ननुभूय श्रांतः शरणं प्रेप्सुरुभ
यरूपादपि शरीराभिमानात्समुत्थाय सुषुप्तावस्थायां परं ज्योतिराकाशशब्दितं परं ब्रह्मोपसंपद्य विशेषविज्ञानवत्त्वं

क्येजीवानुवादेन ब्रह्मण एवापहतपाप्मत्वाद्युक्तेऽजरिवेतदसंभवान्न जीवो दहर इत्युक्तं तर्हि जीवपरामर्शस्य का गतिरित्यत आह अ
न्यार्थश्चेति सूत्रं व्याचष्टे अथेत्यादिना प्रकृते दहरे विशेषो गुणस्तदुपदेशोऽपिनेत्यर्थः तत्र दहरवाक्यशेषरूपं संप्रसादवाक्यमाशंका

पूर्वकं दहरब्रह्मपरत्वेन व्याचष्टे कथमित्यादिना उपास्यत्वादल्पत्वमुक्तमिति व्याख्याय श्रुत्या निरस्तमित्यर्थांतरमाह श्रुत्यैव चेदमि
ति एवं दहरवाक्यं प्रजापतिवाक्यं च सगुणे निर्गुणे च समन्वितमिति सिद्धं अनुकृतेस्तस्य च मुंडकवाक्यमुदाहरति न तत्रेति त-

परित्यज्य स्वेन रूपेणाभिनिष्पद्यते यदस्योपसंपत्तव्यं परं ज्योतिः येन स्वेन रूपेणायमभिनिष्पद्यते स एष आत्मापहतपाप्मत्वादिगुण उपास्य इत्येवमर्थोयं जीवपरामर्शः परमेश्वरवादिनोप्युपपद्यते अल्पश्रुतेरिति चेत्तदुक्तं दहरोस्मिन्नंतराकाश इत्याकाशस्याल्पत्वं श्रूयमाणं परमेश्वरे नोपपद्यते जीवत्वस्याराग्रोपमितस्याल्पत्वमवकल्पित इति तस्य परिहारो वक्तव्यः उक्तोप्यस्य परिहारः परमेश्वरस्यापेक्षिकमल्पत्वमवकल्प्यत इत्यर्भकौकस्त्वात्तद्व्यपदेशाच्चनेति चेन्न निचाय्यत्वादेवं व्योमवच्चेत्यत्र स एवेह परिहारोनुसंधातव्य इति सूचयति ॥ श्रुत्यैव चेदमल्पत्वं प्रत्युक्तं प्रसिद्धेनाकाशेनोपमिमानया यावान्वा अयमाकाशस्तावानेषोंतर्हृदय आकाश इति अनुकृतेस्तस्य च न तत्र सूर्यो भाति न

स्मिन्ब्रह्मणि विषयेन भाति तन्न भासयतीति यावत् यदा चंद्रभास्करादिर्न भासयति तदाल्पदीप्तेरग्नेः का कथेत्याह कुत इति किंन
सर्वस्य सूर्यादेस्तद्भास्यत्वान्न तद्भासकत्वमित्याह तमेवेति अनुगमनवदनुभानं स्वगतमिति शंकां निरस्यति तस्येति सप्तम्याः सतिं विषयेन

साधारण्यात्संशयमाह तत्रेति पूर्वत्रात्मश्रुत्यादिबलादाकाशशब्दस्यरूढित्यागादीश्वरेवृत्तिराश्रितातथेहापिसातिससमीबलात्सर्वभा
नार्थत्यागेनयस्मिन्सतिसूर्यादयोनभास्यंतिसतेजोविशेषउपास्यइतिभाविष्यदर्थेवृत्तिराश्रयणीयाः अधुनाभासमानेसूर्यादौनभाती:

चंद्रतारकंनेमाविद्युतोभांतिकुतोयमग्निः तमेवभांतमनुभातिसर्वंतस्यभासासर्व
मिदंविभातीतिसमामनंति तत्रयंभांतमनुभातिसर्वंयस्यचभासासर्वमिदंविभाति
सकिंतेजोधातुः कश्चिदुतप्राज्ञआत्मेतिविचिकित्सायांतेजोधातुरितितावत्प्राप्तंकु
तः तेजोधातूनामेवसूर्यादीनांभानप्रतिषेधात् तेजः स्वभावकंहिचंद्रतारकादितेजः
स्वभावकेएवसूर्येभासमानेहनिनभासत इतिप्रसिद्धम् तथासहसूर्येणसर्वमिदंचंद्रतारका
दियस्मिन्नभासतेसोपितेजः स्वभावः कश्चिदित्यवगम्यते॥ ॥

तिविरोधात् इतिदृष्टांतेनपूर्वपक्षयति तेजोधातुरिति तेजोध्यानंनिर्गुणस्वयंज्योतिरात्मज्ञानमित्युभयत्रफलंतेजोधातुत्वेलिंगमाह तेजो-
धातूनामिति यत्तेजसोभिभावकंतत्तेजइतिव्याप्तिमाह। तेजः स्वभावकमिति॥ ॥ ॥

यस्मिन्सतियन्नभातितद्वस्तुतद्भातीतिविरुध्दमित्यतआह अनुभानमिति तदानिकृष्टभानंवि वक्षितमितिभावः मुख्यसंभवेविवक्षा
नुपपत्तेः मुख्यानुभानलिंगात्सर्वभासकः परमात्मास्वप्रकाशकोत्रग्रात्यः इतिसिध्दांतमाह प्राज्ञइतिप्राज्ञत्वंस्वप्रकाशत्वंभासकत्वा
र्थमुक्तंतत्रश्रुतिमाह भारूपइतिभानाभावाच्च तेजो धातुर्नग्रात्यइत्याह नत्विति किंचसूर्यादयस्तेजोंतरभानमनुनभांति तेजस्त्वात्

अनुमानमपितेजः स्वभावकएवोपपद्यतेसमानस्वभावकेष्वनुकारदर्शनात् गच्छंतमनुगच्छतीतिवत्तस्मात्तेजो
धातुः कश्चिदित्येवंप्राप्तेब्रूमः प्राज्ञएवायमात्माभवितुमर्हतिकस्मात् अनुकृतेरनुकरणमनुकृतिः यदेतत्तमेवभां
तमनुभातिसर्वमित्यनुभानंतत्प्राज्ञपरिग्रहेवकल्पते भारूपः सत्यसंकल्पइतिहिप्राज्ञमात्मानमामनंति नतुते
जोधातुंकंचित्सूर्यादयोनुभांतीति प्रसिध्दं समत्वाच्चतेजो धातूनांसूर्यादीनांनतेजोधातुमन्यंप्रत्यपेक्षास्तियंभांत
मनुभायुः नहिप्रदीपः प्रदीपांतरमनुभाति यदप्युक्तंसमानस्वभावकेष्वनुकारोदृश्यतेइतिनायमेकांतोभिन्न

दीपवदित्याह समत्वाच्चेति योयमनुकरोति सतज्जातीयइतिनियमोनास्तीत्याह नायमेकांतइति पौनरुक्त्यमाशंक्योक्तानुवादपूर्व-
कंसूत्रोक्तंहेत्वंतरंव्याचष्टे अनुकृतेरिति तमेवभांतमित्येवकारोक्तंतद्भानंविनासर्वस्यपृथक्भानाभावरूपंअनुभानमनुकृतेरित्य-नेो
क्तंवस्यन्वेतिसर्वभासकत्वमुक्तं इत्यपौनरुक्त्यमित्यर्थः॥ ॥ ॥ ॥

आत्मनः सूर्यादिभासकत्वं श्रुत्यंतरप्रसिद्धं चेत्याह तद्देवाइति सर्वशब्दः प्रकृतसूर्यादिवाचकत्वेन व्याख्यातः संप्रतितस्यासंकुचवृत्तितां
मत्वार्थांतरमाह अथवेति तमेति सर्वनामश्रुत्याप्रकृतंब्रह्मग्राह्यमित्याह नतत्रसूर्यइति किंच ब्रह्मपर पूर्वमंत्राकांक्षापूरकत्वाद्यमं

स्वभावकेष्वपित्यनुकारोदृश्यतेसुतप्तोयः पिंडोग्न्यनुकृतिरग्निंदहंतमनुदहति भौमंवारजोवायुंवहंतमनु
वहतीति अनुकृतेरित्यनुभानमसूत्रुचव तस्य चेति चतुर्थंपादमस्यश्लोकस्यसूचयति तस्यभासासर्वमि
दंविभातीति तध्देतुकंभानंसूर्यादेरुच्यमानंप्राज्ञ मात्मानंगमयति ॥ तद्देवाज्योतिषांज्योतिरायुर्होपास-
तेमृतमितिहिप्राज्ञमात्मानमामनंति तेजोंतरेणसूर्यादितेजोविभातीत्यप्रसिध्दंविरुध्दंचतेजोंतरेणते-
जोंतरस्यप्रतिघातात् अथवानसूर्यादीनामेवंश्लोकपरिपठितानामिदंतध्देतुकंविभानमुच्यते किंतर्हि
सर्वमितिअविशेषश्रुतेः सर्वस्यैवास्यनामरूपक्रियाकारकफलजातस्ययाभिव्यक्तिः साब्रह्मज्योतिः

त्रोब्रह्मपरइत्याह अनंतरंचेति हिरण्मयेज्योतिर्मये अन्नमयाद्यपेक्षयापरेकोशेआनंदमयाख्येपुच्छवाब्दितंब्रह्मविरजंआगंतुक

मलशून्यंनिष्कलंनिरवयवंशुभ्रंनैसर्गिकमलशून्यंसूर्यादिसाक्षिभूतंब्रह्मविद्यासिद्धमित्यर्थः सतिसमर्पीपक्षमनुवदति यदपीतिसूर्यादयोपि

सत्तानिमित्तायथासूर्यज्योतिः सत्तानिमित्तासर्वस्यरूपजातस्याभिव्यक्तिस्तद्वत्
नतत्रसूर्योभातीतिचतत्रशब्दमाहरन् प्रकृतग्रहणंदर्शयति प्रकृतंहिब्रह्मयस्मिन्द्यौः
पृथिवीचांतरिक्षमोतंइत्यादिना अनंतरंचहिरण्मयेपरेकोशेविरजंब्रह्मनिष्कलंतत्
शुभ्रंज्योतिषांज्योतिस्तद्यदात्मविदोविदुरितिकथंज्योतिषाज्योतिरित्यंतइदसु-
स्थितं नतत्रसूर्योभातीतियदप्युक्तंसूर्यादीनांतेजसांभानप्रतिषेधस्तेजोधातावे
वान्यस्मिन् अवकल्प्यते सूर्यइवेतरेषामिति तत्रतुसएवतेजोधातुरन्योनसंभव-
तीत्युपपादितं॥ब्रह्मण्यपिचैषांभानप्रतिषेधोवकल्प्यते यतोयदुपलभ्यतेतत्सर्वं

भावकतेजोधातौप्रामाणिकेतस्येहग्रहणशंकास्यात् नतत्रप्रमाणमस्तीत्याह। तत्रेति॥ सिद्धांतेनतत्रेतिवाक्यार्थः कथमित्याशं

क्याहब्रह्मण्यपीति सतिसप्तमीपक्षेन भातीतिश्रुतंवर्तमानत्वंत्यत्कातस्मिन्सतिनभास्यतीत्य श्रुतभविष्यत्वंकल्पनीयं भत्यस्त विरोधनि
रोधायविषयसप्तमीपक्षेतुनभासयतीत्यश्रुतणिजध्याहारमात्रंकल्प्यं नश्रुतत्यागइतिलाघवंअतोब्रह्मणिविषयेसूर्यादेर्भासकत्वनिषे-
धेनब्रह्मभास्यत्वमुच्यतेइत्यर्थः येनान्यभास्यत्वेन हेतुनासूर्यादयस्तस्मिन्ब्रह्मणिविषयेभासकास्फः तथातुब्रह्मान्येननोपलभ्यतेस्व

ब्रह्मणैवज्योतिषोपलभ्यते ब्रह्मतुनान्येनज्योतिषोपलभ्यतेस्वयंज्योतिस्वरूपत्वात् येनसूर्याद
यस्तस्मिन् भायुः ब्रह्मत्वयत्यद्यनक्ति नतुब्रह्मान्येनव्यज्यते आत्मनैवायंज्योतिषास्ते अगृह्यो नहि
गृह्यतइत्यादिश्रुतिभ्यः अपिचस्मर्यते अपिचेद्दगुरूपंप्राज्ञस्यैवात्मनः स्मर्यतेभगवद्गीतासुन
तभ्दासयतेसूर्यो॰परममेति ॥ यदादित्यगतंतेजोजगभ्दासयतेखिलं ॥ यच्चंद्रमसियच्चाग्नौ

प्रकाशत्वादितियोजनाउक्तउक्तमेवश्रुत्यंतरेणदृढयतिब्रह्मेतिस्वप्रकाशत्वेन्याभास्यत्वेचश्रुतिद्वयंग्रहणायोग्यत्वादग्राह्यइत्यर्थःणि
जध्याहारपक्षेश्रुतिबलमप्यस्तीत्याह अपिचेतिसूत्रंव्याचष्टे अपिचेति अभास्यत्वेसर्वभासकत्वेचश्लोकद्वयंद्रष्टव्यंतस्माद्नुमान
मंत्रोब्रह्मणिसमन्वितइतिसिध्दंशब्दादेवप्रमितः काठकवाक्यंपठति अंगुष्ठेतिपुरुषः पूर्णोप्यात्मानिदेहेमध्ये अंगुष्ठमात्रेत्हृदये

तिष्ठतीत्यंगुष्ठमात्रउच्यतेतस्यैवपरमात्मत्ववादिवाक्यांतरमाह तथेति अधूमकमितिपठनीयं। मुख्योर्थस्तु आत्मनिजीवेमध्येशरी
रावच्छेदेनायआत्मनितिष्ठतिज्ञेयेब्रह्मणिसमन्वितंवाक्यांतरमाह।तथेतिश्रुतेः॥ योंगुष्ठमात्रोजीवःसवस्तुतोनिर्धूमकंज्योतिरिवनिर्मल
प्रकाशरूपइतित्वमर्थंसंशोध्यतस्यब्रह्मत्वमाह ईशानइति तस्याद्वितीयत्वमाह सएवेति कालत्रयेपिसएवास्तिनान्यत्किंचिन्नचिकेतसा

तत्तेजोविद्धिमामकंइतिच शब्दादेवप्रमितः अंगुष्ठमात्रःपुरुषोमध्यआत्मनितिष्ठतीतिश्रूयते
तथांगुष्ठमात्रःपुरुषोज्योतिरिवाधूमकः ईशानोभूतभव्यस्यसएवाद्यसउश्वएतद्वैतदितिचत
त्रयोयमंगुष्ठमात्रःपुरुषःश्रूयतेसकिंविज्ञानात्माकिंपरमात्मेतिसंशयः तत्रपरिमाणो पदे-
शात्तावद्विज्ञानात्मेतिप्राप्तेनत्वनंतायामविस्तारस्यपरमात्मनोंगुष्ठपरिमाणमुपदिश्यतेतवि
ज्ञानात्मनस्तूपाधिमत्वात्संभवति कयाचित्कल्पनयांगुष्ठमात्रत्वंस्मृतेश्च अथसत्यवतः

पृथंब्रह्मतदेतदेवेत्यर्थः परिमाणेशानशब्दाभ्यांसंशयमाह तत्रेतियथानुमानादिलिंगात् णिजध्याहारेणसूर्याद्यगोचरोब्रह्मेत्युक्तंतथा
प्रथमश्रुतपरिमाणलिंगात् जीवप्रतीतावीशानोस्मीतिध्यायेदितिविध्यध्याहारेणध्यानपरंवाक्यमितिपूर्वपक्षयति तत्रपरिमाणेति

पूर्वपक्षेब्रह्मदृष्ट्याजीवोपास्तिः सिध्दांतेतुप्रत्यग्ब्रह्मैक्यज्ञानंफलमितिमंतव्यं आयामोदैर्घ्यंविस्तारोमहत्त्वमितिभेदः कथान्तिदितिअं गुष्ठमात्रत्वंहृदयस्यविज्ञानशब्दितबुध्यभेदाध्यासकल्पनयेत्यर्थः स्मृतिसंवादादप्यंगुष्ठमात्रोजीवइत्याह स्मृतेश्चेति अथमरणानंतरंयम पाशैर्बध्दंकर्मवशंप्राप्तमित्यर्थः तत्रापीश्वरः किंनस्यादित्यतआह नहीतिप्रभवतिसंयमनेभमापिविष्णुरिति यमस्येश्वरनियम्यत्वस्मर-

कायात्पाशबध्दंवशंगतं अंगुष्ठमात्रंपुरुषंनिश्चकर्षयमोबलाद्दिति नहिपरमेश्वरोबलाद्यमेन निष्क्रष्टुंशक्यः तेनतत्रसंसार्यंगुष्ठमात्रोनिश्चितः सएवेहापीत्येवंप्राप्तेब्रूमः परमात्मैवायमंगुष्ठ मात्रपरिमितःपुरुषोभवितुमर्हतिकस्माच्छब्दात् ईशानोभूतभव्यस्येति नह्यन्यःपरमेश्वराद्भू तभव्यस्यनिरंकुशमीशिताएतद्वैतदितिचप्रकृतंपृष्टमिहानुसंदधाति एतद्वैतद्यत्पृष्टंब्रह्मेत्य र्थः पृष्टंचेहब्रह्मान्यत्रधर्मादन्यत्राऽधर्मादन्यत्रास्मात्कृताकृतादन्यत्रभूताच्चभव्याच्चयत्तत्प- श्यसितद्वदेति॥

णादितिभावः भूतभव्यस्येत्यपभ्रंशानुबाधकाभावाच्चईशानइतिर्दिशित्वशब्दान्निरंकुशमीशिना
भातीतिश्रुत्यालिंगंबाध्यमितिसिध्दांतयति परमात्मैवेति प्रकरणाच्चब्रह्मपरमिदंवाक्यमित्याह एतदिति॥

शब्दोवाक्यंलिंगात् दुर्बलमित्याशंक्याह शब्दादितिकरः सकनिष्ठिकोरत्निः तद्रहितोऽरत्निः मुख्यांगुष्ठमात्रोजीवोगृह्यतां किंगौणग्रह-
णेनेत्यतआह नचान्यइतिसातिसंभवेमुख्यग्रहोन्याय्यः अत्रतुश्रुतिविरोधादसंभवइतिगौणग्रहइत्यर्थः मनुष्यानेवेतित्रैवर्णिकानेवे

शब्दादेवेत्यभिधानश्रुतेरेवेशानइतिपरमेश्वरोवगम्यतइत्यर्थः कथंपुनः सर्वगतस्यपरमात्मनः परिमाणोपदेश
इत्यत्रब्रूमः हृद्यपेक्षयातुमनुष्याधिकारत्वात् सर्वगतस्यापिपरमात्मनोहृदयेवस्थानमपेक्ष्यांगुष्ठमात्रत्वमि
दमुच्यते आकाशस्येववंशपर्वापेक्षमरत्निमात्रत्वंनह्यंजसातिमात्रस्यपरमात्मनोंगुष्ठमात्रत्वमुपपद्यते नचा
न्यः परमात्मनः इहग्रहणमर्हतिईशानशब्दादिभ्यइत्युक्तं ननुप्रतिप्राणिभेदंहृदयानामनवस्थितत्वात्तद
पेक्षमप्यंगुष्ठमात्रत्वंनोपपद्यतइत्यतउत्तरमुच्यते मनुष्याधिकारत्वादितिशास्त्रंत्वविशेषप्रवृत्तमपिमनुष्या
नेवाधिकरोतिशक्तत्वादर्थित्वात् अपर्युदस्तत्वादुपनयनादिशास्त्राच्चेति॥

त्यर्थः शक्तत्वादित्यनेनपश्वादीनांदेवानांनृषीणांचाधिकारोवारितः तत्रपश्वादीनांशास्त्रार्थज्ञानादिसामर्थ्याभावात्कर्मण्यशक्तिः इं
द्रादेः स्वदेवताकेकर्मणिस्वोद्देशेनद्रव्यत्यागायोगात् अशक्तिः नृषीणामार्षेयवरणेऋष्यंतराभावादशक्तिः अर्थित्वादित्यनेननिष्का

मानां मुमुक्षूणां स्थावराणां चाधिकारो वारितः तत्र मुमुक्षूणां शुध्यर्थित्वे नित्यादिष्वधिकारो न काम्येषु शुद्धचित्तानां मोक्षार्थित्वेन श्रवणादिषु व्यंजकेष्वधिकारो न कर्मस्विति मंतव्यं शूद्रस्याधिकारं निरस्यति अपशुद्रस्त्वादिति शूद्रो यज्ञेनवक्लृ प्त इति पर्युदासात

वर्णितमेतदधिकारलक्षणे मनुष्याणां च नियतपरिमाणः कायस्तेनोचित्येन नियतपरिमाणमेव हृदयमंगुष्ठमात्रं तद्द यं अतो मनुष्याधिकारत्वाच्छास्त्रस्य मनुष्यत्वहृदयावस्थानापेक्षमंगुष्ठमात्रत्वमुपपन्नं परमात्मनः यदप्युक्तं परिमाणोपदेशात् स्मृतेश्च संसार्येवायमंगुष्ठमात्रः प्रत्येतव्य इति तत्रोच्यते स आत्मा तत्त्वमसीत्यादिवत् संसारिण एव सतोंगुष्ठमात्रस्य ब्रह्मत्वमिदमुपदिश्यत इति द्विरूपा हि वेदांतवाक्यानां प्रवृत्तिः क्वचित् परमात्मस्वरूपनिरूपणपरा क्वचिद्विज्ञानात्मनः परमात्मैकत्वोपदेशपरा तदत्र विज्ञानात्मनः परमात्मनैकत्वमुपदिश्यते नांगुष्ठमात्रत्वं कस्यचित्॥ ७॥

उपनयीत तमध्यापयीतेति शास्त्रात्र न शूद्रस्य वैदिके कर्मण्यधिकारः तस्यैकजातित्वस्मृतेरुपनयनप्रयुक्तद्विजत्वा भावेन वेदाध्ययनाभावात्॥ ॥अत्रापेक्षितो न्यायः षष्ठाध्याये वर्णित इत्याह वर्णितमिति स्वर्गकामो यजेतेत्यादिशास्त्रस्याविशेषेण स्वर्गफलार्थिनः

अथशारीरकभाष्येप्रथमाध्यायस्यद्वितीयःपादःप्रारम्भः

श्रीगणेशायनमः ॥ श्रीसरस्वत्यैनमः ॥ श्रीरामंसिध्दमन्तारंगुहाशयिनमंतरं ॥ अंतर्यामिणमज्ञेयंवैश्वानरमहंभजे ॥ पूर्वपादेनोत्तरपादयोःसंगतिंव
कुर्वन्नमनुवदति । प्रथमइति । जगत्कारणत्वोक्त्याव्यापित्वादिकमर्थात्सिध्दं तदुपजीव्योत्तरंपादद्वयंप्रवर्ततइति । हेतुहेतुमभ्दावः संगतिः कथं
पादभेदइत्याशंक्यपादानांप्रमेयभेदमाह अर्थांतरेति । आकाशादिशब्दानांस्पष्टब्रह्मलिंगैर्ब्रह्मणिसमन्वयोदर्शितः अस्पष्टब्रह्मलिंगवाक्यसम
न्वयः पादद्वयेवक्ष्यते प्रायेणोपास्यज्ञेयब्रह्मभेदात्पादयोरवांतरभेदइतिभावः छांदोग्यमुदाहरति इदमिति तस्माज्जायतइतितज्जंतस्मिन्लीय-

ॐ प्रथमेपादेजन्माद्यस्ययतइतिआकाशादेःसमस्तस्यजगतोजन्मादिकारणंब्रह्मेत्युक्तं तस्यसमस्तजगत्कारणस्यब्रह्मणो
व्यापित्वंनित्यत्वंसर्वज्ञत्वंसर्वात्मत्वमित्येवंजातीयकोधर्मउक्तएवभवति अर्थांतरप्रसिद्धानांचकेषांचिच्छब्दानांब्रह्मविषयत्वे
हेतुप्रतिपादनेनकानिचिद्वाक्यानिसंदिह्यमानानिब्रह्मपरतयानिर्णीतानि पुनरप्यन्यानिवाक्यानिअस्पष्टब्रह्मलिंगानिसंदि
ह्यंते । किंपरंब्रह्मप्रतिपादयंति आहोस्विदर्थांतरंकिंचिदिति तंनिर्णयायद्वितीयतृतीयपादावारभ्येते । सर्वत्रप्रसिध्दोपदेशा
त् । इदमाम्नायते सर्वंखल्विदंब्रह्म तज्जलानितिशांतउपासीत ॥

तइतितल्लं तस्मिन्ननतिचेष्टतइति तदनंतज्जंचतल्लंचतदनंचेति
तज्जलान् कर्मधारयेस्मिन्शाकपार्थिवन्यायेनमध्यमपदस्यतच्छब्दस्यलोपः तज्जलानमितिवाच्ये छांदसोवयवलोपः इतिशब्दोहेतौसर्वमिदंजग
द्ब्रह्मैवतद्विवर्तत्वादित्यर्थः ब्रह्मणिमित्रामित्रभेदाभावाच्छांतोरागादिरहितो भवेदितिगुणविधिः ॥ ॥ ॥

सक्रतुमुपासनं कुर्वीतेति विहितोपासनस्योपासीतेत्यनुवादात्फलमाह। अथेति। क्रतुमयः संकल्पविकार इत्यर्थः पुरुषस्य ध्यानविकारत्वं स्फुटयति। यथेति। इह यथ्यास्मिन्मृत्वा ध्यानमहिम्नात ध्येयरूपेण जायत इत्यर्थः क्रतुमयः संकल्पप्रधान इति नार्थः क्रतोर्विषयमाह। मन इति ब्रह्मेतरूपक्रमात् मनोमयः प्राणशरीरं भारूपं सत्यसंकल्पमंतर्हृदये ध्येयमित्यर्थः पूर्वत्र ब्रह्मलिंगैरब्रह्मलिंगबाध उक्तः न तथेहोपक्रमे ब्रह्मणो लिंगमस्ति किंतु प्रकरणं तच्च शांति

अथ खलु क्रतुमयः पुरुषो यथाक्रतुरस्मिँल्लोके पुरुषो भवति तथेतः प्रेत्य भवति स क्रतुं कुर्वीत मनोमयः प्राणशरीर इत्यादि तत्र संशयः किमिह मनोमयत्वादिभिर्धर्मैः शारीर आत्मोपास्यत्वेनोपदिश्यते। अहोस्वित्परं ब्रह्मेति किं तावत्प्राप्तं शारीर इति कुतः तस्य हि कार्यकरणाधिपतेः प्रसिद्धो मन आदिभिः संबंधः परस्य ब्रह्मणो ऽप्राणो ह्यमनाः शुभ्र इत्यादिश्रुतिभ्यः ननु सर्वं खल्विदं ब्रह्मेति स्वशब्देनैव ब्रह्मोपात्तं कथमिह शारीर आत्मोपास्यत्वेन आशंक्यते नैष दोषः नेदं वाक्यं ब्रह्मोपासनाविधिपरं किं तर्हि शमविधिपरं। यत्कारणं सर्वं खल्विदं ब्रह्म तज्जलानिति शांत उपासीतेत्याह एतदुक्तं भवति यस्मात्सर्वमिदं विकारजातं ब्रह्मैव तज्जत्वात्तल्लत्वात्तदनत्वाच्च न च सर्वस्यैकात्मत्वे रागादयः संभवंति तस्माच्छांत उपासीतेति॥ गुणविधानार्थमन्यथासिद्धं अतो

जीवलिंगं न क्लीब इति प्रत्युदाहरणेन पूर्वपक्षयति शारीर इत्यादिना श्रुतिमाशंक्यान्यथासिध्या परिहरति नैष दोष इति शमविधिपरत्वे हेतुमाह यत्कारणमिति यत एवमाह तस्माच्छमविधिपरमित्यन्वयः अत्रेदंशब्दः प्रकृतब्रह्मपरामर्शार्थः न तु जगत्परामर्शार्थः जगद्विशेषणे प्रयोजनाभावात् अत्र प्रयोज

नाभावेपियत्रप्रयोजनंतत्रभवत्येव जगद्विशेषणंयथाल्मैवेदंसर्वंयत्रबाधायांसामानाधिकरण्यदार्ढ्यार्थंविशेषणमावश्यकंतद्वाक्यस्यज्ञेयब्रह्मवि षयत्वात् अत्रतूपासनायांबाधानावश्यकत्वात् विषयाभेदेनब्रह्मणउपरयन्नन्नचशमेति। शमध्यानयोर्विधौवाक्यभेदापत्तेरित्यर्थः जन्मपरंपर

नचशमविधिपरत्वेसत्यनेनवाक्येनब्रह्मोपासनंनियंतुंशक्यते उपासनंतुसक्रतुंकुर्वीतेत्यनेनविधीयतेक्रतुः संकल्पोध्या- नमित्यर्थः तस्यचविषयत्वेनश्रूयतेमनोमयः प्राणशरीरइतिजीवलिंगमतोब्रूमोजीवविषयमेतदुपासनमितिसर्वकर्मास र्वकामइत्याद्यपिश्रूयमाणंपर्यायेणजीवविषयमुपपद्यंते एषमआत्मांतर्हृदयेणीयान्व्रीहेर्वायवाद्वेतिचहृदयायतन- त्वमणीयस्त्वंचाराग्रमात्रस्यजीवस्यावकल्पते नापरिछिन्नस्यब्रह्मणः ननुज्यायान्पृथिव्याइत्याद्यपिनपरिछिन्नेवकल्पतेइ त्यत्रब्रूमोनतावदणीयस्त्वंज्यायस्त्वंचोभयमेकस्मिन्समाश्रयितुंशक्यंविरोधादन्यतराश्रयणेचप्रथमश्रुतत्वादणीयस्त्वंय ऋमाश्रयितुंज्यायस्त्वंतुब्रह्मभावापेक्षयाभविष्यतीतिनिश्चितेचजीवेयदंतेब्रह्मसंकीर्तनमेतद्ब्रह्मेति तदपिप्रकृतपराम र्शार्थत्वाज्जीवविषयमेवतस्मान्मनोमयत्वादिभिर्धर्मैर्जीवउपास्यइत्येवंप्राप्तेब्रूमः परमेवब्रह्ममनोमयत्वादिभिर्धर्मैरुपा स्यंकुतः याजीवस्यापिसर्वकर्मत्वादिसंभवमाह सर्वकर्मेतिसर्वाणिकर्माणियस्यसर्वेकामाभोग्यायस्यसर्वगंधः सर्वरसइत्यादिशब्दार्थःआ राग्रमात्रस्येतितोत्रप्रोतायः शलाकापरिमाणस्येत्यर्थः॥ ॥ ॥

सर्वत्रप्रसिद्धब्रह्मण एवात्रोपास्यत्वोपदेशान्न जीव उपास्य इति सूत्रार्थमाह सर्वत्रेति यच्च फलं नोच्यते तत्र पूर्वोत्तरपक्षसिद्धिः फलमिति मंतव्यं यद्यपि निराकांक्षं ब्रह्म तथापि मनःप्रचुरमुपाधिरस्य प्राणः शरीरमस्येति समासांतर्गत सर्वनाम्नः सन्निहितविशेष्याकांक्षत्वात् ब्रह्मसंबध्यते स्योनं ते सदनं करोमीति संस्कारार्थं सदनस्य निराकांक्षस्यापि तस्मिन् सीदेति साकांक्ष तच्छब्देन परामर्शदर्शनादित्याह अत्रोच्यत इति स्योनं

सर्वत्रप्रसिद्धोपदेशात् यत्सर्वेषु वेदांतेषु प्रसिद्धं ब्रह्मशब्दस्यालंबनं जगत्कारणमिह च सर्वं खल्विदं ब्रह्मेति वाक्योपक्रमे श्रुतं तदेव मनोमयत्वादिधर्मविशिष्टं उपदिश्यत इति युक्तमेवं च प्रकृतहानाप्रकृतप्रक्रिये न भविष्यतः ननु वाक्योपक्रमे श म विवक्षया ब्रह्म निर्दिष्टं न स्वविवक्षयेत्युक्तं अत्रोच्यते यद्यपि शमविवक्षया ब्रह्म निर्दिष्टं तथापि मनोमयत्वादिषूप दिश्यमानेषु तदेव सन्निहितं भवति जीवस्तु न सन्निहितो न च स्वशब्देनोपात्त इति वैषम्यं। विवक्षितगुणोपपत्तेश्च। वक्तुं इष्टा विवक्षिताः यद्यप्यपौरुषेये वेदे वक्तुरभावान्नेच्छार्थः संभवति। तथाप्युपादेयेन फलेनोपचर्यते लोके हि यच्छब्दाभिहित मुपादेयं भवति तद्विवक्षितमित्युच्यते यदनुपादेयं तदविवक्षितमिति तद्वद्वेदेप्युपादेयत्वेनाभिहितं विवक्षितं भवत्यन्न दविवक्षितं॥ पात्रं ते पुरोडाशस्येति श्रुत्यर्थः जीवोपि लिंगात्सन्निहित इत्यत आह जीवस्त्विति इदं हि लिंगद्वयं लोकसिद्धं जीवं न सन्निधापय- ति दुःखिनः उपास्ययोग्यत्वात्फलाभावाच्च अतो विश्वजिन्न्यायेन सर्वाभिलषितमानंदरूपं ब्रह्मैवोपासनाक्रियानुबध्नातीति भावः किं च ब्रह्मपदश्रुत्याऽलिं गबाध इत्याह न चेति। अन्यनिराकांक्षानुगृहीतं फलवत्प्रकरणं विफललिंगाद्बलीय इति समुदायार्थः वस्तुतो विवक्षायाः फलमुपादानं स्वीकारः॥ ॥

शा॰भा॰
३

सचप्रकृतेषुगुणोऽभस्तीतिविवक्षोपचारइत्याह। तथाप्युपादेयेनेति। नन्विदंग्राह्यमिदंत्याज्यमितिधीर्विवक्षाधीनावेदकृतःस्यादित्यतआह।
उपादानानुपादानेत्विति तात्पर्यंनामफलवदर्थप्रतीत्यनुकूलत्वंशब्दधर्मःउपक्रमादिना तस्यज्ञानात्तयोरवगमइत्यर्थः तदिहेति तत्रस्मा-

उपादानानुपादाने तुवेदवाक्यतात्पर्यातात्पर्याभ्याममवगम्येते तदिहयेविवक्षितागुणाःउपासनायामुपादेयत्वेनोपदिष्टाः
सत्यसंकल्पप्रभृतयः तेपरस्मिन्ब्रह्मण्युपपद्यंते। सत्यसंकल्पत्वंहिसृष्टिस्थितिसंहारेष्वप्रतिबंधशक्तित्वात्परमात्मनोव
कल्पते परमात्मगुणत्वेनचयआत्मापहतपाप्मेत्यत्रसत्यकामःसत्यसंकल्पइतिश्रुतम्। आकाशात्मेत्याकाशवदात्मास्येत्य-
र्थः सर्वगतत्वादिभिर्धर्मैः संभवत्याकाशेनसाम्यंब्रह्मणोज्यायान्पृथिव्याइत्यादिनाचैतदेवदर्शयति यदाप्याकाशआत्मास्य
तिव्याख्यायते तदापिसंभवति। सर्वजगत्कारणस्यसर्वात्मनोब्रह्मणआकाशात्मत्वमतएवसर्वकर्मेत्यादि एवमिहोपास्यत-
याविवक्षितागुणाब्रह्मण्युपपद्यंतेयत्तुउक्तंमनोमयःप्राणशरीरइतिजीवलिंगंनतद्ब्रह्मण्युपपद्यतइति। तदपिब्रह्मण्युप
पद्यतइतिब्रूमः सर्वात्मत्वाद्धिब्रह्मणोजीवसंबंधीनिमनोमयत्वादीनिब्रह्मसंबंधीनिभवंति तथाचब्रह्मविषयेश्रुतिस्मृतीभवतः त्वंस्त्री
त्वंपुमानसित्वंकुमारउतवाकुमारीत्वंजीर्णोदंडेनवंचसित्वंजातोभवसिविश्वतोमुखइतिसर्वतः पाणिपादंतत्सर्वतोक्षिशिरोमुखं सर्वतःश्रु-
तिमल्लोकेसर्वमावृत्यतिष्ठतीति अप्राणोह्यमनाःशुभ्रइतिश्रुतिःशुद्धब्रह्मविषयेयंतुमनोमयःप्राणशरीरइतिसगुणब्रह्मविषयेतिविशेषः
अतोविवक्षितगुणोपपत्तेःपरमेवब्रह्मेहोपास्यत्वेनोपदिष्टमितिगम्यते॥ तात्पर्यंत्वादित्यर्थः सर्वात्मत्वेप्रमाणमाह तथाचेतिजीर्णःस्थविरोयं दंडेनवंच
तिगच्छतिसोपित्वमेवयोजातोबालःसत्वमेवसर्वतःसर्वासुदिक्षुश्रुतयःश्रोत्राणयस्येतिसर्वतःश्रुतिमत्सर्वजंतूनांप्रसिद्धाःपाण्यादयस्तस्येतिसर्वात्मत्वोक्तिः॥

ननुजीवधर्माश्चेद्ब्रह्मणियोज्यंतेनर्हिब्रह्मधर्माएवजीवेकिंमितिनयोज्यंतेतत्राह। अनुपपत्तेरितिसूत्रंव्याचष्टे पूर्वेणेति सर्वात्मत्वादिरुक्तः न्यायः कल्पि-
तस्यधर्माअधिष्ठानेसंबध्यते नअधिष्ठानधर्माः कल्पितेइतिभावः वागेववाकः सोस्यास्तीतिवाकी नवाकीअवाकी अनिंद्रियइत्यर्थः कुत्राप्यादरः कामो

अनुपपत्तेस्तुनशारीरः पूर्वेणसूत्रेणब्रह्मणिविवक्षितानांगुणानामुपपत्तिरुक्तानेनशारीरेतेषामनुपपत्तिरुच्यते तुशब्दोवधार-
णार्थः ब्रह्मैवोक्तेनन्यायेनमनोमयत्वादिगुणं नशारीरोजीवोमनोमयत्वादिगुणः यत्कारणंसत्यसंकल्पआकाशात्मावाक्यनाद
रोज्यायान् पृथिव्याइतिचैवंजातीयकागुणानशारीरेआंजस्येनोपपद्यंते। शारीर इतिशरीरेभवइत्यर्थः। नन्वीश्वरोपिशरीरेभ
वइतिसत्यंशरीरेभवति। नतुशरीरएवभवति। ज्यायान्पृथिव्याज्यायानंतरिक्षाद्याकाशवत्सर्वगतश्चनित्यइतिव्यापित्वश्रवणात्
जीवस्तुशरीरएवभवति। तस्यभोगाधिष्ठानाच्छरीरादन्यत्रवृत्त्यभावात्। कर्मकर्तृव्यपदेशाच्च। इतश्चनशारीरोमनोमयत्वादिगु-
णः यस्मात्कर्मकर्तृव्यपदेशोभवति एतमितःप्रेत्याभिसंभवितास्मीति एतमितिप्रकृतंमनोमयत्वादिगुणमुपास्यमात्मानं कर्मत्वे
नप्राप्यत्वेनव्यपदिशति अभिसंभवितास्मीतिशारीरमुपासकंकर्तृत्वेनप्रापकत्वेनाभिसंभवितास्मीति प्राप्तास्मीत्यर्थः नचसत्यां
गतावेकस्यकर्मकर्तृव्यपदेशोयुक्तः॥

स्यनास्तीत्यनादरः निस्पृहइत्यर्थः जीवस्याप्यनुपपत्तौशारीरइतिपरिच्छेदोहेतुः सूत्रोक्तः सत्तुंजीव
स्यैवनेश्वरस्येत्याह सत्यमित्यादिनाप्रापकत्वेनव्यपदिशतीतिसंबंधः॥

कर्मकर्तृव्यपदेशपदस्यार्थांतरमाह। तथोपास्येति एकार्थत्वंप्रकरणस्यसमानत्वं अंतरात्मन्निति विभक्तिलोपः छांदसः शब्दयोर्विशेषोविभक्तिभेदः तस्मात्तदर्थयोर्भेदइतिसूत्रार्थः स्मृतौन्हृदिस्थस्यजीवाद्भेदोक्तेरत्रापिन्हृदिस्थोमनोमयईश्वरइत्याह स्मृतेश्चेति। भूतानिजीवान् यंत्रंशरीरम

तथोपास्योपासकभावोपिभेदाधिष्ठानएवतस्मादपिनशारीरोमनोमयत्वादिविशिष्ट।शब्दविशेषात्।इतश्च शारीरादन्यो मनोमयत्वादिगुणः यस्माच्छब्दविशेषोभवतिसमानप्रकरणेश्रुत्यंतरे यथाव्रीहिर्वायवोवाश्यामाकोवाश्यामाकतंडुलो वैवमयमंतरात्मन् पुरुषोहिरण्मयइतिशारीरस्यात्मनोयः शब्दोभिधायकः ससप्तम्यंतोंतरात्मन्निति तस्माद्विशिष्टोन्यः प्रथमांतः पुरुषशब्दोमनोमयत्वादिविशिष्टस्यात्मनोभिधायकः तस्मात्तयोर्भेदोगम्यते स्मृतेश्च स्मृतिश्चशारीरपरमात्मनोर्भेदंदर्शयति ईश्वरःसर्वभूतानांहृद्देशेर्जुनतिष्ठति भ्रामयन्सर्वभूतानियंत्रारूढानिमाययेत्याद्या अत्राह कःपुनरयं-शारीरोनामपरमात्मनोन्योयः प्रतिषिध्यते अनुपपत्तेस्तुनशारीरइत्यादिना श्रुतिस्तुनान्योतोस्तिद्रष्टानान्योतोस्तिश्रोतेत्येवंजातीयकापरमात्मनोन्यमात्मानंवारयति तथास्मृतिरपि। क्षेत्रज्ञंचापिमांविद्धिसर्वक्षेत्रेषुभारतेत्येवंजातीयकेति अत्रोच्यते॥ नसूत्रकृतासत्यभेदउक्तइतिभ्रांतिनिरासापेक्षत्यधिकरणोनिर स्यमपिचोद्यमुद्भाव्यनिरस्यति अत्र आहेत्यादिना॥

॥ ॥ ॥

तदुक्तरीत्यावस्तुतएकत्वमेवभेदस्तुकल्पितः सूक्ष्मत्वमनूद्यतेइत्याह सत्यमिति अर्भकमोकोयस्यसोर्भकौकाः तस्यभावस्तत्वंतस्मादार्थिकमल्पत्वं अणी-
यानित्यल्पत्ववाचकशब्देनापिश्रुतमित्याह स्वशब्देनेति। नायंदोषइत्युक्तंविवृणोति नतावदिति। कथमपिब्रह्मभावापेक्षयापीत्यर्थः परिच्छेदत्वा-

सत्यमेवैतत्परएवात्मादेहेंद्रियमनोबुद्ध्युपाधिभिः परिच्छिद्यमानोबालैः शारीरइत्युपचर्यते यथा घटकरकाद्युपाधि
वशादपरिच्छिन्नमपिनभः परिच्छिन्नवदवभासतेनद्वत् तदपेक्षयाच कर्मकर्तृत्वादिभेदव्यवहारोनविरुध्यतेभाक्
तत्त्वमसीत्यात्मैकत्वोपदेशग्रहणात्। गृहीतेत्वात्मैकत्वेबंधमोक्षादिसर्वव्यवहारपरिसमाप्तिरेवस्यात् अर्भकौक
स्त्वात्तद्व्यपदेशाच्चनेतिचेन्ननिचाय्यत्वादेवंव्योमवच्च अर्भकमल्पमोकोनीडंएषमे आत्मांतर्हृदयइतिपरिच्छिन्नाय
तनत्वात् स्वशब्देनचाणीयान् व्रीहेर्वायवाद्वेत्यणीयस्त्वव्यपदेशात्। शारीरएवाराग्रमात्रोजीवइहोपदिश्यते नसर्वगतः
परमात्मेति। यदुक्तंतत्परिहर्तव्यंअत्रोच्यते नायंदोषः नतावत्परिच्छिन्नदेशस्यसर्वगतत्वव्यपदेशः कथमप्युपपद्य-
ते सर्वगतस्यतुसर्वदेशेषुविद्यमानत्वात् परिच्छिन्नदेशव्यपदेशोपिकयाचिदपेक्षयासंभवति॥

गंविनाब्रह्मत्वासंभवात् नतत्यागेनब्रह्मणएवोपास्यत्वमायातीतिभावः॥ ॥श्रीरामजयरामजयजयरामः॥

॥ ॥ ॥

शिवाः परिच्छेदोक्तौ दृष्टांतमाह। यथासमस्तेति सर्वेश्वरस्यायोध्यायांस्थित्यपेक्षापरिच्छेदोक्तिवदल्पत्वहृदिध्येयत्वेन न तथोक्तिरित्यर्थः ननु किमिति हृदयमेव प्रायेणोच्यते तत्राह तत्रेति। हृदये परमात्मनो बुद्धिवृत्तिर्ग्राहिका भवति। अत ईश्वराभिव्यक्तिस्थानत्वात्तदुक्तिरित्यर्थः व्योमवद्दृष्टांता-

यथासमस्तवसुधाधिपतिरपि हि संनयोध्याधिपतिः इति व्यपदिश्यते कया पुनरपेक्षया सर्वगतः सन्नीश्वरोऽर्भकौका अणीयांश्च व्यपदिश्यत इति निचाय्यत्वादेवमिति ब्रूमः एवमणीयस्त्वादिगुणगणोपेत ईश्वरस्तत्र हृदयपुंडरीके निचाय्यो द्रष्टव्य उपदिश्यते। यथा शालग्रामे हरिस्तत्रास्य बुद्धिविज्ञानं ग्राहकं सर्वगतोपीश्वरस्तत्र तत्रोपास्यमानः प्रसीदति। व्योमवच्चैतद्द्रष्टव्यं यथा सर्वगतमपि व्योम मसूचीपाशाद्यपेक्षयार्भकौकाणीयश्च व्यपदिश्यते। एवं ब्रह्मापि तदेवं निचाय्यत्वापेक्षं ब्रह्मणोऽर्भकौकस्त्वमणीयस्त्वं च न पारमार्थिकं तत्र यदाशंक्यते हृदयायतनत्वात्। ब्रह्मणो हृदयानां च प्रतिशरीरं भिन्नत्वात् भिन्नायतनानां च शुकादीनामनेकत्वसावयवत्वानित्यत्वादिदोषदर्शनात्। ब्रह्मणोपि तद्वत् प्रसंग इति तदपि परिहृतं भवति संभोगप्राप्तिरिति चेन्न वैशेष्यात्॥ सिनाशंकालनापि काचित्छिन्नेत्याह तत्र यदाशंक्यत इत्यादिना भिन्नायतनत्वेपि व्योम्नः सत्यभेदाद्यभावादिति

ब्रह्मणोहार्दत्वे ऽनिष्टसंभोगापत्तेर्जीवएवहार्दउपास्यइतिशंकांव्याचष्टे व्योमवदिति। ब्रह्मभोक्तृस्यात् हार्दत्वेसतिचेतनत्वाज्जीवाभिन्नत्वाच्चजी
वचदित्युक्तंनिरस्यति नवैशेष्यादिति। धर्माधर्मवत्त्वमुपाधिरित्यर्थः अयमेवविशेषोवैशेष्यंस्वार्थेष्यञ् प्रत्ययः विशेषस्यातिशयोर्थोवाधर्मादिः

व्योमवत्सर्वगतस्यब्रह्मणः सर्वप्राणिहृदयसंबंधाच्चिद्रूपतयाचशारीरवदविशिष्टत्वात्सुखदुःखादिसंभोगोप्यविशिष्टः प्रसज्येत
एकत्वाच्चनहिपरस्मादात्मनोन्यः कश्चिदात्मासंसारीविद्यतेनान्योतोस्ति विज्ञातेत्यादिश्रुतिभ्यः तस्मात्परस्यैवब्रह्मणः संसार
संभोगप्राप्तिरितिचेत्। नवैशेष्यात् नतावत्सर्वप्राणिहृदयसंबंधाच्चिद्रूपतयाचशारीरवत्। ब्रह्मणः संभोगप्रसंगोवैशेष्यात्
विशेषोहिभवति। शारीरपरमेश्वरयोः एकः कर्ताभोक्ताधर्माधर्मसाधनः सुखदुःखादि मांश्च एकस्तद्विपरीतोपहतपाप्मत्वा-
दिगुणः एतस्मादनयोर्विशेषादेकस्यभोगोनेतरस्य यदिचसन्निधानमात्रेणवस्तुशक्तिमनाश्रित्यकार्यसंबंधोभ्युपगम्येताका
शादीनामपिदाहादिप्रसंगः सर्वगतानेकात्मवादिनामपिसमावेतौचोद्यपरिहारौयदप्येकत्वात् ब्रह्मणआत्मांतराभावात् शा-
रीरस्यभोगेनब्रह्मणोभोगप्रसंगः इत्यत्रवदामः इदंतावद्देवानांप्रियः प्रष्टव्यः कथमयंत्वयात्मांतराभावोध्यवसितइतितत्त्वम
स्यहंब्रह्मास्मिनान्योतोस्तिविज्ञातेत्यादिशास्त्रेभ्यइति॥

स्वाश्रयेफलहेतुत्वमतिशयः तस्मादितिसूत्रार्थं किंचविभवोबहवआत्मानइतिवा
दिनामेकस्मिन्देहे सर्वात्मनांभोक्तृत्वप्रसंगः स्वकर्मार्जितएवदेहेभोगइतिपरिहारश्चतुल्यइतिनवयंपर्यनुयोज्याइह सर्वगतेति। वस्तुतस्तेषामेवभोग
सांकर्यमित्यग्रेवक्ष्यते॥

ब्रह्मणोजीवाभिन्नत्वं श्रुत्याभिश्चित्यतेन भोक्तृत्वानुमाने उपजीव्यश्रुतिबाधमाह यथाशास्त्रमिति अर्धंमुखमात्रंजरत्याः श्रा याः कामयतेनांगानी तिसोयमर्धजरतीयन्यायः सचात्रनयुक्तः नत्वभेदमंगीकृत्याभोक्तृत्वंत्यक्तुंयुक्तं श्रुत्यैवाभेदसिध्यर्थंभोक्तृत्ववारणादित्याह शास्त्रंचेति नन्वेक त्वंमयाश्रुत्यानगृहीतंयेनोपजीव्यबाधस्यात्। किंतुत्वदुक्त्यागृहीतमित्याशंक्य बिंबप्रतिबिंबयोः कल्पितभेदेनभोक्तृत्वाभोक्तृत्वव्यवस्थोप

यथाशास्त्रंतर्हिशास्त्रीयार्थः प्रतिपत्तव्योनतत्रार्धजरतीयंलभ्यं शास्त्रंचतत्वमसीत्यपहतपाप्मत्वादिविशेषणंब्रह्मशारीरस्या त्मत्वेनोपदिशत् शारीरस्यैवतावदुपभोक्तृत्वंवारयति। कुतस्तदुपभोगेनब्रह्मणउपभोगप्रसंगः अथागृहीतंशारीरस्यब्रह्म- णैकत्वंतदामिथ्याज्ञाननिमित्तःशारीरस्योपभोगोनतेनपरमार्थरूपस्यब्रह्मणःसंस्पर्शोनहि बालैस्तलमलिनतादिभिर्व्यो- म्निविकल्प्यमानेतलमलिनतादिविशिष्टमेवपरमार्थतोव्योमभवतिसदाह। नवैशेष्यात्इतिनैकत्वेपिशारीरस्योपभोगेनब्र ह्मणउपभोगप्रसंगोवैशेष्यात्। विशेषोहिभवतिमिथ्याज्ञानसम्यक्ज्ञानयोःमिथ्याज्ञानकल्पितउपभोगःसम्यग्ज्ञानदृष्टमेकत्वंनच मिथ्याज्ञानकल्पितेनोपभोगेनसम्यक्ज्ञानदृष्टंवस्तुसंस्पृश्यते तस्मान्नोपभोगगंधोपिशक्यईश्वरस्यकल्पयितुं अत्ताचराचरग्र हणात् कठवल्लीषुपठ्यते॥ यस्यब्रह्मचक्षत्रंचोभेभवतओदनः मृत्युर्यस्योपसेचनंकइत्थावेदयत्रसइतिअत्रकश्चिदोदनोपसेचनसूचि तोत्ताप्रतीयते तत्रकिमग्निरत्तास्यादुतजीवोथवापरमात्मेतिसंशयः॥ पत्तेरप्रयोजकोहेतुरित्याह अथागृहीतमित्यादिनाकल्पितासंगित्वमधिष्ठा नस्यवैशेष्यमित्यस्मिन्नर्थेपिसूत्रंपातयतिनदाहेतिब्रह्मणोहार्दत्वेबाधकाभावात् शांडिल्यविद्यावाक्यंब्रह्मण्युपास्येसमन्वितमितिसिद्धं अत्ताचराचरग्रहणा त् यस्यब्रह्मक्षत्रादिजगदोदनोमृत्युः सर्वप्राणिमारकोपियस्योपसेचनंओदनसंस्कारकघृतप्रायःसोत्तायत्रशब्दैर्निर्व्यात्रिभेदकल्पनयावर्ततेतत्तुच्छंब्रह्मइत्थाइत्थं ईश्वरस्याप्यधिष्ठानभूतकोवेदविचारशब्दाध्यायोपायंविनाकोपिनजानातीत्यर्थः॥

संशयबीजमाह। विशेषेति सत्वमग्निंप्रब्रूहीत्यग्नेः येयंप्रेतेविचिकित्सेति। जीवस्यअन्यत्रधर्मादितिब्रह्मणःप्रश्नः लोकादिमग्निंतमुवाचेत्यग्नेः हं

विशेषानवधारणात्त्रयाणांचाग्निजीवपरमात्मनामस्मिन्ग्रंथेप्रश्नोपन्यासोपलब्धेः किंतावत्प्राप्तं अग्निरत्तेतिकु
तोग्निरन्नादइतिश्रुतिप्रसिद्धिभ्यांजीवोवाऽत्तास्यात्तयोरन्यःपिप्पलंस्वाद्वत्तीतिदर्शनात्। नपरमात्माऽनश्नन्नन्योअ-
भिचाकशीतीतिदर्शनादित्येवंप्राप्तेब्रूमः अत्तात्रपरमात्माभवितुमर्हति। कुतः चराचरग्रहणात्। चराचरंहिस्थाव-
रजंगमंमृत्यूपसेचनमिहाद्यत्वेनप्रतीयते तादृशस्यचाद्यस्यनपरमात्मनोन्यः कार्त्स्न्येनात्तासंभवति परमात्मातुवि
कारजातमुपसंहरन्सर्वमत्तीत्युपपद्यते। नन्विहचराचरग्रहणंनोपलभ्यते कथंसिद्धवच्चराचरग्रहणंहेतुत्वेनोपादी

ततइदंप्रवक्ष्यामीतिइतरयोःप्रतिवचनमुपलभ्यतइत्यर्थः पूर्वत्रब्रह्मणोभोक्तृत्वंनास्तीत्युक्तं तदुपजीव्यपूर्वपक्षयति किंतावदिति अग्निप्रकरणम-

तीतमित्यरुचेराहजानोतेति। पूर्वपक्षंजीवोपास्तिः सिध्धांतेनिर्विशेषब्रह्मज्ञानमितिफलभेदः ओदनशब्दोभोग्यवाचीतिपूर्वपक्षः सिध्धांतस्तु

यतेनैषदोषः मृत्यूपसेचनत्वेनसर्वस्यप्राणिनिकायस्यप्रतीयमानत्वात्। ब्रह्मक्षत्रयोश्चप्राधान्यात्प्रदर्शनार्थत्वोपपत्तेः यत्तुपरमात्मनोपिनात्तृत्वंसंभवति अनश्नन्नन्योअभिचाकशीतीतिदर्शनादिति अत्रोच्यतेकर्मफलभोगस्यप्रतिषेधकमेतद्दर्शनं। तस्यसंनिहितत्वात् नविकारसंहारस्यप्रतिषेधकंसर्ववेदांतेषुसृष्टिस्थितिसंहारकारणत्वेन ब्रह्मणःप्रसिध्दत्वात्। तस्मात्परमात्मैवेहात्ताभवितुमर्हति। प्रकरणाच्च इतश्चपरमात्मैवेहात्ताभवितुमर्हति। यत्कारणंप्रकरणमिदंपरमात्मनः नजायतेम्रियतेवाविपश्चिदित्यादिप्रकृतग्रहणंचन्याय्यंकइत्थावेदयत्रसइतिचदुर्विज्ञानत्वंपरमात्मलिंगं॥

ब्रह्मक्षत्रशब्दैरुपस्थापितकार्यमात्रगौण्याःओदनशब्दःगुणश्चात्रमृत्यूपसेचनवदेनसन्निधापितं प्रसिध्दौदनगतंविनाश्यत्वंगृह्यते गौणशब्दस्यसन्निहितगुणग्राहित्वात्। तथाचसर्वविनाश्यत्वेनभानाल्लिंगादीश्वरोत्तेत्याह। नैषदोषइति॥ ॥

तस्यसंनिहितत्वादिति पिप्पलंस्वाद्वत्तीतिभोगस्यपूर्वोक्तत्वादित्यर्थः। अत्रवाक्यानंतरवाक्यस्यापिज्ञेयात्मनिसमन्वयमाह। गुहामितिऋतम
वश्यंभाविकर्मफलंपिबंतौभुंजानौस्वकृतस्यकर्मणोलोकेकार्येदेहेपरस्यब्रह्मणोर्धस्थानमर्हतीतिपरार्ध्यंहृदयंपरमंप्रेष्ठं तस्मिन्यागुहानभो

गुहां प्रविष्टावात्मानौहितद्दर्शनात् कठवल्लीष्वेवपठ्यते। ऋतंपिबंतौसुकृतस्यलोकेगुहांप्रविष्टौपरमेपरार्ध्ये॥
छायातपौब्रह्मविदोवदंतिपंचाग्नयोयेचत्रिणाचिकेताइति। तत्रसंशयः किमिहबुद्धिजीवौनिर्दिश्येते उतजीवपरमा-
त्मानावितियदिबुद्धिजीवौततोबुद्धिप्रधानात्। कार्यकरणसंघातात् विलक्षणोजीवःप्रतिपादितोभवतितदपीहप्र
तिपादयितव्यं येयंप्रेतेविचिकित्सामनुष्ये अस्तीत्येकेनायमस्तीतिचैके एतद्विद्यामनुशिष्टस्त्वयाहंवराणामेषवरस्तृती-

रूपाबुद्धिरूपावातांप्रविश्यस्थितौस्छायातपवत्मिथोविरुद्धौतौचब्रह्मविदःकर्मिणश्चवदंतिपंचनाचिकेताग्निश्चितोयैस्तेत्रिणाचिकेताः तौपर

आ० भा० दंतीत्यर्थः नाचिकेतवाक्यानामध्ययनं तदर्थज्ञानं तदनुष्ठानं चेति विभित्त्वं बोध्यं बुध्यवच्छिन्नजीवस्य परमात्मनश्च प्रकृतत्वात्संशयमाह। तत्रेति म० टि० भा०
पूर्वोत्तरपक्षयोः फलं स्वयमेवाह। यदीत्यादिना तदपि जीवस्य बुद्धिवैलक्षण्यमपीत्यर्थः मनुष्ये प्रेते मृते सति ये यं विचिकित्सा संशयपरलोक
१४

यइति पृष्टत्वात् अथ जीवपरमात्मानौ ततो जीवो बाह्विलक्षणः परमात्मा प्रतिपादितो भवति तदपीहप्रतिपादयितव्यं अ
न्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात्कृताकृतात् अन्यत्र भूताच्च भव्याच्च यत्तत्पश्यसि तद्वदेति पृष्टत्वात् अत्राहाक्षेप्ता उभा
वप्येतौ पक्षौ न संभवतः कस्मात् ऋतपानं कर्मफलोपभोगः सुकृतस्य लोक इति लिंगात्। तच्चेतनस्य क्षेत्रज्ञस्य संभवति-
नाचेतनायाः बुद्धेः पिबंतौ छायातपौ इति द्विवचनेन द्वयोः पानं दर्शयति श्रुतिः अतो बुद्धिक्षेत्रज्ञपक्षस्तावन्न संभवति। अ
त एव क्षेत्रज्ञपरमात्मपक्षोऽपि न संभवति। चेतनेऽपि परमात्मनि ऋतपानासंभवात् अनश्नन्नन्यो अभिचाकशीतीति मंत्र
वर्णादिति

योक्ता अस्तीत्येके नास्तीत्यन्ये अतस्त्वयोप दि ष्टोऽहमेतदात्मतत्त्वं जानीयामित्यर्थः तदपीति परमात्मस्वरूपमपीत्यर्थः उभयोर्मोक्षे कृता योगेन सं १४
शयमाक्षिपति। अत्राहेति॥ ॥

छत्रिपदेन गंतार इव पिबत्पदेनाजहल्लक्षणया प्रविष्टौ उच्यते इत्याह। अत्रोच्यत इति। पानकर्तृवाचिपदेन पानानुकूलो वा लक्ष्याविल्याह। यद्वेति। नियतपूर्वभाविकृतिमत्त्वरूपमनुकूलत्वं कर्तृकारयित्रोः साधारणं यः कारयति स करोत्येवेति न्यायादिति भावः अत्र प्रकृतिर्मुख्यार्था प्रत्यये

अत्रोच्यते नैष दोषः छत्रिणो गच्छंतीत्येकेनापि छत्रिणा बहूनां छत्रित्वोपचारदर्शनात्। एवमेकेनापि पिबता द्वौ पिबंतौ उच्येते यद्वा जीवस्तावत्पिबति ईश्वरस्तु पाययति पाययन्नपि पिबतीत्युच्यते पाचयितर्यपि पक्तृत्वप्रसिद्धिदर्शनात् बुद्धिक्षेत्रज्ञपरिग्रहेऽपि संभवति करणे कर्तृत्वोपचारात् एधांसि पचंतीति प्रयोगदर्शनात् न चाध्यात्माधिकारेऽन्यौ कौचिद्द्वावृतं पिबंतौ संभवतः तस्माद्बुद्धिजीवौ स्यातां जीवपरमात्मानौ वेति संशयः॥

लक्षणामिश्रा स्वकृतिः प्रत्ययार्थो मुख्यः प्रकृत्या लजहल्लक्षणया पायनं लक्ष्यमित्याहुः पूर्वपक्षेऽपि बंताविति कर्तृवाचि शतृप्रत्ययेन बुद्धिजीवसाधारणं कारकत्वं लक्ष्यमित्याह बुद्धीति। एधांसि काष्ठानि पचंतीत्याख्यानेन कारकत्वं लक्ष्यं प्रकृतिस्तु मुख्यैवेति भावः मुख्यपातारौ प्रसिद्धपक्षिणौ ग्राह्याविल्यत आह नेति॥ ॥ ॥

भा० भा० ६

ब्रह्मक्षत्रपदस्यसान्निहितमृत्युपदात्। अनित्यवस्तुपरत्ववदिहापिपिबत्पदस्यसन्निहितगुहापदाद्बुद्धिजीवपरत्वेनिदर्शनेनपूर्वपक्षयति। किंतावदिति। गोचरः फलं एकस्मिन्जातिमतिक्रुश्सेसजातीयमेवद्वितीयंग्रात्यंव्यक्तिमात्रग्रहेलाघवात्। नविजातीयंजातिव्यक्त्युभयकल्पना

प्र० द्वि० पा०

किंतावत्प्राप्तं बुद्धिक्षेत्रज्ञाविति कुतः गुहांप्रविष्टाविति विशेषणात्। यदिशरीरंगुहायदिवाहृदयंउभयथापि बुद्धिक्षेत्रज्ञौगुहांप्रविष्टाउपपद्येते नचसतिसंभवेसर्वगतस्यब्रह्मणोविशिष्टदेशत्वंयुक्तंकल्पयितुं। सुकृतस्य लोकइतिकर्मगोचरानतिक्रमंदर्शयति। परमात्मातुनसुकृतस्यवादुष्कृतस्यवागोचरेवर्तते नकर्मणावर्धतेनो कनीयानितिश्रुतेः छायातपावितिचेतनाचेतनयोः निर्देशउपपद्यते छायातपवत्परस्परविलक्षणत्वात्। तस्मा द्बुद्धिक्षेत्रज्ञाविहोच्येयातामित्येवंप्राप्तेब्रूमः विज्ञानात्मपरमात्मानाविहोच्येयातां कस्मात् आत्मानौहितावुभावपि चेतनौसमानस्वभावौ॥

गौरवात् नचास्तुकारकत्वेनसजातीयाबुद्धिरेवजीवस्याद्वितीयेतिवाच्यं चेतनत्वस्यजीवस्वभावस्यका रकत्वादंतरंगत्वात्॥ ॥ ॥

६

तथाचलोकेद्वितीयस्यांतरंगस्यजानिमत्वदर्शनात् जीवस्याद्वितीयश्चेतनएवेतिसूत्रार्थमाह। संख्याश्रवणेचेतिगुहायांबुद्धेः स्थितंगव्हरेऽनेका

संख्याश्रवणेचसमानस्वभावेष्वेवल्लोकेप्रतीतिर्दृश्यते। अस्यगोर्द्वितीयोन्वेष्टव्यइत्युक्तेगौरेवद्वितीयोन्विष्यतेनाश्वः पुरुषोवातदिहऋतम्पानेनलिंगेननिश्चितेविज्ञानात्मनिद्वितीयान्वेषणायांसमानःस्वभावश्चेतनःपरमात्मैवप्रतीयते। ननूक्तंगुहाहितत्वदर्शनात्। नपरमात्माप्रत्येतव्य इति गुहाहितत्वदर्शनादेवपरमात्माप्रत्येतव्यइतिवदामः गुहा-हितत्वंतुश्रुतिस्मृतिष्वसकृत्परमात्मनएवदृश्यते गुहाहितंगव्हरेष्ठंपुराणं योवेदनिहितंगुहायांपरमेव्योमन् आत्मानमन्विच्छगुहांप्रविष्टंइत्याद्यासु सर्वगतस्यापिब्रह्मणः उपलब्ध्यर्थोदेशविशेषोपदेशोनविरुध्यतइत्येतदप्युक्तमेवसुकृतस्यलोकवृत्तित्वंतुछत्रित्ववदेकस्मिन् अपिवर्तमानमुभयोरविरुद्धंछायातपावित्यप्यविरुद्धंछायातपवत्परस्परविलक्षण त्वात्। संसारित्वासंसारित्वयोरविद्याकृतत्वात् संसारित्वस्यपारमार्थिकत्वाच्चासंसारित्वस्य तस्माद्विज्ञानात्मपरमात्मानौगुहांप्रविष्टौगृह्येते कुतश्चविज्ञानात्मपरमात्मानौगृह्येते॥

नर्थसंकुलेदेहेस्थितंपुराणमनादिपुरुषंनादित्वाद्दर्शी

कौजहातिपरमेश्रेष्ठेव्योमन् हार्दाकाशेयागुहाबुद्धिः तस्यांनिहितंब्रह्मयोवेदसोश्नुतेसर्वान्कामानित्यन्वयः अन्विच्छविचारयेत्यर्थः॥ ॥

शां॰भा॰ विशेषणंगंतृगंतव्यत्वादिकंलिंगमाह। विशेषणाच्चेतिसः जीवोध्वनः संसारमार्गस्य परमंपारंकिंतत्तद्विष्णोर्व्यापनशीलस्य परमात्मनः परंस्वरू भ॰टी॰
१० पमाप्नोतीत्यर्थः दुर्दर्शंदुर्ज्ञानंतत्रहेतुर्गूढंमाययावृतंमाययानुप्रविष्टंयस्माद्गुहाहितंगुहाद्वारागह्वरेष्ठंएवबाह्यगतमात्मानमध्यात्मयोगः स्थूल
सूक्ष्मकारणदेहलयक्रमेण प्रत्यगात्मनिचित्तसमाधानंतेनाधिगमोमहावाक्यजावृत्तिः तयाविदित्वेत्यर्थः ऋतंपानमंत्रेजीवानुवादेनवाक्या
र्थज्ञानायतत्पदार्थोब्रह्मप्रतिपाद्यतदुक्तमुपसंहरति। तस्मादिहेति। उक्तंन्यायमतिदिशतिएषइति द्वाद्वौछांदसौद्विवचनस्याकारः सुपर्णा

विशेषणाच्चविशेषणंचविज्ञानात्मपरमात्मनोरेवभवति आत्मानंरथितंविद्धिशरीरंरथमेवचेत्यादिनापरमेणग्रंथेनरथिरथादिरू
पककल्पनयाविज्ञानात्मानंरथिनंसंसारमोक्षयोर्गंतारंकल्पयति। सोध्वनःपारमाप्नोतितद्विष्णोः परमंपदमितिपरमात्मानंगंतव्यंक
ल्पयति। तथातंदुर्दर्शंगूढमनुप्रविष्टंगुहाहितंगह्वरेष्ठंपुराणं अध्यात्मयोगाधिगमेनदेवंमत्वाधीरोहर्षशोकौजहातीतिपूर्वस्मि
न्नपिग्रंथेमंतृमंतव्यत्वेनैतावेवविशेषितौप्रकरणंचेदंपरमात्मनः ब्रह्मविदोवदंतीतिचवक्तृविशेषोपादानंपरमात्मपरिग्रहे घ
टतेतस्मादिहजीवपरमात्मानौउच्येयातां एषएवन्यायोद्वासुपर्णासयुजासखायेत्येवमादिष्वपितत्रापिह्यध्यात्माधिकारान्न

विवक्षितेनैवयुज्यतेनियम्यनियामकभावेनेतिसयुजौसखायौचेतनत्वेनतुल्यस्वभावौसमानमेकंवृक्षंछेदनयोग्यंशरीरमाश्रित्यस्थितावित्य १०
र्थः गुहांप्रविष्टावितिनियावत्। एतावात्मानौतल्लिंगदर्शनादित्याह तयोरन्यइति॥ ॥

मनोब्रह्मेत्युपासीतेत्यत्रइतिपदस्यप्रत्ययपरत्वात्। इहचब्रह्मेत्यवाचेत्यनयेनइतिपदस्योक्तिसंबंधिनोर्थपरत्वाद्वैषम्यमितिसिद्धांतय
ति। परमेश्वरएवेति। वक्ष्यमाणसंवादस्तात्पर्यानुग्राहकइतिन्यायात्तुगृहीतास्याभ्यामात्मब्रह्मश्रुतिभ्योदृश्यत्वलिंगं बाध्यमित्याह। संयद्वा

परमेश्वरएवाक्षिण्यभ्यंतरः पुरुषइहोपदिष्टइतिकस्मादुपपत्तेः उपपद्यतेहिपरमेश्वरे गुणजातइहोप
दिश्यमानमात्मत्वंतावन्मुख्ययावृत्त्यापरमेश्वरउपपद्यतेसआत्मातत्त्वमसीतिश्रुतेः अमृतत्वाभयत्वेचत-
स्मिन्नसकृतश्रुतौश्रूयेते। तथापरमेश्वरानुरूपमेतदक्षिस्थानं यथाहिपरमेश्वरः सर्वदोषैरलिप्तोपहतपा
प्मादिश्रवणात्। तथाक्षिस्थानंसर्वलेपरहितमुपदिष्टं। तद्यद्यप्यस्मिन् सर्पिर्वोदकंवासिंचतिवर्त्मनीएव
गच्छतीतिश्रुतेः संयद्वामादिगुणोपदेशश्चतस्मिन्नवकल्प्यते। एतंसंयद्वामइत्याचक्षते। एतंहिसर्वाणिवा

मेति। वामानिकर्मफलान्येतमभिपुरुषमभिलक्ष्यसंयंतिउत्पद्यंते। सर्वफलोदयहेतुरित्यर्थः लोकानांफलदातृत्वमस्यैवेत्याह। वामनीरितिनयतिफला

निलोकान्भापयतीत्यर्थः भामानिभानामिनयत्ययमित्याह। भामनीरिति। सर्वार्थप्रकाशकइत्यर्थः स्थाननामरूपाणां भ्यानार्थंकृत्यंतरेव्यपदेशाद-

मान्यभिसंयंतिएषउएववामनीः एषहिसर्वाणिवामानिनयति एषउएवभामनीः एषहिसर्वेषुलोकेषुभातीतिच
अतउपपत्तेरंतरः परमेश्वरः स्थानादिव्यपदेशाच्च कथंपुनराकाशवत्सर्वगतस्यब्रह्मणोऽल्पंस्थानमुपपद्यते इत्य
त्रोच्यते। भवेदेषानवक्लृप्तिः यद्येतदेकमेवस्थानमस्यनिर्दिष्टंभवेत्। संतिहिअन्यान्यपिपृथिव्यादीनिस्थानान्यस्य
निर्दिष्टानियः पृथिव्यांतिष्ठन् इत्यादिना तेषुहिचक्षुरपिनिर्दिष्टं यश्चक्षुषितिष्ठन्निति स्थानादिव्यपदेशादित्यादि
ग्रहणेनैतद्दर्शयति नकेवलंस्थानमेवैकमनुचितंब्रह्मणोनिर्दिश्यते किंतर्हिनामरूपमित्येवंजातीयकमप्यनामरूप
स्यब्रह्मणोऽनुचितंनिर्दिश्यमानंदृश्यते। तस्योदितिनामरूपंहिरण्यश्मश्रुरित्यादि॥

क्षिणस्थान लोक्तिरत्रनदोषइतिसूत्रयो-
जना अनवक्लृप्तिः अक्लृप्तकल्पना तदाप्नाविद्य द्यत्रैवनिर्दिष्टंभवेदित्यन्वयः॥ ॥ ॥

विशेषणाद्वेत्याह। अनंतरेत्वेति अनीशयास्तस्येश्वरत्वाप्रतीत्यादेहेनिमग्नः पुरुषोजीवः शोचति। निमग्नपदार्थमाह। मुह्यमानइति। नरोहमिति-
भ्रांतइत्यर्थः जुष्टंध्यानादिनासेवितंयदाध्यानपरिपाकदशायां ईशमन्यंविशिष्टरूपाच्छिन्नंशोधितचिन्मात्रंप्रत्यक्त्वेनपश्यतितदास्यमहिमानंस्व

नग्नाकृतौसुपर्णावुच्येते तयोरन्यः पिप्पलंस्वाद्वत्तीतिअदनलिंगाद्विज्ञानात्माभवति अनश्नन्नन्योअभिचाकशीती
त्यनशनचेतनत्वाभ्यांपरमात्मा॥ अनंतरेचमंत्रेनावेवद्रष्टृद्रष्टव्यभावेनविशिनष्टिसमानेवृक्षेपुरुषोनिमग्नोऽनीशया
शोचतिमुह्यमानः जुष्टंयदापश्यत्यन्यमीशमस्यमहिमानमेतिवीतशोकइति। अपरआह द्वासुपर्णेतिनेयमृ-
गस्याधिकरणस्यसिध्दांतंभजते पैंगिरहस्यब्राह्मणेन्यथाव्याख्यातत्वात्। तयोरन्यःपिप्पलंस्वाद्वत्तीतिसत्वमन
श्नन्नन्योअभिचाकशीतीति। अनश्नन्नन्योभिपश्यतिज्ञस्तावेतौसत्वक्षेत्रज्ञावितिसत्वशब्दोजीवः क्षेत्रज्ञशब्दः परमा
त्मेतियदुच्यतेतत्तत्र सत्वक्षेत्रज्ञशब्दयोरंतः करणशारीरपरतयाप्रसिध्दत्वात्। तत्रैवव्याख्यातत्वात् तदेतत्सत्वं
येनस्वप्नंपश्यत्यथयोयंशारीरउपद्रष्टासक्षेत्र ज्ञस्तावेतौसत्वक्षेत्रज्ञावितिनाप्यस्याधिकरणस्यपूर्वपक्षंभजते न
ह्यत्रशारीरक्षेत्रज्ञंकर्तृत्वभोक्तृत्वादिनासंसारधर्मेणोपेतोविवक्ष्यतेकथंतर्हिसर्वसंसारधर्मातीतोब्रह्मस्वभावधर्मः

रूपमितिप्राप्नोतीव ततोवीतशोकोभवतीत्यर्थः द्वासुपर्णेति। वाक्यंजीवेश्वरपरंकृत्वाचिंतितं अधुनाकृत्वाचिंतामुद्धारयति अपरइति अन्यथा

बुद्धिविलक्षणत्वंपदत्वस्यपरत्वेनेत्यर्थः सत्वंबुद्धिः शंकते सत्वशब्दइति। बुद्धिर्जीवौनेत्पूर्वपक्षार्थः स्यादित्यतआह नापीति पूर्वपक्षार्थस्त-
दास्यात्।यद्यत्रबुद्धिभिन्नः संसारीनतिपद्येनतत्यत्रसंसारीविवक्ष्यते। किंतुशोधितस्त्वमर्थोब्रह्मेत्यर्थः श्रुतिस्मृतिभ्यश्चायमर्थोयुक्तोतिसो

श्चैतन्यमात्रस्वरूपोअनश्नन्नन्योअभिचाकशीतीति अनश्नन्नन्योभिपश्यतिज्ञइतिवचनात्। तत्वमसिक्षे
त्रज्ञंचापि मांविद्धीत्यादिश्रुतिस्मृतिभ्यश्चतावताचविद्योपसंहारदर्शनमेवमेवावकल्पते। तावेतौसत्वक्षे-
त्रज्ञौनहवाएवंविदिकिंचनरजआध्वंसतइत्यादि कथंपु नरस्मिन्पक्षेतयोरन्यः पिप्पलंस्वाद्वतीतिसत्वभि-
त्यचेतनेसत्वेभोक्तृत्ववचनमितिउच्यते नेयंश्रुतिरचेतनस्यसत्वस्यभोक्तृत्वंवक्ष्यामीतिप्रवृत्ताकिंतर्हिचेतनस्य
क्षेत्रज्ञस्याभोक्तृत्वं ब्रह्मस्वभावतांवक्ष्यामीति

षः॥ तावतायंमब्याख्यामात्रेणएवमेवजीवस्यब्रह्मत्वोक्तावेवनहिजीवो ११
बुद्धिभिन्नइतिविवेकमात्रेणोपसंहारोयुक्तः भेदज्ञानस्यभ्रांतित्वाद्वैफल्याच्चेतिभावः अविद्याविदुषाकिमपिस्वकार्यंनाध्वंसतेतेनसंपादयति

ज्ञानाग्निनास्त्वस्याएवदग्धत्वादित्यर्थः अविद्यानागच्छतीतिनिवार्यः जीवस्यब्रह्मत्वपरमिदंवाक्यमितिपक्षेशंकते। कथमिति। बुद्धेर्भोक्तृत्वोक्त्याव तात्पर्यात् नात्रयुक्तिश्चिंतयामनः स्वेदनीयमित्याह। उच्यतइतितदर्थं ब्रह्मत्वबोधनार्थंभोक्तृत्वमुपाधिमस्तके निक्षिपतीत्यर्थः वस्तुतोजीवस्य॥

तदर्थंसुखादिविक्रियावतिसत्वेभोक्तृत्वमध्यारोपयति। इदंहिकर्तृत्वंभोक्तृत्वंसत्वक्षेत्रज्ञयोरितरेतरस्वभावावि वेककृतंकल्प्यते परमार्थतस्तुनान्यतरस्यापिसंभवति। अचेतनत्वात्। सत्वस्याविक्रियत्वाच्च क्षेत्रज्ञस्याविद्याप्रत्युप स्थापितस्वभावत्वाच्चसत्वस्यसुतरांनसंभवतितथाचश्रुतिः। यत्रवान्यदिवस्यात्। तत्रान्योन्यत्पश्येदित्यादिनास्वप्नदृष्टहस्त्यादिव्यवहारवदविद्याविषयएवकर्तृत्वादिव्यवहारंदर्शयति। यत्रत्वस्यसर्वमात्मैवाभूत् तत्केनकंपश्येदित्यादिनाचविवेकेनकर्तृत्वाद्दिव्यवहाराभावंदर्शयति॥

भोक्तृत्वेभोक्तृत्वधीः कथमित्यतआह। इदंहीति। चित्तादात्म्येनकल्पिताबुद्धिः सुखादिरूपेणपरिणमतेबुध्यविवेकाच्चिदात्मनः सुखादिरूपवृत्तिः व्यक्तचैतन्यवत्वंभोक्तृत्वंभातीत्यर्थः भोक्तृत्वमाविद्यकंनवस्तुतइत्यत्रमानमाह। तथाचेति। यत्राविद्याकालेचैतन्यंभिन्नमिवभवतितदाद्रष्टृत्वादिकंनवस्तुनिज्ञातेइत्यर्थः तस्माद्दृतंपिबंतावितिवाक्यमेवगुहाधिकरणविषयइतिस्थितं॥

अंतरउपपत्तेः उपकोसलविद्यावाक्यमुदाहरति। यइति। तदक्षिस्थानमसंगित्वेन ब्रह्मणोऽनुरूपं यतोऽस्मिन्नक्षिसंवर्त्मनी पक्ष्मणी एव गच्छतीत्यर्थः दर्शनस्य लौकिकत्वशास्त्रीयत्वाभ्यां संशयमाह। तत्रेति। पूर्वत्र पिबंतावितिग्रंथमश्रुतत्वेतनत्वानुसारेण चरमश्रुताः गुहाप्रवेशाद्योनीताः तद्वदिहापि दृश्यतइति चाक्षुषत्वानुसारेणामृतत्वादयो ध्यानार्थं कल्पितत्वेन नेयाइति दृष्टांतेन पूर्वपक्षयति। छायात्मेति। पूर्वपक्षे

अंतरउपपत्तेः यएषोऽक्षिणि पुरुषो दृश्यत एष आत्मेति होवाचैतदमृतमभयमेतद्ब्रह्मेति तद्यद्यप्यस्मिन्सर्पिर्वोदकं वा सिंचति वर्त्मनी एव गच्छतीत्यादि श्रूयते तत्र संशयः किमयं प्रतिबिंबात्माऽध्यधिकरणो निर्दिश्यते अथवा विज्ञानात्मा उत देवतात्मेंद्रियस्याधिष्ठाता अथवेश्वर इति। किं तावत्प्राप्तं छायात्मा पुरुषप्रतिरूप इति कुतस्तस्य दृश्यमानत्वप्रसिद्धेः यएषोऽक्षिणि पुरुषो दृश्यत इति च प्रसिद्धवदुपदेशात्। विज्ञानात्मनो वायं निर्देश इति युक्तं। स हि चक्षुषा रूपं पश्यन् चक्षुषि सन्निहितो भवति। आत्मशब्दश्चास्मिन्पक्षेऽनुकूलो भवति। आदित्यपुरुषो वा चक्षुषोऽनुग्राहकः प्रतीयते रश्मिभिरेषोऽस्मिन्प्रतिष्ठित इति श्रुतेः अमृतत्वादीनां देवतात्मन्यपि कथंचित्संभवात्। नेश्वरः स्थानविशेषनिर्देशादित्येवं प्राप्ते ब्रूमः॥

प्रतिबिंबोपास्तिः सिध्दांते ब्रह्मोपास्तिरितिफलं प्रसिध्दवदिति चाक्षुषत्वेनेत्यर्थः संभावनामात्रेण पक्षांतरमाह। विज्ञानात्मन इत्यादिना। मनोब्रह्मेतिवत् एतद्ब्रह्मेतीति वाक्यस्येतिपदशिल्कत्वाद्। नस्वार्थपरत्वमिति पूर्वपक्षः॥ ॥ ॥ ९२

नन्वत्रुचितंबाहुल्योक्तिरसमाधानमित्याशंक्य युक्तिमाह। निर्गुणमपीति। प्रकरणादपिब्रह्मग्राह्यामित्याह। स्फुखविशिष्टेतिध्यानार्थमेदकल्प
नयास्फुखगुणविशिष्टस्यब्रह्मणः प्रकृतस्ययएषइति सर्वनाम्नाभिधानादंतरः परमात्मा इतिसूत्रार्थः ननुप्रकरणात्प्रबलेन दृश्यत्वलिंगेनोषस्था

निर्गुणमपिसद्ब्रह्मनामरूपगतैर्गुणैः सगुणमुपासनार्थंतत्रतत्रोपदिश्यतेइत्येतदप्युक्तमेवसर्वगतस्या
पिब्रह्मणउपलब्ध्यर्थंस्थानविशेषोनविरुध्यते। सालग्रामइवविष्णोरित्येतदप्युक्तमेव। स्फुखविशिष्टा
भिधानादेवच अपिचनैवात्रविवदितव्यं। किंब्रह्मास्मिन्वाक्येभिधीयतेनवेति स्फुखविशिष्टाभिधाना
देवब्रह्मत्वंसिध्दं स्फुखविशिष्टंहिब्रह्मयद्वाक्योपक्रमेप्रक्रांतंप्राणोब्रह्मकंब्रह्मखंब्रह्मेति। तदेवेहाभि
हितंप्रकृतपरिग्रहस्यन्याय्यत्वात्। आचार्यस्तुतेगतिंवक्तेतिचगतिमात्राभिधानप्रतिज्ञानात्।

पितः छायात्मासर्वनामार्थइत्यंतआह। आचार्यस्त्वितिउपकोसलोनामकश्चिद्ब्रह्मचारीजाबालस्याचार्यस्याग्नीन् द्वादशवत्सरान् परिचर्चा
स्तमनुपदिश्यदेशांतरगतेजाबालेगार्हपत्याद्यग्निभिर्दयया प्राणोब्रह्मेत्यात्मविद्यामुपदिश्योक्तं आचार्यस्त्वितितत्रात्मविद्याफल प्राप्तयेमार्गम ५१

र्चिरादिकं वदिष्यतीत्यर्थः पश्चादाचार्येणागत्य य एषोक्षिणीत्युक्त्वार्चिरादिका गतिरुक्ता। तथा चाग्निभिरुक्तात्मविद्यावाक्यस्य गतिवाक्येनैकवाक्य-
ता वाच्या सा च सर्वनाम्ना प्रकृतात्मग्रहे निर्वहतीत्येकवाक्यतानिर्वाहकं प्रकरणं वाक्यभेदकाल्लिङ्गाद्बलवदिति भावः श्रुतिं व्याचष्टे उच्यत इति प्रा-

कथं पुनर्वाक्योपक्रमे सुखविशिष्टं ब्रह्म विज्ञापयत इत्युच्यते। प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मेत्येतदग्नीनां वच
नं श्रुत्वोपकोसल उवाच विजानाम्यहं यत्प्राणो ब्रह्म कं च खं च न विजानामीति तत्रेदं प्रतिवचनं यद्वाव कं
तदेव खं यदेव खं तदेव कमिति॥ तत्र खंशब्दो भूताकाशे निरूढो लोके। यदि तस्य विशेषणत्वेन कंशब्दः
सुखवाची नोपादीयेत। तथा सति केवले भूताकाशे ब्रह्मशब्दो नामादिष्विव प्रतीकाभिप्रायेण प्रयुक्त
इति प्रतीतिः स्यात्। तथा कंशब्दस्य विषयेन्द्रियसंपर्कजनिते सामये सुखे प्रसिद्धत्वात्। यदि तस्य खंश

णः सूत्रात्मा बृहत्त्वाद्ब्रह्मेति यत्तज्ज्ञानामि कं विषयसुखं खं च। भूताकाशं ब्रह्मत्वेन ज्ञातुं न शक्नोमीत्यर्थः खं कथंभूतं। यत्कं तदेव खमिति सु- १४
खेन विशेषितस्य खस्य भूतत्वनिरासः॥ तथा कं कथंभूतं यत्खं तदेव कमिति विभुत्वेन विशेषितस्य कस्य जन्यत्वनिरास इति व्यतिरेकमुखेना
ह

तत्र खमित्यादिना। आत्मविद्येति। श्रुतिविरोधात् प्रतीकध्यानमत्रानिष्टमिति भावः सामयइति। आमयो दोषः साधनपारतंत्र्यानित्यत्वा-
दिः तत्सहितइत्यर्थः प्रत्येकग्रहणे दोषमुक्त्वा द्वयोर्ग्रहणे फलितमाह। इतरेतरेति विशेषितार्थकावित्यर्थः नन्वेकं ब्रह्मैवात्र ध्येयं चेद्ब्रह्मपदं
तरं किमर्थमित्यत आह। तत्रेति। विशेषणत्वेन खस्य भूतत्वव्यावर्तकत्वेनेत्यर्थः ब्रह्मशब्दः शिरो ययोस्तत्त्वमिति विग्रहः अध्येयत्वे को-

द्वो विशेषणत्वेन नोपादीयेत। लौकिकं सुखं ब्रह्मेति प्रतीतिः स्यात्। इतरेतरविशेषितौ तु कंखंशब्दौ सुखात्मकं ब्रह्म गमय-
तः तत्र द्वितीये ब्रह्मशब्दे नुपादीयमाने कं खं ब्रह्मेत्येवोच्यमाने कंशब्दस्याविशेषणत्वेनैवोपयुक्तत्वात्सुखस्य गुणस्याध्ये-
यत्वं स्यात्। तन्माभूदित्युभयोः कंखंशब्दयोः ब्रह्मशब्दशिरस्त्वं कं ब्रह्म खं ब्रह्मेति। इष्टं हि सुखस्यापि गुणस्य गुणिवद्ध्येय
त्वं वाक्योपक्रमे सुखविशिष्टं ब्रह्मोपदिष्टं प्रत्येकं च गार्हपत्यादयोग्नयः स्वं स्वं महिमानमुपदिश्यैषा सोम्य तेस्माद्विद्यात्मविद्या
चेत्युपसंहरंतः पूर्वत्र ब्रह्म निर्दिष्टमिति ज्ञापयंति॥ दोषस्तत्राह। इष्टं हीति मार्गोक्त्या सगुणविद्यात्वावगमादिति भावः आत्मविद्या
देनोपसंहारादपि प्रकृतं ब्रह्मेत्याह प्रत्येकं चेति। पृथिव्यग्निरन्नमादित्य इति मम च तस्य स्तनवोविभूतिरिति गार्हपत्य उपदिदेश। आपो दि
शो नक्षत्राणि चंद्रमा इति अन्वाहार्यपचन उवाच प्राण आकाशो द्यौर्विद्युदिति स्वमहिमानमाह वनीयो जगादेति विभागः एषमस्माकमग्नीनां वि-
द्या प्रत्येकमुक्ता आत्मविद्या तु पूर्वमस्माभिर्मिलिता प्राणो ब्रह्मेत्युक्तेत्यर्थः॥ ॥ ॥

उच्यतामग्निभिर्ब्रह्म छायात्मा गुरुणोच्यतां वक्तृभेदादिति तत्राह। आचार्यस्त्विति। एकवाक्यतानिश्चयाद्वक्तृभेदे पि नार्थभेद इत्यर्थः श्रुतोप-
निषत्काउपनिषद्रहस्यं सगुणब्रह्मोपासनं येन तस्य या गतिः श्रुतौ स्मृतौ च प्रसिद्धा तस्या अत्राभिधानात्। लिंगादिति सूत्रार्थमाह। इतश्चे-
ति यस्मात्तस्य तेत स्मादिहेत्यन्वयः श्रुतिमाह। अथेति। देहपातानंतरमित्यर्थः स्वधर्मस्तपः तपो ब्रह्मचर्यं श्रद्धा विद्याभिः आत्मानं ध्या-

आचार्यस्तु ते गतिं वक्तेति गतिमात्राभिधानप्रतिज्ञानमर्थांतरविवक्षां वारयति। यथा पुष्करपलाश आपो न श्लि-
ष्यंत एवमेवंविदि पापं कर्म न श्लिष्यत इति चाक्षिस्थानं पुरुषं विजानतः पापेनानुपघातं ब्रुवन्नक्षिस्थानस्य पुरुष
स्य ब्रह्मत्वं दर्शयति। तस्मात्प्रकृतस्यैव ब्रह्मणो क्षिस्थानतां संयद्वामादिगुणतां चउक्त्वार्चिरादिकां तद्विदो गतिं व
क्ष्यामीत्युपक्रमते। य एषो क्षिणि पुरुषो दृश्यत। एष आत्मेति होवाचेति। श्रुतोपनिषत्कगत्यभिधानाच्च। इत-
श्चाक्षिस्थानः पुरुषः परमेश्वरो यस्मात् श्रुतोपनिषत्कस्य श्रुतरहस्यविज्ञानस्य ब्रह्मविदो या गतिर्देवयानाख्या प्रसि
द्धा श्रुतावथोत्तरेण तपसा ब्रह्मचर्येण श्रद्धया विद्ययात्मानमन्विष्यादित्यमभिजयंते। एतद्वै प्राणानामायतनमेतद

त्वा तया ध्यानविद्ययोत्तरं देवयानमार्गं प्राप्य तेनोत्तरेण पथा आदित्यद्वारा सगुणब्रह्मस्थानं गच्छंति एतद्वै ब्रह्म प्राणानां व्यष्टिसमष्टिरूपाणामाय
तनं लिंगात्मकं हिरण्यगर्भरूपं वस्तुतस्त्वेतदमृतादिरूपं निर्गुणं सर्वाधिष्ठानं अतः कार्यं ब्रह्म प्राप्य तत्स्वरूपं निर्गुणं ज्ञात्वा मुच्यंत इत्यर्थः अ-

ग्निरेवज्योतिर्देवताएवमहराद्यादेवताएवस्मृतौउक्ताः॥ अस्मिन्नुपासकेमृतेसति। यदिपुत्रादयः शव्यंशवसंस्कारादिकंकुर्वंतियदिचनकुर्वं
तिउभयथाप्युपास्तिमहिम्नार्चिरादिदेवानुक्रमेणगच्छंति। अर्चिषमग्निंततोहरन्हः शुक्लपक्षंततउत्तरायणंतस्मात्संवत्सरंततोदेवलोकंततो

मृतमभयमेतत्परायणमेतस्मान्नपुनरावर्ततइति। स्मृतावपिअग्निर्ज्योतिरहः शुक्लः षण्मासाउत्तरायणंतत्रप्रयाता
गच्छंतिब्रह्मब्रह्मविदोजनाइतिसैषेहाक्षिपुरुषविदोभिधीयमानादृश्यते॥ अथयदुचैवास्मिन्शव्यंकुर्वंतियदिचन
तेर्चिषमेवाभिसंभवंतीन्युपक्रम्यादित्याच्चंद्रमसंचंद्रमसोविद्युतंतत्पुरुषोमानवः सएनान्ब्रह्मगमयत्येषदेवपथो
ब्रह्मपथश्चएतेनप्रतिपद्यमानाइमंमानवमावर्तंनावर्तंतइति। तदिहब्रह्मविद्विषयप्रसिद्ध्ययागत्याक्षिस्थानस्यब्र
ह्मत्वंनिश्चीयते। अनवस्थितेरसंभवाच्चनेतरः यत्पुनरुक्तंछायात्माविज्ञानात्मादेवतात्मावास्यात्। अक्षिस्थानइत्य-
त्रोच्यते। नछायात्मादिरिहग्रहणमर्हतिकस्मादनवस्थितेः नतावच्छायात्मनश्चक्षुषिनित्यमवस्थानंसंभवति॥

वायुंवायोरादित्यंततश्चंद्रमसंचंद्राद्विद्युतंगत्वातत्रविद्युल्लोकेस्थितानुपासकान्मानवः पुरुषोब्रह्मलोकादागत्यकार्यंब्रह्मलोकंप्रापयति
एषोर्चिरादिभिर्देवैर्विशिष्टोदेवपथः गंतव्येनब्रह्मणायोगात्ब्रह्मपथश्च तएतेनकार्यंब्रह्मप्रतिपद्यमानाउपासकाइमंमानवंमनोः सर्गं
आवर्तंजन्ममरणावृत्तिरूपंनावर्तंतेनागच्छंतीत्यर्थः॥ ॥ ॥

चक्षुरासीदतीतिउपगच्छतीत्यर्थः अनवस्थितस्योपास्यत्वंसदानसिध्यतीतिभावः किंचाव्यवधानात्साक्षिस्थउपास्यः नचतस्य स्वचक्षुषादर्शनं
संभवतीत्याह। यएषइति। अस्तुतर्हिपरेणदृश्यमानस्योपास्तिरित्यतआह। नचेतिकल्पनागौरवादित्यर्थः युक्तिसिध्यानवस्थितत्वेश्रु तिभा

यदैवहिकश्चित्पुरुषश्च क्षुरासीदति तदाचक्षुषिपुरुषच्छायादृश्यते ऽपगतेतस्मिन्नदृश्यतेयएषोक्षिणिपुरुषइतिश्रु
तिः सान्निधानात्स्वचक्षुषिदृश्यमानंपुरुषमुपास्यत्वेनोपदिशति। नचसउपासनाकालेच्छायाकरं कंचित्पुरुषंचक्षुः समी
पेसन्निधाप्योपास्तइतियुक्तंकल्पयितुं अस्यैवशरीरस्यनाशमन्वेषनश्यतीतिश्रुतिश्छायात्मनोनवस्थितत्वंदर्शयति।
असंभवाच्च। तस्मिन्नमृतत्वादीनांगुणानांनच्छायात्मनिप्रतीतिः तथाविज्ञानात्मनोपिसाधारणेकृत्स्नशरीरेंद्रियसंबंधेस नि
चक्षुष्येवावस्थितत्वंवक्तुंनशक्यंब्रह्मणस्तुव्यापिनोपिदृष्टः उपलब्ध्यर्थोहृदयादिदेशविशेषसंबंधः समानश्चविज्ञानात्म
न्यप्यमृतत्वादीनांगुणानामसंभवः यद्यपिविज्ञानात्मापरमात्मनोनन्यएव। तथाप्यविद्याकामकर्मकृतंतस्मिन्मर्त्यत्वमध्या
रोपितंभयंचेत्यमृतत्वाभयत्वेनोपपद्येते। संयद्वामत्वादयश्चतस्मिन्ननैश्वर्यादनुपपन्नाएवदेवतात्मनस्तुरश्मिभिरेषोस्मि

ह। अस्येति। छायाकरस्याबिंबस्यनाशमदर्शनमनुसत्यैषछायात्मानश्यतीत्यर्थः जीवंनिरस्यातितथेति। आसंधस्याप्यहमित्यविशेषणजी
वस्याभिव्यक्तेश्चक्षुरेवस्थानमित्ययुक्तमित्यर्थः दृष्टइतिश्रुताविति शेषः॥ ॥ ॥

ननुचक्षोः सूर्योअजायतसूर्यस्तमितीतिवाक्यं अमरादेवाइतिप्रसिद्धिबाधितमित्याशंक्याह। अमरत्वमपीति। भीषाभयेनास्मादीश्वराद्वायुश्चलतिअ
ग्निश्चेंद्रश्चस्वस्वकार्यंकुरुतः उक्तापेक्षयापंचमोमृत्युः समाप्तायुषांनिकटेधावतीत्यर्थः ईश्वरपक्षेदृश्यतइत्ययुक्तं तत्राह। अस्मिन्निति दर्शनमनुभवः

प्रतिष्ठितइतिश्रुतेः यद्यपिचक्षुष्यवस्थानंस्यात्। तथाप्यात्मत्वंतावन्नसंभवतिपराग्रूपत्वात्। अमृतत्वादयो
पिनसंभवंतिउत्पत्तिप्रलयश्रवणात्॥ अमरत्वमपिदेवानांचिरकालावस्थानापेक्षमैश्वर्यमपिपरमेश्वरायत्तं
नस्वाभाविकं। भीषास्माद्वातः पवतेभीषोदेतिसूर्यः भीषास्मादग्निश्चेंद्रश्चमृत्युर्धावतिपंचमइतिमंत्रवर्णात्। त
स्मात्परमेश्वरएवायमक्षिस्थानः प्रत्येतव्यः अस्मिंश्चपक्षेदृश्यतइतिप्रसिद्धवदुपादानंशास्त्राद्यपेक्षंविद्वद्विषयंप्र-
रोचनार्थइतिव्याख्येयं। अंतर्याम्यधिदैवादिषुतद्धर्मव्यपदेशात्। यइमंचलोकंपरंचलोकंसर्वाणिभूतान्यंतरोयम
यतीत्युपक्रम्यश्रूयतेयः पृथिव्यांतिष्ठन्। पृथिव्याअंतरोयंपृथिवीनवेदयस्यपृथिवीशरीरंयः पृथिवीमंतरोयमयत्ये
षतआत्मांतर्याम्यमृतइत्यादि॥

तस्यशास्त्रेश्रुतस्यशास्त्रमेवकरणंकल्प्यंसन्निधानात्। तथाचशास्त्रकरणकोविद्वदनुभवउ-
पासनारूढस्यर्थउच्यतइत्यर्थः तस्मादुपकोसलविद्यावाक्यमुपास्येब्रह्मणिसमन्वितमितिसिद्धं। अंतर्याम्यधिदैवादिषुतद्धर्मव्यपदेशात् बृहदा
रण्यकवाक्यमुदाहरतियइति॥ ॥ ॥ ॥

अंतर्यामिब्राह्मणेप्रतीयमानार्थमाह। अत्रेति। यःपृथिव्यामित्यादिना देवताः पृथिव्याद्या अधिकृत्ययमयिताश्रूयतेतथायः सर्वेषुलोकेष्विति अधिलोकंयः सर्वेषु वेदेष्वि त्यधिवेदंयः सर्वेषु यज्ञेष्वित्यधियज्ञंयः सर्वेषु भूतेष्वित्यधिभूतंयः प्राणेतिष्ठन्नित्यादियआत्मनीत्यंतमध्यात्मंचे- तिविभागः अशरीरस्यानियंतृत्वसंभवासंभवाभ्यांसंशयः पूर्वत्रेश्वरस्याक्षिस्थानत्वसिध्द्येपृथिव्यादिस्थाननिर्देशोदृष्टांतउक्तस्तस्यदृष्टां

अत्राधिदैवतमधिलोकमधिवेदमधियज्ञमधिभूतमध्यात्मंचकश्चिदंतरवस्थितोयमयितांतर्यामीतिश्रूयते सकिमधि दैवाद्यभिमानीदेवतात्माकश्चित्। किंवाप्राप्ता ऽणिमाद्यैश्वर्यः कश्चिद्योगी किंवापरमात्मा किंवार्थांतरंकिंचिदित्यपूर्व संज्ञादर्शनात्संशयः किंतावन्नः प्रतिभातिसंज्ञायाअप्रसिध्दत्वात्। संज्ञिनाप्यप्रसिध्देनार्थांतरेणकेनचिद्भवितव्यमि ति। अथवानानिरूपितरूपमर्थांतरंशक्यमस्तीत्यभ्युपगंतुंअंतर्यामिशब्दश्चांतर्यमनयोगेनप्रवृत्तोनात्यंतमप्रसिध्दः तस्मात्पृथिव्याद्यभिमानीकश्चिद्देवोंतर्यामीस्यात्। तथाचश्रूयते। पृथिव्येवयस्यायतनमग्निर्लोकोमनोज्योतिरित्यादिस चकार्यकरणवत्वात्पृथिव्यादीनंतस्तिष्ठन्यमयतीति। यक्तंदेवतात्मनोयमयितृत्वं॥ तवाक्यस्येश्वरपरत्वमत्राक्षिप्यसमाधी यतइत्याक्षेपसंगतिः अतः पूर्वफलेनास्यफलवत्वं। अवांतरफलंतुपूर्वपक्षेऽनीश्वरोपास्तिः सिध्दांतेप्रत्यग्ब्रह्मज्ञानमितिमंतव्यं स्वयमेवारुचिं वदन्पक्षांतरमाह। अथवेति। अनिश्चितार्थेफलाभावेनाफलस्यवेदार्थत्वायोगादितिभावः तथाचश्रूयतेयस्यदेवस्यायतनंशरीरंलोक्यतेनेनेति लोकश्चक्षुर्ज्योतिः सर्वार्थप्रकाशकंमनइत्यर्थः॥ १७

उपक्रमादिनांतर्याम्यैक्यनिश्चयादनेकदेवपक्षोनयुक्त इत्यरुचेराह। योगिनोवेति। आगंतुकसिद्धस्यांतर्यामित्वे ऽसिद्धसाधनकल्पनागौरवात्। नित्यसिद्धएवांतर्यामीतिसिद्धांतयति। एवंभास्करभि देवतानिरासेहेत्वंतरमाह। यंपृथिवीति। ईश्वरेणनियंता ऽशरीरत्वात्। घटवदित्युक्तंनिरस्यतिनैषदोषइति नियम्यातिरिक्तशरीरशून्यत्वंवाहेतुः शरीरासंबंधित्वंवा आद्येकार्यकरणसंघातात्मकोदेहोग्राह्यः तेनलिंगदेहस्य

योगिनोवाकस्यचित्सिद्धस्यसर्वानुप्रवेशेनयमयितृत्वंस्यात्। ननुपरमात्मामनीयिताकार्यकरणवत्वादित्येवंप्राप्तेइदमुच्यते। योंतर्याम्यधिदैवादिषुश्रूयंतेसपरमात्मैवस्यात्। नान्यइतिकुतस्तद्धर्मव्यपदेशात्। तस्यहिपरमात्मनोधर्माइहनिर्दिश्यमानादृश्यंते। पृथिव्यादितावदधिदैवादिभेदभिन्नंसमस्तंविकारजातमंतस्तिष्ठंन्यमयतीतिपरमात्मनोयमयितृत्वंधर्मउपपद्यतेसर्वविकारकारणत्वेसतिसर्वशक्त्युपपत्तेः एषतआत्मांतर्याम्यमृतइतिचात्मत्वामृतत्वेमुख्येपरमात्मनउपपद्येतेयंपृथिवीनवेदेतिचपृथिवीदेवतायाअविज्ञेयमंतर्यामिणंब्रुवन् देवतात्मनोन्यमंतर्यामिणंदर्शयतिपृथिवीदेवताह्यहमस्मिपृथिवीत्यात्मानंविजानीयात्। तथादृष्टोश्रुतइत्यादिव्यपदेशोरूपादिविहीनत्वात् परमात्मनउपपद्यतइतियत्त्वकार्यकरणस्यपरमात्मनोयमयितृत्वंनोपपद्यतइतिनैषदोषः यान्नियच्छतितत्कार्यकरणैरेवतस्यकार्यकरणवत्वोपपत्तेः॥ व्याहन्तिः स्वदेहनियंतरिजीवेव्यभिचारः द्वितीयस्त्वसिद्धः ईश्वरस्यस्वाविद्योपार्जितसर्वसंबंधित्वादित्याह। यान्नियच्छतीतिसशरीरोनियंतेतिलोकदृष्टिमनुसृत्यैतदुक्तंवस्तुत-

स्कृचेतनसान्निध्याज्जडस्यव्यापारोनियमनंनत्वत्तिमत्वंनियंतृत्वंनचाचिंत्यमायाशक्तेश्चिदात्मनःशरीरंविनैवोपपन्नं॥ ननुदेहनियंतुर्जीव स्यान्योनियंताचेत्तस्याप्यन्यइत्यनवस्थेत्यतआह। तस्यापीति। निरंकुशंसर्वनियंतृत्वंईश्वरस्यश्रुतंतस्यनियंत्रंतरानुमानेश्रुतिबाधइतिभा

तस्याप्यन्योनियंतेत्यनवस्थादोषश्चनसंभवति। भेदाभावात् भेदेहिसत्यनवस्थादोषोपपत्तिः त-स्मात्परमात्मैवांतर्यामी नचस्मार्तमतद्धर्माभिलापात् स्यादेतददृष्टत्वादयोधर्माः सांख्यस्मृतिकल्पि तस्यप्रधानस्याऽभ्युपपद्यंतेरूपादिहीनतयातस्यतैरभ्युपगमात्। अप्रतर्क्यमविज्ञेयंप्रसुप्तमिव सर्वतइतिहिस्मरंति। तस्यापिनियंतृत्वंसर्वविकारकारणत्वादुपपद्यते। तस्मात्प्रधानमंतर्यामिशब्दं स्यात्। ईक्षतेर्नाशब्दमित्यत्रनिराकृतमपिसत्प्रधानमिहादृष्टत्वादिव्यपदेशसंभवेनपुनराशंक्यते। ततउत्तरमुच्यते। नचस्मार्तंप्रधानमंतर्यामिशब्दंभवितुमर्हति। कस्मादतद्धर्माभिलापात्। यद्यप्य

नवस्थेत्यर्थः यद्वाईश्वरान्येदकल्पनयाजीवस्यनियंतृत्वोक्तेः सत्यभेदाभावात्नानवस्थेत्यर्थः प्रधानंमहदादिक्रमेणकथंप्रवर्ततइतितर्कै

स्याविषयइत्याह। अप्रतर्क्यमिति। रूपादिहीनत्वादविज्ञेयंसर्वतोदिक्षप्रसुप्तमिवतिष्ठतिजडत्वादित्यर्थः अनदप्रधानंचेतनंतस्यधर्मा-
णामभिधानादिति हेत्वर्थः। उत्तरसूत्रनिरस्यांशं कामाह। यदिप्रधानमित्यादिना॥ अमृतश्चेति। विनाशिनोदेहांतरभोगानुपपत्तेरित्यर्थः

दृष्टत्वादिव्यपदेशाः प्रधानस्यसंभवंति। तथापिनद्रष्टृत्वादिव्यपदेशः संभवतिप्रधानस्याचेतनत्वे
नतैरभ्युपगमात्। अदृष्टोद्रष्टाश्रुतः श्रोतामतोमंताविज्ञातोविज्ञातेतिहिवाक्यशेषः इहभवति
आत्मत्वमपिनप्रधानस्योपपद्यते। यदिप्रधानमात्मत्वद्रष्टृत्वाद्यसंभवान्नांतर्याम्यभ्युपगम्यते
शारीरस्तर्ह्यंतर्यामीभवतुशारीरोहिचेतनत्वाद्द्रष्टाश्रोतामंताविज्ञाताचभवत्यात्माचप्रत्यक्त्वा
त्॥ अमृतश्चधर्माधर्मफलोपभोगोपपत्तेः अदृष्टत्वादयश्चधर्माः शारीरेप्र सि द्धाः दर्शनादि
क्रियायाः कर्तरिप्रवृत्तिविरोधात्। नदृष्टेर्द्रष्टारंपश्येदित्यादिश्रुतिभ्यश्च तस्यचकार्यकरणसं

यथादेवदत्तकर्तृकगमनक्रियायाः ग्रामः कर्मनदेवदत्तस्तथात्मकर्तृकदर्शनादिक्रियायाअनात्माविषयः नत्वात्माक्रियायाकर्तृविषय

त्वायोगादित्याह। कर्तरीति। क्रियायांगुणः कर्ताप्रधानंकर्मतत्रैकस्यांक्रियायामेकस्यगुणत्वप्रधानत्वयोर्विरोधात्। नकर्तुःकर्मत्वमि
त्यर्थः दृष्टेर्द्रष्टारमात्मानंतयादृश्ययादृष्ट्यानविषयीकुर्यादित्यादिश्रुतेश्चादृष्टत्वादिधर्माःशारीरस्येत्याह। नेति अपिशब्दसूचितंहेतु

घातमंतर्यमयितुंशीलंभोक्तृत्वात् तस्माच्छारीरोंतर्यामीत्यनउत्तरंपठंति।। शारीरश्चोभयेपिहिभेदेनैनमधी
यते। नेतिपूर्वसूत्रादनुवर्तते। शारीरश्चनांतर्याम्युच्यते। कस्माद्यद्यपिद्रष्टृत्वादयोधर्मास्तस्यसंभवंति। तथापि
घटाकाशवदुपाधिपरिच्छिन्नत्वात्नकार्त्स्न्येनपृथिव्यादिष्वंतरवस्थातुंनियंतुंचशक्नोति अपिचोभयेपिहिशा
खिनः काण्वामाध्यंदिनाश्चांतर्यामिणोभेदेनैनंशारीरंपृथिव्यादिवदधिष्ठानत्वेननियम्यत्वेनचाधीयते योविज्ञा
नेतिष्ठन्निति काण्वाः यआत्मनितिष्ठन्निति माध्यंदिनाः यआत्मनितिष्ठन्नित्यस्मिंस्तावत्पाठेभवत्यात्मशब्दःशा
रीरस्यवाचकः योविज्ञानेतिष्ठन्नित्यस्मिन्नपिपाठेविज्ञानशब्देनशारीरउच्यते विज्ञानमयोहिशारीरः तस्माच्छा
रीरादन्यईश्वरोंतर्यामीतिसिद्धं कथंपुनरेकस्मिन्देहेद्वौद्रष्टारौउपपद्येते। यश्चायमीश्वरोंतर्यामीयश्चायमितरःशा १९
रीरः।।

सूत्राकांक्षितंहेतुमाह। अपिचोभयेपीति। भेदेनेतिसूत्रांशस्तात्विकभेदभ्रांतिंनिरसितुंशंकते। कथमिति।। ॥

नन्वत्रैकेभोक्ताजीवः ईश्वरस्त्वभोक्तेतिनविरुद्धइतिशंकते कापुनरिति। तयोर्भेदः श्रुतिविरोधइतिपूर्ववाद्याहनान्योतोस्तीति। सएवश्रुत्यर्थमाह। अत्रेति श्रुतेरर्थांतरमाशंक्यनिषेधति। नियंत्रंतरेत्यादिना नकेवलमप्रसक्तप्रतिषेधः किंत्वविशेषेणद्रष्ट्रंतरनिषेधश्रुतेरंतर्याम्यंतरनिषेधार्थत्वेबाधश्चेत्याह

कापुनरिहानुपपत्तिः नान्योतोस्तिद्रष्टेत्यादिश्रुतिवचनंविरुध्येत अत्रहिप्रकृतादंतर्यामिणोन्यंद्रष्टारंश्रोतारं मंतारंविज्ञातारंचात्मानंप्रतिषेधतिनियंत्रंतरप्रतिषेधार्थमेतद्वचनमितिचेन्ननियंत्रंतराप्रसंगात्। अविशेषश्रवणाच्च। अत्रोच्यते। अविद्याप्रत्युपस्थापित कार्यकरणोपाधिनिमित्तोयंशारीरांतर्यामिणोर्भेदव्यपदेशोनपारमार्थिकः। एकोहिप्रत्यगात्माभवति। नद्वौप्रत्यगात्मानौसंभवतः एकस्यैवतुभेदव्यवहारउपाधिकृतः यथाघटाकाशोमहाकाशइति। ततश्चज्ञातृज्ञेयादिभेदश्रुतयः प्रत्यक्षादीनिचप्रमाणानिसंसारानुभवो

अविशेषेति। तस्मात्सूत्रेयआत्मनितिष्ठन्नितिश्रुतौचद्रष्टृभेदोक्तिरयुक्तानान्यइतिवाक्यशेषेभेदनिरासादितिप्राप्तेभेदः उपाधिकल्पितः श्रुतिसूत्राभ्यामनूद्यतइतिसमाधत्ते। अत्रोच्यतइतिभेदःसत्यः किंनस्यादित्यतआह। एकोहीतिगौरवेणद्वयोरहंधीगोचरत्वासंभवात्। एकएवतद्गोचरः।

तद्गोचरस्य घटवदनात्मत्वान्नात्मभेदः सत्यइत्यर्थः ततश्चेतिकल्पितभेदांगीकारात् भेदापेक्षंसर्वंयुज्यतइत्यर्थः तस्मादंतर्यामिब्राह्मणंज्ञेयेब्रह्मणि समन्वितमितिसिद्धं। अदृश्यत्वादिगुणकोधर्मोक्तेः॥मुंडकवाक्यमुदाहरति। अथेतिकर्मविद्यारूपापरविद्योक्त्यनंतरंययानिर्गुणंज्ञायते परांसोच्यते-

विधिप्रतिषेधशास्त्रंचेतिसर्वमेतदुपपद्यते। तथाचश्रुतिः यत्रहिद्वैतमिवभवति। तदितरइतरंपश्यतीत्यविद्या विषयेसर्वव्यवहारंदर्शयति। यत्रत्वस्यसर्वमात्मैवाभूत्तत्केनकंपश्येदिति विद्याविषयेसर्वव्यवहारंवारयति।अ दृश्यत्वादिगुणकोधर्मोक्तेः॥ अथपरायया तदक्षरमधिगम्यते। यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रंत दपाणिपादंनित्यंविभुंसर्वगतंसुसूक्ष्मंतदव्ययंयद्भूतयोनिंपरिपश्यंतिधीराइतिश्रूयतेतत्रसंशयः किमयमदृश्य- त्वादिगुणकोभूतयोनिः प्रधानंस्यात्। उतशारीरआहोस्वित्परमेश्वरइति। तत्रप्रधानमचेतनंभूतयोनिरितियुक्तं।

तामेवविषयोऽस्यानिर्दिशतियत्तदिति। अद्रेश्यंअदृश्यं। ज्ञानेंद्रियैःअग्राह्यंकर्मेंद्रियैश्चगोत्रंवंशः। वर्णोब्राह्मणत्वादिजातिः। चक्षुःश्रोत्रशून्य

मचक्षुः श्रोत्रंपाणिपादशून्यमपाणिपादंज्ञानकर्मेंद्रियविकलमित्यर्थः विभुंप्रभुंसुसूक्ष्मंदुर्ज्ञेयत्वात्। नित्याव्ययपदाभ्यांनाशापक्षययोर्निरासः। भूता
नांयोनिंप्रकृतिंयत्पश्यंतिधीराः पंडितास्तदक्षरंतद्विद्या परेत्यन्वयः। अदृश्यत्वादिगुणानांब्रह्मप्रधानसाधारणत्वात्संशयः पूर्ववद्दृष्टत्वादीनांचेतनधर्मा

अचेतनानामेवतस्यदृष्टांतत्वेनोपादानात्। यथोर्णनाभिः सृजतेगृह्णतेचयथापृथिव्यामोषधयः
संभवंतियथासतः पुरुषात्केशलोमानितथाक्षरात्संभवतीहविश्वमिति। ननूर्णनाभिः पुरुषश्चचे
तनाविहदृष्टांततयोपात्तौनेतिब्रूमः। नहिकेवलस्यचेतनस्यतंतुसूत्रयोनित्वंकेशलोमयोनित्वंचास्तिचे
तनाधिष्ठितंत्वचेतनमूर्णनाभिशरीरंसूत्रस्ययोनिः पुरुषशरीरंचकेशलोम्नामितिप्रसिद्धं॥ अपिच
पूर्वत्रादृष्टत्वाद्यभिलापसंभवेपिद्रष्टृत्वाद्यभिलापासंभवात्। नप्रधानमभ्युपगतं। इहत्वदृश्यत्वा
दयोधर्माः प्रधानेसंभवंतिनचात्रविरुध्यमानोधर्मः कश्चिदभिलप्यते॥ णामत्राश्रुतेः अस्तुप्रधानमितिप्रत्युदाहर
णंनपूर्वपक्षयतितत्रेतिपूर्वपक्षेप्रधानाद्युपास्तिः सिध्दांतेनिर्गुणधीरितिफलंऊर्णनाभिर्लूताकीटः तंतून्स्वदेहात्सृजतिउपसंहरतिचेत्यर्थः स्थातोजीव
तः ननुपूर्वंनिरस्तंप्रधानंकथमुत्थाप्यतेतत्राह। अपिचेति। ॥ ॥

अत्रप्रधानेविरुध्यमानोऽसंभावितोवाक्यशेषःश्रुतइतिशंकते। ननुयइतिपंचम्यंताक्षरश्रुत्याभूतप्रकृतेःप्रत्यभिज्ञानात्प्रथमांतपरशब्दोक्तस्य
जगन्निमित्तेश्वरस्यसर्वज्ञत्वादिकमित्याह। अत्रोच्यतइति। संदिग्धेतुवाक्यशेषादितिन्यायेनसिध्दांतयति। एवंप्राप्तइतिचेतनाचेतनत्वेनसंदि

ननुयःसर्वज्ञःसर्वविदित्ययंवाक्यशेषोचेतनेप्रधानेनसंभवति। कथंप्रधानंभूतयोनिःप्रतिज्ञायतइत्यत्रोच्य
तेयथातदक्षरमधिगम्यते यत्तदद्रेश्यमित्यक्षरशब्देनादृश्यत्वादिगुणकंभूतयोनिंश्रावयित्वापुनरंतेश्रावयि
ष्यति अक्षरात्परतःपरइतितत्रयःपरोक्षराच्छ्रुतःससर्वज्ञःसर्वविस्संभविष्यतिप्रधानमेवत्वक्षरशब्दनि
र्दिष्टंभूतयोनिः यदातुयोनिशब्दोनिमित्तवाचीतदाशारीरोपि भूतयोनिस्स्यात्। धर्माधर्माभ्यांभूतजातस्यो-
पार्जनादितिएवंप्राप्तेभिधीयते। योयमदृश्यत्वादिगुणकोभूतयोनिःसपरमेश्वरएवस्यान्नान्यइतिकथमेत
दवगम्यते धर्मोक्तेःपरमेश्वरस्यहिधर्माइहोच्यमानादृश्यंते। यःसर्वज्ञःसर्वविदिति। नहिप्रधानस्याचेतनस्य
शारीरस्योपाधिपरिच्छिन्नदृष्टेःसर्वज्ञत्वंसर्वविस्त्वंवासंभवति। नन्वक्षरशब्दनिर्दिष्टात् भूतयोनेःपरस्यैवतत्स
र्वज्ञत्वंसर्वविस्त्वंचनभूतयोनिविषयमित्यत्रोक्तं॥ ग्धेभूतयोनौयःसर्वज्ञइतिवाक्यशेषादीश्वरत्वनिर्णयइत्येतदयुक्तंवाक्यशे-
षेभूतयोनेःप्रत्यभिज्ञापकाभावादितिशंकते। नन्विति॥

जनिकर्तुःप्रकृतिरितिसूत्रेणप्रकृतेरपादानसंज्ञायांपंचमीस्मरणादक्षरात्संभवतीतिप्रकृतित्वेनोक्ताक्षरस्यभूतयोनेर्वाक्यशेषेतस्मादितिप्रकृति
त्वलिंगेनप्रत्यभिज्ञानमस्तीतिसमाधत्ते।अत्रोच्यतइति।एतत्कार्यंब्रह्मसूत्रात्मकंनामरूपंस्थूलंततोऽन्नंव्रीह्यादीत्यर्थः यदुक्तंपंचम्यंताक्षर
श्रुत्याभूतयोनेःप्रत्यभिज्ञानादचेतनत्वमितितत्राह।अक्षरात्परतइतिनायमक्षरशब्दोभूतयोनिंपरामृशति।परविद्याधिगम्यत्वेनोक्तस्याक्षर-

अत्रोच्यतेनैवंसंभवति।यत्कारणमक्षरात्संभवतीहविश्वमितिप्रकृतंभूतयोनिमिहजायमानप्रकृतित्वेननिर्दिश्यानंतरम-
पिजायमानप्रकृतित्वेनैवसर्वज्ञंनिर्दिशति।यःसर्वज्ञःसर्वविद्यस्यज्ञानमयंतपः तस्मादेतद्ब्रह्मनामरूपमन्नंचजायतइतित
स्मान्निर्देशसाम्येनप्रत्यभिज्ञायमानत्वात्प्रकृतस्यैवाक्षरस्यभूतयोनेःसर्वज्ञत्वंसर्वविच्वंचधर्मउच्यतेइतिगम्यते।अक्षरात्प
२ रतःपरइत्यत्रापिनप्रकृताद्भूतयोनेरक्षरात्परःकश्चिदभिधीयतेकथमेतदवगम्यते।येनाक्षरंपुरुषंवेदसत्यंप्रोवाचतांतत्त्व
तोब्रह्मविद्यामितिप्रकृतस्यैवाक्षरस्यभूतयोनेरदृश्यत्वादिगुणकस्यवक्तव्यत्वेनप्रतिज्ञातत्वात्।कथंतर्ह्यक्षरात्परतःपरइतिव्यपदि
श्यतइत्युत्तरसूत्रेवक्ष्यामः॥

स्यभूतयोनेरक्षरंपुरुषंवेदेत्यक्षरश्रुत्यावेद्यत्वलिंगवत्त्वात्पूर्वमेवब्रह्मत्वेनपरामर्शादित्याह।येनेति।येनज्ञानेना
क्षरंभूतयोनिंसर्वज्ञंपुरुषंवेदतांब्रह्मविद्यांयोग्यायशिष्यायप्रब्रूयादित्युपक्रम्याप्राणोह्यमनाःशुभ्रोक्षरात्परतःपरइत्युच्यमानःपरोभूतयोनिरिति
गम्यतइत्यर्थः तर्हिपंचम्यंताक्षरशब्दार्थःकइत्याशंक्याज्ञानमितिवक्ष्यतइत्याहकथमिति॥ ॥

परविद्येतिसमाख्ययापितद्विषयस्यब्रह्मत्वमित्याह।अपिचेति। ननुप्रधानविद्यापिकारणविषयत्वात्परेत्यतआह। परापरविभागोहीति।अनित्यफलत्वेनापरांविद्यांनिंदित्वामुमुक्षुप्रार्थिनेब्रह्मविद्यांप्रोवाचेतिवाक्यशेषोक्तेरित्यर्थः अस्तुप्रधानविद्यापिमुक्तिफलत्वेनपरेत्यतआह। नचेति। ननुयःसर्व

अपिचात्रद्वेविद्येवेदितव्येउक्तेपराचैवापराचेति। तत्रापराऋग्वेदादिलक्षणांविद्यामुक्त्वाब्रवीत्अथपरायया तदक्षरमधिगम्यतइत्यादितत्रपरस्याःविद्यायाःविषयत्वेनाक्षरंश्रुतंयदिपुनःपरमेश्वरादन्यददृश्यत्वादिगुणकमक्षरंपरिकल्प्येतनेयंपराविद्यास्यात्। परापरविभागोह्ययंविद्ययोरभ्युदयनिःश्रेयसफलतयापरिकल्प्यतेनचप्रधानविद्यानिःश्रेयसफलाकेनचिदभ्युपगम्यते। तिस्रश्चविद्याःप्रतिज्ञायेरन्त्वत्पक्षेअक्षरस्यभूतयोनेः परस्यपरमात्मनःप्रतिपाद्यमानत्वात् एवंचद्वेविद्येवेदितव्येइतिहनिर्दिष्टे कस्मिन्नुभगवोविज्ञातेसर्वमिदंविज्ञातंभवतीतिचैकविज्ञानेनसर्वविज्ञानापेक्षणंसर्वात्मकेब्रह्मणिविवक्ष्यमाणेऽवकल्प्यते। नाचेतनमात्रैकायतनेप्रधानेभोग्यव्यतिरिक्तेवाभोक्तरि॥

ननुइत्यग्रेपरविद्याविषयउच्यते।अद्रेश्यवाक्येनतुप्रधानविद्योच्यते इत्यतआहतिस्रश्चेति। इतश्चभूतयोनेर्ब्रह्मत्वमित्याह कस्मिन्निति। अचेतनमात्रस्यैकायतनमुपादानंतज्ज्ञानात्कार्यज्ञानेपिनतदकार्याणामात्मनांज्ञानंभवति। एवंजीवेज्ञातेतदकार्यस्यभोग्यस्यज्ञानंनभवतीत्यर्थः॥ ॥ ॥ २२

ब्रह्मविद्याशब्दाश्च भूतयोनिर्ब्रह्मेत्याह। अपिचेति। सब्रह्मविद्यांसर्वविद्यानांप्रतिष्ठांसमाप्तिभूमिंब्रह्मविद्यामुवाच। ब्रह्मणिसर्वविद्यानांविद्याकलानांचांतर्भावात्। ब्रह्मविद्यासर्वविद्याप्रतिष्ठानन्वपरविद्याप्रकरणेकिमर्थमुक्तेत्यतआह। अपरेतिप्लवंतेगच्छंतीतिप्लवाः विनाशिनः अदृढाःनित्यफलसंपादनाशक्ताः षोडशर्त्विजः पत्नीयजमानश्चेत्यष्टादशयज्ञेन नामनिमित्तेननिरूप्यंतेइतियज्ञरूपाः तथाहिक्रतुषुयाजयंति

अपिचसब्रह्मविद्यांसर्वविद्याप्रतिष्ठामथर्वायज्येष्ठपुत्रायप्राहेति। ब्रह्मविद्यांप्राधान्येनोपक्रम्यपरापरविभागेनपरांविद्यामक्षराधिगमनींदर्शयित्वास्याः ब्रह्मविद्यात्वंदर्शयतिसाचब्रह्मविद्यासमाख्यातदधिगम्यस्याक्षरस्याब्रह्मत्वेबाधितास्यात्। अपरा-ऋग्वेदादिलक्षणाकर्मविद्याः ब्रह्मविद्योपक्रमेउपन्यस्यतेब्रह्मविद्याप्रशंसार्थंप्लवाह्येतेअदृढायज्ञरूपाअष्टादशोक्तमवरंयेषु कर्मएतच्छ्रेयोयेभिनंदंतिमूढाजरामृत्युंतेपुनरेवापियंतीत्येवमादिनिंदावचनाच्चनिंदित्वाचापरांविद्यांततोविरक्तस्यपरविद्याधिकारंदर्शयति। परीक्ष्यलोकान्कर्मचितान्ब्राह्मणोनिर्वेदमायान्नास्त्यकृतः कृतेनतद्विज्ञानार्थंसगुरुमेवाभिगच्छेत्समित्पाणिः॥

यज्ञंकारयंतीत्यृत्विजः यजतइतियजमानः पत्युर्नोयज्ञसंयोगइतिसूत्रेणपतिशब्दस्यनकारांतादेशोयज्ञसंबंधेविहितइतिपत्नीएवमृत्विगादीनांप्रवृत्तिनिमित्तंयज्ञइतियज्ञरूपाः येष्ववरमनित्यफलकंकर्मश्रुत्युक्तं एतदेवकर्मश्रेयोनान्यदात्मज्ञानमितियेमूढाःकल्पयंतितेपुनः पुनर्जन्ममरणमाप्नुवंतीत्यर्थः तद्विज्ञानार्थंब्रह्मज्ञानार्थंगुरुमभिगच्छेदेवेतिनियमः॥ ॥ ॥

ब्रह्मनिष्ठस्याप्यनधीतवेदस्य गुरुत्वं वारयति । श्रोत्रियमिति। कार्यस्योपादानाभिन्नमित्यंशो दृष्टांतः सर्वसाम्ये तवाप्यनिष्ठापत्तेरित्याह।अपि
च स्थूला इति विशेषणान्न जीवोपि भेदोक्तेर्न प्रधानमिति हेतुद्वयं विभज्य व्याचष्टे। विशिनष्टि हीत्यादिना। दिव्यो द्योतनात्मकः स्वयंज्योतिरमू

श्रोत्रियं ब्रह्मनिष्ठमिति। यत्तूक्तमचेतनानां पृथिव्यादीनां दृष्टांतत्वेनोपादानात्। दार्ष्टांतिकेनाप्यचेतनेन भूतयोनिना भवितव्यमि
ति तदयुक्तं न हि दृष्टांतदार्ष्टांतिकयोरत्यंतसाम्येन भवितव्यमिति नियमोस्ति अपि च स्थूलाः पृथिव्यादयो दृष्टांतत्वेनोपात्ता इति न स्थू
ल एव दार्ष्टांतिको भूतयोनिरभ्युपगम्यते। तस्माददृश्यत्वादिगुणको भूतयोनिः परमेश्वर एव विशेषणभेदव्यपदेशाभ्यां च नेतरौ। इ
तश्च परमेश्वर एव भूतयोनिः नेतरौ शारीरः प्रधानं वा। कस्माद्विशेषणभेदव्यपदेशाभ्यां विशिनष्टि हि प्रकृतं भूतयोनिं शारीराद्विलक्ष-
णत्वेन दिव्यो ह्यमूर्तः पुरुषः सबाह्याभ्यंतरो ह्यजः अप्राणो ह्यमनाः शुभ्र इति न ह्येतद्दिव्यत्वादिविशेषणमविद्याप्रत्युपस्थापित
नामरूपपरिच्छेदाभिमानिनः तद्धर्मान्स्वात्मनि कल्पयतः शारीरस्योपपद्यते। तस्मात्साक्षादौपनिषदः पुरुष इहोच्यते। तथा प्रधा
नादपि प्रकृतं भूतयोनिं भेदेन व्यपदिशति । अक्षरात्परतः पर इति॥
र्तः पूर्णः पुरुषः पुरिशयः प्रत्यगात्मा बाह्यं स्थूलमाभ्यंतरं सकार
णं सूक्ष्मं ताभ्यां सहाधिष्ठानत्वेन तिष्ठतीति सबाह्याभ्यंतरः हि नयाश्रुतिप्रसिद्ध इत्यर्थः अविद्याकृतं नामरूपात्मकं शरीरं तेन परिच्छेदोल्पत्वं २३
तस्य शरीरस्य धर्मान्जाड्यमूर्तत्वादीनित्यर्थः॥ ॥ ॥

नन्वत्वक्षरशब्देनप्रधानोक्तावशब्दत्वंप्रधानस्यप्रतिज्ञातंबाध्येत। तत्राह अक्षरमव्याकृतमिति। अश्नोतिव्याप्नोतिसर्वविकारजातमित्यक्षरं
अव्याकृतमकृतंअनादीतियावत्नामरूपयोर्बीजमीश्वरः तस्यशक्तिरूपंपरतंत्रत्वादुपादानमपिशक्तिरित्युक्तं भूतानांसूक्ष्माः संस्कारा
यत्रतद्भूतसूक्ष्मंईश्वरश्चिन्मात्रआश्रयोयस्यतंत्तथातस्यैवचिन्मात्रस्यजीवेश्वरभेदोपाधिभूतंयत्तुईश्वरआश्रयोविषयोयस्येतिनानाजीव
वादिनांव्याख्यानंतद्भाष्यबहिर्भूतंएतस्मिन्नुखल्वक्षरेगार्ग्याकाशओतश्चप्रोतश्चेत्योतप्रोतभावेनाव्याकृतस्यचिदाश्रयत्वश्रुतेःआ
श्रयपदलक्षणायानिर्मूलत्वात्। नहिमूलप्रकृतेर्भेदेकिंचित्प्रमाणमस्तिनचेंद्रोमायाभिरितिश्रुतिर्मानं अजामेकामित्याद्यनेकश्रुतिबलेन

अक्षरमव्याकृतंनामरूपबीजशक्तिरूपंभूतसूक्ष्ममीश्वराश्रयंतस्यैवोपाधिभूतंसर्वस्माद्विकारात्परः यः॥ ॥

लाघवतर्कसहायेनतस्याः श्रुतेर्बुद्धिभेदेन मायाभेदानुवादित्वात्। तदुक्तंसुरेश्वराचार्यैः स्वतस्त्वविद्याभेदोत्रमनागपिनविद्यतइतिसां
ख्ययोगाचार्याः पुराणेतिहासकर्तारश्चमूलप्रकृत्यैक्यंवदंति। नन्वविद्यैक्येबंधमुक्तिव्यवस्थाकथंनचव्यवस्थानास्तीतिवाच्यं। श्रवणेप्रवृ-
त्यादिबाधाभावादितिचेदुच्यतेयेत्वविद्यानानात्वमिच्छंतितैरपिपरिणामित्वेनसांशत्वमविद्याया अंगीकार्यं। तथाचानर्थात्मकस्वीय
संघातात्मनापरिणताविद्यांशोपहितजीवभेदाद्व्यवस्थासिध्यति। यस्यज्ञानमंतःकरणेजायतेतस्यांतःकरणपरिणाम्यज्ञानांशनाशोमु
क्तिरितिएवंचश्रोतुः स्वरूपानंदप्राप्तिः श्रवणादौप्रवृत्तिनिविद्ददनुभवोजीवन्मुक्तिशास्त्रंचेतिसर्वमबाधितंभवतिनचैवनानाजीवपक्षादवि

शेषः मूलप्रकृतिनानात्वाभावादित्यलम्॥ परत्वे हेतुः अविकार इति ननु सूत्रकृता क्वचित्प्रधानाद्भेदव्यपदेश उक्तः तत्र कथमज्ञानाद्भेदोक्ति-र्व्याख्यायते तत्राह। नाम्नेति कार्यात्मना प्रधीयत इति प्रधानमज्ञानमेव ततोऽन्यस्याप्रामाणिकत्वादित्यर्थः अतोऽत्राज्ञानमेव भूतयोनिरिति

अविकारस्तस्मात्परतः पर इति भेदेन व्यपदेशात्परमात्मानमिह विवक्षितं दर्शयति नात्र प्रधानं नाम किंचित्स्वतंत्रं तत्त्वमभ्युपगम्य तस्माद्भेदव्यपदेश उच्यते। किंतर्हि यदि प्रधानमपि कल्प्यमानं श्रुत्यविरोधेनाव्याकृतादिशब्दवाच्यं भूतसूक्ष्मं परिकल्प्येत कल्प्यतां। तस्माद्भेदव्यपदेशात् परमेश्वरो भूतयोनिरित्येतदिह प्रतिपाद्यते कुतश्च परमेश्वरो भूतयोनिः रूपोपन्यासाच्च। अपि चाक्षरात्परतः पर इत्यस्यानंतरं एतस्माज्जायते प्राण इति प्राणप्रभृतीनां पृथिवीपर्यंतानां तत्त्वानां सर्गमुक्त्वा तस्यैव भूतयोनेः सर्वविकारात्मकं रूपमुपन्यस्यमानं पश्यामो ऽग्निर्मूर्धा चक्षुषी चंद्रसूर्यौ दिशः श्रोत्रे वाग्विवृताश्च वेदाः वायुः प्राणो हृदयं विश्वमस्य पद्भ्यां पृथिवी ह्येष सर्वभूतांतरात्मा इति तच्च परमेश्वरस्योचितं सर्वविकारकारणत्वात्

पूर्वपक्षं कृत्वा निरस्यते तन्निरासेनार्थात्सांख्यकल्पितप्रधाननिरास इति मंतव्यं। वृत्तिकृन्मतेनादौ सूत्रं व्याचष्टे अपि चेत्यादिना प्राणो मनः २४
सर्वेंद्रियाणि च। खं वायुर्ज्योतिरापः पृथिवीति श्रुतिः अग्निर्द्युलोकः असौ वाव लोको गौतमाग्निरिति श्रुतेः विवृताः वेदाः वागित्यन्वयः

पद्भ्यांपादावित्यर्थः यस्येदंरूपंस एषसर्वप्राणिनामंतरात्मेत्यर्थः ननुमहिम्नइति अल्पशक्तेरित्यर्थः॥ यथाकश्चिद्ब्रह्मवित्तस्यस
र्वात्मत्वप्रकटनार्थमहमन्नमितिसामगायतिनत्वन्नत्वादिकमात्मनोवि वक्षति। अफलत्वात्तथेहापीत्याह। अहमन्नमितिवृत्तिकृ

नशारीरस्यतन्नुमहिम्नोनापिप्रधानस्यायंरूपोपन्यासः संभवतिसर्वभूतांतरात्मत्वासंभवात्। तस्मात्परमेश्वरएवभू
तयोनिः नेतराविति गम्यतेकथंपुनर्भूतयोनेरयंरूपोपन्यासइतिगम्यते। प्रकरणात्एषइतिचप्रकृतानुकर्षणात्। भू
तयोनिंहिप्रकृत्यैतस्माज्जायतेप्राणएषसर्वभूतान्तरात्मेतिवचनंभूतयोनिविषयमेवभवति। यथोपाध्यायंप्रकृत्यैतस्मा
दधीष्व एषवेदवेदांगपारगइतिवचनंउपाध्यायविषयंभवति। तद्वत्कथंपुनरदृश्यत्वादिगुणकस्यभूतयोनेर्विग्रहव
द्रूपंसंभवति। सर्वात्मत्वविवक्षयेदमुच्यते। नतुविग्रहवत्वविवक्षयेत्यदोषः॥ अहमन्नमहमन्नाद इत्यादिवत्
अन्येपुनर्मन्यंते। नायंभूतयोनेरूपोपन्यासः जायमानत्वेनोपन्यासात्। एतस्माज्जायतेप्राणोमनः सर्वेंद्रियाणिच। खंवा
युर्ज्योतिरापः पृथिवीविश्वस्यधारिणीतिहिपूर्वत्रप्राणादिपृथिव्यंतंतत्वजातंजायमानंनिरदिक्षदुत्तरत्रापिचतस्मादग्निः

इत्याख्याख्यांदूषयति। अन्येपुनरिति। एषसर्वभूतांतरात्मासूत्रात्माएतस्माद्भूतयोनेर्जायतइतिश्रुत्यन्वयेनहिरण्यगर्भस्यात्रजायमा
नत्वोपन्यासादित्यर्थः। निरदिक्षदवोचदित्यर्थः। अग्निर्द्युलोकः यस्यसमिद्रूपः सूर्यः सोपिद्युलोकाग्निस्तस्माद्जायतेत्यर्थः तस्मा

दित्यएवसमिदितिश्रुत्यंतरात्। अतोमध्येपिसृष्टिरेवव्याख्यानरूपमितिभावः यदुक्तमग्निर्मूर्धेत्यत्र भूतयोनेः सर्वात्मत्वंविवक्षितमिति तन्नेत्याह। सर्वात्मत्वमपीति। ननुहिरण्यगर्भस्यजन्मान्यत्रानुक्तंकथमत्रवक्तव्यंतत्राह। श्रुतीति। अग्रेसमवर्ततजातः सन्भू

समिधोयस्यसूर्यइत्येवमादि अतश्चसर्वाओषधयोरसाश्चेत्येवमंतंजायमानत्वेनैवनिर्देशस्य तर्हिएवंकथमकस्मादंतरालेभूतयोनेरूपमुपन्यस्येत्। सर्वात्मत्वमपिसृष्टिंपरिसमाप्योपदेक्ष्यतिपुरुषएवेदंविश्वंकर्मेत्यादिनाश्रुतिस्मृत्योश्चत्रैलोक्यशरीरस्यप्रजापतेर्जन्मनिर्दिश्यमानमुपलभामहे हिरण्यगर्भः समवर्तताग्रेभूतस्यजातः पतिरेकआसीत्। सदाधारपृथिवींद्यामुतेमांकस्मैदेवायहविषाविधेम समवर्ततेत्यजायतइत्यर्थः तथासवैशरीरीप्रथमः सवैपुरुषउच्यते। आदिकर्तासभूतानांब्रह्माग्रेसमवर्ततेति॥

तज्जामस्यैकः पतिरीश्वरप्रसादादभवत् सस्त्रात्माधामिमांपृथिवींचस्थूलंसर्वमधारयत् कशब्दस्यप्रजापतिसंज्ञात्वेसर्वनामत्वाभावेनस्माइत्ययोगादेकारलोपेनैकस्मैदेवायप्राणात्मनेहविषाविधेमपरिचरेमेतिव्याख्येयंकतमएकोदेवइतिप्राणइतिश्रुतेः यद्वायस्मादयंजायतस्तस्माएकस्मैदेवायेत्यर्थः एकोदेवः सर्वभूतेषुगूढइतिश्रुत्यंतरात्॥ २५

ननुतस्यभूतांतरात्मत्वंकथंतत्राह विकारेति। पूर्वकल्पेप्रकृष्टोपासनाकर्मसमुच्चयानुष्ठानादस्मिन्कल्पेसर्वप्राणिव्यष्टिलिंगानांव्यापकंसर्वप्रा-
ण्यंतर्गतंज्ञानकर्मेंद्रियप्राणात्मकसमष्टिलिंगशरीरंजायतेतद्रूपस्यसूत्रात्मनः सर्वभूतांतरात्मत्वंयुक्तमित्यर्थः स्वपक्षेसूत्रार्थमाह अस्मिन्पक्ष
इतिकर्मसफलंसर्वंश्रौतस्मार्तादिकंतपश्चपुरुषएवेतिसर्वात्मत्वरूपोपन्यासान्न भूतयोनौज्ञेयेवाक्यसमन्वितमित्यर्थः। वैश्वानरः। छांदोग्य
मुदाहरति। कोनइति। प्राचीनशालसत्ययज्ञेंद्रद्युम्नजनबुडिलामिलित्वामीमांसांचक्रुः कोनआत्माकिंब्रह्मेति आत्मैवब्रह्मेतिज्ञापनार्थंपद

विकारपुरुषस्यापिसर्वभूतांतरात्मत्वंसंभवति प्राणात्मनासर्वभूतानामध्यात्ममवस्थानात् अस्मिन्पक्षेपुरुष
एवेदंविश्वंकर्मेत्येव मादिसर्वरूपोपन्यासः परमेश्वरप्रतिपत्तिहेतुरितिव्याख्येयं। वैश्वानरःसाधारण शब्दविशे
षात्। कोनआत्माकिंब्रह्मेति आत्मानमेवेमंवैश्वानरंसंप्रत्यध्येषितमेवनोब्रूहीति इतिचोपक्रम्यद्युसूर्यवाय्वाकाश
वारिपृथिवीनांसुतेजस्त्वादिगुणयोगमेकैकोपासननिंदयाचवैश्वानरंप्रतितेषांमूर्धादिभावमुपदिश्यआम्नायते॥

द्वयंतेपंचापिनिश्चयार्थमुद्दालकमाजग्मुः सोपिसम्यङ् नवेदेतितेनोद्दालकेनसहषडप्यश्वपतिंकैकेयंराजानमागत्योचुः। आत्मानमिति।
अध्येषिस्मरसि। तमेवनोब्रूहीति राजातुतेषांभ्रांतिनिरासार्थंतान्प्रत्येकमपृच्छत् कंत्वमात्मानमुपास्सेइतिकंत्वमात्मानमुपास्सइति। तेचप्राची
नशालादयः क्रमेणप्रत्येकमूचुः दिवमेवाहंवैश्वानरंवेद्मिआदित्यमेवाहंवेद्मिवायुमेवआकाशमेव आपएवपृथिवीमेवाहंवेद्मीति॥ ॥

शा०भा०
२६

ततोराजाद्यसूर्यादीनांषण्णांयथाक्रमेणसुतेजस्त्वविश्वरूपत्वपृथग्वर्त्मात्मत्वबहुलत्वरयित्वप्रतिष्ठात्वगुणान्विधायभवंतोयदिमामपृष्ट्वाद्यसूर्यादि प्र०टि०पा०
षुभगवतोवैश्वानरस्यांगेष्वेवप्रत्येकंवैश्वानरत्वदृष्ट्योभवेयस्तदाक्रमेणमूर्धपातांधत्वप्राणोत्क्रमणदेहविशीर्णत्वबस्तिभेदपादशोषाभवतांस्फ
रितिप्रत्येकोपासनंनिंदित्वासुतेजस्त्वगुणकोद्युलोकोस्यात्मनोवैश्वानरस्यमूर्धाविश्वरूपत्वगुणकः सूर्योयस्यचक्षुरित्येवंद्युसूर्यादीनांमूर्धादि

यस्त्वेतमेवंप्रादेशमात्रमभिविमानमात्मानंवैश्वानरमुपास्तेससर्वेषुलोकेषुसर्वेषुभूतेषुसर्वेष्वात्म
स्वन्नमत्ति तस्यहवाएतस्यात्मनोवैश्वानरस्यमूर्धैवसुतेजाश्चक्षुर्विश्वरूपः प्राणः पृथग्वर्त्मात्मा
संदेहोबहुलोबस्तिरेवरयिः पृथिव्येवपादावुरएववेदिर्लोमानिबर्हिर्हृदयंगार्हपत्योमनोन्वाहार्य
पचनआस्यमाहवनीयइत्यादितत्रसंशयः किंवैश्वानरशब्देनजाठरोग्निरुपदिश्यतेउतभूताग्निरथ
तदभिमानिनीदेवताअथवाशारीरआहोस्वित्परमेश्वरइतिकिंपुनरत्रसंशयकारणंवैश्वानरइति

भावमुपदिश्यसमस्तवैश्वानरध्यानविधिराम्नायते। यस्त्वेतमिति। आभिमुख्येनापरोक्षतयाविश्वंविमिमीतेजानातीत्यभिविमानः तंसर्वज्ञंस २६
तदुपासकः सर्वभोग्यंभुंक्तइत्यर्थः लोकाभूरादयोभूतानिशरीराण्यात्मानोजीवाइतिभेदः सुष्टुतेजः कांतिर्यस्यद्युलोकस्यससुतेजाः विश्वानि

रूपाणि अस्य सूर्यस्य एष शुक्ल एष नील इति श्रुतेः पृथङ् नानाविधं वर्त्म गमनं आत्मा स्वभावो यस्य वायोः स नानाप्रतित्वगुणको ऽस्य प्राणः बहुलत्वं प्र
पित्वं तद्गुण आकाशो ऽस्य संदेहो देहमध्यं रयित्वं धनत्वं तद्गुणा आपो यस्य बस्तिर्मूत्रस्थानं प्रतिष्ठात्वगुणा पृथिवी तस्य पादौ तस्य होमाधारत्वं संभा

जाठरभूताग्निदेवतानां साधारणशब्दप्रयोगादात्मेति च शारीरपरमेश्वरयोस्तत्र कस्योपादानं न्याय्यं कस्य वा हानमिति भवति संशयः ॥ किं तावत्प्राप्तं जाठरो ऽग्निरिति । कुतस्तत्र हि विशेषेण क्वचित्प्रयोगो दृश्यते । अयमग्निर्वैश्वानरो यो ऽयमन्तःपुरुषे येनेदमन्नं पच्यते यदिदमद्यते । इत्यादौ अग्निमात्रं वा स्यात् सामान्येनापि प्रयोगदर्शनात् विश्वस्मा अग्निं भुवनाय देवा वैश्वानरं केतुमह्नामकृण्वन्नित्यादौ । अग्निशरीरा वा देवता स्यात् तस्यामपि प्रयोगदर्शनात् वैश्वानरस्य सुमतौ स्याम राजा हि कं भुवनानामभिश्रीरित्येव

दयति । उर एवेत्यादिना ॥ पूर्वमुपक्रमस्या द्युभ्वाद्यायतनत्वादिसाधारणधर्मस्य वाक्यशेषस्य सर्वज्ञत्वादिलिंगेन ब्रह्मनिष्ठत्वमुक्तं तद्वदत्राप्युपक्रमस्थ
साधारणवैश्वानरशब्दस्य वाक्यशेषस्थं होमाधारत्वलिंगेन जाठरनिष्ठत्वमिति दृष्टांतेन पूर्वपक्षयति । किं तावदित्यादिना पूर्वोत्तरपक्षयोः

जाग्रब्रह्मणो धर्मानंफलं यदद्यतेतदन्नंयेनपच्यतेसोयंपुरुषेशरीरेंतरस्तीत्यर्थः पक्षांतरमाह अग्निमात्रांवेतिविश्वस्मैभुवनायवैश्वानरम-
ग्निमन्हांकेतुंचिन्हंसूर्यंदेवाअकृण्वन् कृतवंतः सूर्योदयेदिनव्यवहारादित्यर्थः स्याद्वैश्वानरइत्यनुषंगः हियस्मात्कंसुखमदोभुवनानांराजा

माद्यायाः श्रुतेर्देवतायामैश्वर्याद्यपेतायांसंभवात्. ॥ अथात्मशब्दसामानाधिकरण्यात्.। उपक्रमेच
कोनआत्माकिंब्रह्मेतिकेवलात्मशब्दप्रयोगात्। आत्मशब्दवशेनवैश्वानरशब्दः परिणेयइत्युक्त्येत
तथापिशारीरआत्मास्यात् तस्यभोक्तृत्वेनवैश्वानरसंनिकर्षात् प्रादेशमात्रमितिचविशेषणस्यतस्मि
न्नुपाधिपरिछिन्नेसंभवात् तस्मान्नेश्वरोवैश्वानरइत्येवंप्राप्तेतनइदमुच्यते। वैश्वानरः परमात्माभवितु

वैश्वानरोभिमुखाश्रीरस्येत्यभिश्रीरीश्वरः तस्मात्तस्यवैश्वानरस्यसुमतौवयंस्यामतस्यास्मद्विषयाशुभमतिर्भवत्वित्यर्थः ॥ पक्षत्रयेप्यरुचिंब्रु
दन्कल्पांतरमाह। अथेत्यादिना। आत्मावैश्वानरइतिश्रुतेरित्यर्थः केवलत्वंवैश्वानरशब्दशून्यत्वं अत्रजाठरोवैश्वानरइतिमुख्यः पूर्वपक्षः

प्राणाग्निहोत्रहोमाधारत्वलिंगात् तस्यदेहव्यापित्वादात्मत्वं श्रुत्याद्युमूर्धत्वादिकल्पनयाबृहत्वाद्ब्रह्मत्वमितिध्येयंसिध्यांतयति। ततइदमि
ति। साधारणश्रुत्योरुपक्रमस्थयोर्विशेषात् प्रथमश्रुतमुख्यत्रैलोक्यशरीरलिंगात् सर्वात्मकेश्वरपरत्वंयुक्तं। नचरमश्रुतकल्पितहोमाधार

मर्हतीतिकुतः साधारणशब्दविशेषात् साधारणशब्दयोर्विशेषस्साधारणशब्दविशेषः यद्यप्येतौउभा
वप्यात्मवैश्वानरशब्दौसाधारणशब्दौवैश्वानरशब्दस्तुत्रयाणांसाधारणः आत्मशब्दश्चद्वयोस्तथापिवि
शेषोदृश्यतेयेनपरमेश्वरपरत्वंतयोरभ्युपगम्यते तस्यहवाएतस्यात्मनोवैश्वानरस्यमूर्धैवसुतेजाइत्यादि
अत्रहिपरमेश्वरएवद्युमूर्धत्वादिविशिष्टोवस्थांतर्गतः प्रत्यगात्मत्वेनोपन्यस्तआध्यानायेतिगम्यते ॥

त्वलिंगेनजाठरपरत्वमित्यर्थः ननुनिर्विशेषस्यकुतोविशेषइत्यतआह। अत्रहीति। अवस्थांतरगतः त्रैलोक्यात्मनास्थितइत्यर्थः॥ ॥

जाग्रस्यापि ध्यानार्थंविशेषकल्पनेतिचेन्न असत्कल्पनापत्तेः ईश्वरस्यतूपादानत्वाद्विशेषः सन्नेवध्यानार्थंउच्यतामित्याह। कारणत्वादिति।
लिंगांतराण्याह। ससर्वेष्वित्यादिना। यथाग्नौनिक्षिप्तमिषीकतूलंदह्यतेएवंहास्यविदुषइत्यर्थः नन्वसदारोपेणापिस्तुतिसंभवान्नमूलश्रुत्य

कारणत्वात्कारणस्यहिसर्वाभिः कार्यगताभिरव स्थाभिरवस्थावत्वात् द्युलोकाद्यवयवत्वमुपपद्यते ससर्वेषुलोकेषुस
र्वेषुभूतेषुसर्वेष्वात्मस्वन्नमत्तीतिच सर्वलोकाद्याश्रयंफलंश्रूयमाणंपरमकाररणपरिग्रहंसंभवति। एवंहास्यसर्वेपाप्मनःप्र
दूयंतइति तद्वदः सर्वपापप्रदाहश्रवणंकोनआत्माकिंब्रह्मेतिचात्मब्रह्म शब्दाभ्यामुपक्रम इत्येवमेतानिब्रह्मलिंगानिपरमे
श्वरमेवगमयंति। तस्मात्परमेश्वर एववैश्वानरः। स्मर्यमाणमनुमानंस्यादिति। इतश्चपरमेश्वरएववैश्वानरः यस्मात्परमेश्वरस्यै-
वाग्निरास्यंद्यौर्मूर्धेतीदृशंत्रैलोक्यात्मकंरूपंस्मर्यते यस्याग्निरास्यंद्यौर्मूर्धाखंनाभिश्चरणौक्षितिः सूर्यश्चक्षुर्दिशः श्रोत्रेतस्मै
लोकात्मनेनमइतिच। तत्स्मर्यमाणंरूपंमूलभूतांश्रुतिमनुमापयत् अस्यवैश्वानरशब्दस्यपरमेश्वरपरत्वेऽनुमानंलिंगंगमकं
स्यादित्यर्थः इतिशब्दोहेत्वर्थोयस्मादिदंगमकंतस्मादपिवैश्वानरः परमात्मैवेत्यर्थः यद्यपिस्तुतिरियंतस्मैलोकात्मनेनमइति।

पेक्षेत्याशंक्याह यद्यपिस्तुतिरिति। तथापीतिपदमर्थतः पठतिस्तुतित्वमपीति। द्युमूर्धत्वादिरूपेण स्तुतिर्नरमात्रेणकर्तुमशक्याविनाश्रु
तिमित्यर्थः। सतारूपेणस्तुतिसंभवान्नासदारोपइतिभावः॥ ॥ ॥ ॥

शब्दादीनां गतिं वक्तुमुक्तासिद्धान्त माक्षिप्य समाधत्ते। शब्दादिभ्य इति। स एषोऽग्निर्वैश्वानर इत्यग्निरहस्ये वैश्वानरविद्यायां श्रुतो ऽग्निशब्दः ईश्वरे नसंभवतीत्यन्वयः सूत्रस्थादिशब्दार्थमाह। आदिशब्दादिति। भक्तमन्नं होमीयं होमसाधनं तेन प्राणाग्निहोत्रं कार्यमित्यर्थः। वाजसनेयिना

अस्यास्तुतित्वमपि नासति मूलभूत वेदवाक्ये सम्यग्गीदृशेन रूपेण संभवति द्यां मूर्धानं यस्य वि-
प्रा वदंति खं वै नाभिं चंद्रसूर्यौ च नेत्रे दिशः श्रोत्रे विद्धि पादौ क्षितिं च सोऽचिंत्यात्मा सर्वभूत प्रणेते
त्येवंजातीयका च स्मृतिरिहोदाहार्तव्या॥ शब्दादिभ्योंतः प्रतिष्ठानान्नेति चेन्न तथा दृष्ट्युपदेशा
दसंभवात्पुरुषमपि चैनमधीयते। अत्राहन परमेश्वरो वैश्वानरो भवितुमर्हतीति कुतः शब्दादिभ्यों-
तः प्रतिष्ठानाच्च शब्दस्तावद्वैश्वानरशब्दो न परमेश्वरे संभवति। अर्थांतररूढत्वात् तथाग्निशब्दः
स एषोऽग्निर्वैश्वानर इत्यादिशब्दात् हृदयं गार्हपत्य इत्याद्यग्नित्रेताप्रकल्पनं तद्यद्भक्तं प्रथममागच्छे

मग्निरहस्ये सप्रपंचां वैश्वानरविद्यामुक्त्वा स योऽहैतमग्निं वैश्वानरं पुरुषविधं पुरुषेंतः प्रतिष्ठितं वेद स सर्वत्रान्नमत्तीत्युक्तं देहांतस्थत्वं जाठरे सं

भवतिप्रसिद्धेरित्याह। तथेति। अत्रसूत्रेआदिपदेनैवांतःप्रतिष्ठानस्यग्रहेसंभवति पृथक्श्रुतिः साधारणलिंगत्वद्योतनार्था शब्दादिबलादिदम
पि जाठरंगमयतीत्यभ्यकच्च यः॥ यद्यपिद्युमूर्धत्वादिविशेषईश्वरपक्षपातीहोमाधारत्वादिजाठरपक्षपातीतिप्रतिभानंसमंतथापिपारमेश्वरोविशे

त्स्तोमीयमित्यादिनाचप्राणाहुत्यधिकरणतासंकीर्तनमेतेभ्योहेतुभ्योजाठरोवैश्वानरःप्रत्येतव्यः।
तथांतःप्रतिष्ठानमपिश्रूयते।पुरुषेंतःप्रतिष्ठितंवेदेति। तच्चजाठरे संभवति यदप्युक्तंमूर्धैवसुते-
जाइत्यादेर्विशेषात्कारणात् परमात्मावैश्वानर इत्यत्रब्रूमः कुतोन्वेषनिर्णयोयदुभययोरपिविशे-
षप्रतिभानेसतिपरमेश्वरविषय एवविशेषआश्रयणीयोनजाठरविषयइति॥ अथवाभूताग्नेरंत
र्बहिश्चावतिष्ठमानस्यैवनिर्देशोभविष्यति तस्यापिहिद्युलोकादिसंबंधोमंत्रवर्णादवगम्यते योभा
नुनापृथिवींद्यामुतेमामाततानरोदसीअंतरिक्षमित्यादौ।अथवातच्छरीरायादेवतायाऐश्वर्ययोगात्

षोजाठरेनसंभवतीतिबलवानित्यतआह। अथवेति। एषःद्युमूर्धत्वादिनिर्देशइत्यर्थः इमांपृथिवींद्यामपितेएवद्यावापृथिव्योरोदसीतयो

२९

र्मध्यमंतरिक्षंचयोभूताग्निर्भानुरूपेणाततानव्याप्तवान् सध्यातव्यइत्यर्थः जडमात्रस्यनध्येयत्वमित्यतआह। अथवेति। परमेश्वरदृष्ट्योपास्य
जाठराग्निप्रतीकवाचकाभ्यांअग्निवैश्वानरशब्दाभ्यांद्युमूर्धत्वादिमानीश्वरोलक्ष्यते इत्युक्त्वाकल्पांतरमाह। अथवाजाठरइति। अस्मिन्पक्षेत्राः

द्युलोकाद्यवयवत्वंभविष्यति तस्मान्नपरमेश्वरोवैश्वानरइत्यत्रोच्यतेनतथादृष्ट्युपदेशादितिन
शब्दादिभ्यःकारणेभ्यः परमेश्वरस्यप्रत्याख्यानंयुक्तं कुतस्तथाजाठरापरित्यागेनदृष्ट्युपदेशात्
ईश्वरदृष्टिर्हिजाठरेवैश्वानरेइहोपदिश्यते। मनोब्रह्मेत्युपासीतेत्यादिवत् अथवाजाठरवैश्वानरो
पाधिः परमेश्वरइहद्रष्टव्यत्वेनोपदिश्यते मनोमयः प्राणशरीरोभारूपइत्यादिवत् यदिचेहपर
मेश्वरोनविवक्ष्येत केवलएवजाठरोऽग्निर्विवक्ष्येत ततोमूर्धैवसुतेजाइत्यादेर्विशेषस्यासंभवएव
स्यात् यथातुदेवताभूताग्निव्यपाश्रयेणाप्ययंविशेषउपपादयितुंनशक्यते तथोत्तरसूत्रेवक्ष्यामः॥

धान्येनेश्वरोपास्यतापूर्वत्रगुणतइतिभेदः उपाधिवाचिभ्यांपदाभ्यामुपहितोलक्ष्यतइत्यर्थः लक्षणाबीजमसंभवंव्याचष्टे यदिचेति॥ ॥

पुरुषमपीत्यादिसूत्रशेषंव्याचष्टे।यदित्विकेवलइति ईश्वरप्रतीकत्वोपाधित्वशून्यइत्यर्थोविवक्ष्येततदेतिशेषः यत्वयःपुरुषःपूर्णःसएषोग्निर्वै-
श्वानरशब्दितजाठरोपाधिकइतिश्रुत्यर्थः योवेदससर्वत्रभुंक्तइत्यर्थः पुरुषत्वंपूर्णत्वंअचेतनस्यजाठरस्यनेत्युक्त्वापाठांतरेपुरुषविधत्वंदेहा

यदित्विकेवलएवजाठरोविवक्ष्येतपुरुषेंतःप्रतिष्ठितत्वंकेवलंतस्यस्यात् नपुरुषत्वंपुरुषमपिचैनमधीयतेवाजस
नेयिनःसएषोग्निर्वैश्वानरोयत्पुरुषःसयोहैतमेवमग्निंवैश्वानरंपुरुषविधंपुरुषेंतःप्रतिष्ठितंवेदेतिपरमेश्वरस्यतुस
र्वात्मत्वात्पुरुषत्वंपुरुषेंतःप्रतिष्ठितत्वंचोभयमुपपद्यते येतुपुरुषविधमपिचैनमधीयते इतिसूत्रावयवंपठंति
तेषामेषोर्थःकेवलंजाठरपरिग्रहेपुरुषेंतःप्रतिष्ठितत्वंकेवलंस्यात् नपुरुषविधत्वंपुरुषविधमपिचैनमधीयतेवा
जसनेयिनःपुरुषविधंपुरुषेंतःप्रतिष्ठितंवेदेतिपुरुषविधत्वंचप्रकरणात् यदधिदैवतंद्युमूर्धत्वादिपृथिवीप्रतिष्ठित
त्वांतंयच्चाध्यात्मंप्रसिद्धंमूर्धादिचुबुकप्रतिष्ठितत्वांतंयत्परिगृह्यते।अतएवनदेवताभूतंच।यत्पुनरुक्तंभूताग्नेरपिमंत्र

कारत्वंतस्यनेत्याह येत्विति ननुजाठरस्यापिदेहव्यापित्वात्तद्विधत्वंस्यादित्यतआह पुरुषविधत्वंचप्रकरणादिति।नदेहव्यापित्वंपुरुषविध ३०
त्वंकिंतुविराड्देहाकारत्वमधिदैवं पुरुषविधित्वमध्यात्मंचोपासकमूर्धादिचुबुकांतेष्वंगेषुसंपन्नत्वमीश्वरस्यपुरुषविधत्वमित्यर्थः ईश्वरस्यां

गेषुसंपतिर्वक्ष्यते एवंजाठरंनिरस्यपक्षद्वयंनिरस्यति। अतएवेति। सूत्रंव्याचष्टे। यत्तुनरित्यादिना॥ द्युमूर्धत्वादि सर्वलोकफलभोक्तृत्वंसर्वपा
प्मप्रदाहः आत्मब्रह्मशब्दोपक्रमाउक्तहेतवस्तांनेवस्मारयति। नहिभूताग्नेरित्यादिना। योभानुनेतिमंत्रेणेश्वरदृष्ट्यामहिमोक्तइतिभावः पूर्व

वर्णद्युलोकादिसंबंधदर्शनाद्द्युमूर्धैवसुतेजाइत्याद्यवयवकल्पनंतस्यैवभविष्यतीतितच्छरीरायादेवतायावाऐश्वर्ययो-
गादितितत्परिहर्तव्यमत्रोच्यते अतएवोक्तेभ्योहेतुभ्योनदेवतावैश्वानरः तथाभूताग्निरपिनवैश्वानरः॥ नहि
भूताग्नेरौष्ण्यप्रकाशमात्रात्मकस्यद्युमूर्धत्वादिकल्पनोपपद्यते विकारस्यविकारांतरात्मत्वासंभवात् तथादेव
तायाः सत्यप्यैश्वर्ययोगेन द्युमूर्धत्वादिकल्पनासंभवत्यकारणत्वात् परमेश्वराधीनैश्वर्यत्वाच्च आत्मशब्दासंभवश्च
सर्वेष्वेषुपक्षेषुस्थितएव। साक्षादप्यविरोधंजैमिनिः। पूर्वंजाठराग्निप्रतीकोजाठराग्न्युपाधिकोवापरमेश्वरउपास्य

मग्निवैश्वानरशब्दावीश्वरलक्षकावित्युक्तं अधुनाप्रतीकोपाधिपरित्यागेनविराट्पुरुषाकारस्यभगवतोवैश्वानरस्याध्यात्ममूर्धादिचुबुकां
तांगेषुसंपाद्योपास्यत्वांगीकारेऽपिनशब्दादिविरोधः शब्दयोरीश्वरेयोगवृत्त्याप्युरस्यत्वादंतस्थत्वादीनांच तत्रसंभवादित्याह। साक्षादपीति

साक्षात्पदस्यार्थमाह। विनैवेति। जाठराग्निसंबंधं विनेश्वरस्योपास्यत्वेपिशब्दात्यविरोधं जैमिनिर्मन्यतइत्यर्थः इदमंतस्थत्वमुदरस्थत्व
रूपंनोच्यते। किंतुनखादिशिखांतावयवसमुदायात्मकपुरुषशरीरे मूर्धादिचुबुकांतांगानिवृक्षेशाखावत्प्रतिष्ठितानि तेषुसंपन्नोवैश्वा

इत्युक्तमंतःप्रतिष्ठितत्वाद्यनुरोधेन इदानींतुविनैवप्रतीकोपाधिकल्पनाभ्यांसाक्षादपिपरमेश्वरोपासनपरिग्र
हेनकश्चिद्विरोधइतिजैमिनिराचार्योमन्यते ननुजाठराग्न्यपरिग्रहेंतःप्रतिष्ठितत्ववचनंशब्दादीनिचकारणानि
विरुध्येरन्निति अत्रोच्यते अंतःप्रतिष्ठितत्ववचनंतावन्नविरुध्यते नहीहपुरुषविधंपुरुषेंतःप्रतिष्ठितंवेदेतिजा
ठराग्न्यभिप्रायेणेदमुच्यते तस्याप्रकृतत्वादसंशब्दितत्वाच्च कथंतर्हियत्प्रकृतंमूर्धादिचुबुकांतेषुपुरुषावयवेषु
पुरुषविधत्वंकल्पितंतदभिप्रायेणेदमुच्यते पुरुषविधंपुरुषेंतःप्रतिष्ठितंवेदेति यथावृक्षेशाखांप्रतिष्ठितांपश्य-
तीतितद्वत्॥

नरःपुरुषेंतःप्रतिष्ठितइत्युच्यते अतोयथाशाखास्थस्यपक्षिणोवृक्षांतस्थत्वंतथावैश्वानरस्यपुरुषांतस्थत्वमित्याह॥ ॥

नहीह पुरुषविधमित्यादिना अग्न्यादिशब्दस्येश्वरवाचित्वाज्जाठराग्नेरसंशब्दितत्वं अग्नेश्वरस्य पुरुषावयवेषु संपादनात्पुरुषविधत्वमंतस्थत्वंचेत्यर्थः॥
पक्षांतरमाह अथवेति पुरुषविधत्वंपूर्ववदंतस्थत्वंमध्यस्थत्वंसाक्षित्वमित्यर्थः एवमंतस्थत्वमीश्वरेव्याख्यायशब्दादीनिव्याचष्टे निश्चितेचेति विश्व

अथवायः प्रकृतः परमात्माध्यात्ममधिदैवतंचपुरुषविधत्वोपाधिः तस्ययत्केवलंसाक्षिरूपं
तदभिप्रायेणेदमुच्यते पुरुषेंतः प्रतिष्ठितंवेदेति निश्चितेश्च पूर्वापरालोचनवशेन परमात्मपरि
ग्रहेतद्विषयएववैश्वानरशब्दः केनचिद्योगेनवर्तिष्यते विश्वश्चायंनरश्चेतिविश्वेषांवायंनरोवि
श्वेषानराअस्येतिविश्वानरः परमात्मासर्वात्मत्वात् विश्वानरएववैश्वानरस्तद्धितोऽनन्यार्थोराक्षसवायसा
दिवत् अग्निशब्दोप्यग्रणीत्यादियोगाश्रयणेनपरमात्माविषयएवभविष्यति गार्हपत्यादिकल्प

श्चायंनरोजीवश्चसर्वात्मत्वात् विश्वेषांविकाराणांवानरः कर्ताविश्वेसर्वेनराजीवाअस्यात्मत्वेननियम्यत्वेनवासंतीतिविश्वनरः रक्षएवराक्षसइतिवत्

स्वार्थेतद्धितप्रत्ययः नरेसंज्ञायामिति पूर्वपदस्यदीर्घता अगिधातोर्गत्यर्थस्य निप्रत्ययांत स्यरूपमग्निरिति अंगयतिगमयत्यग्रंकर्मणःफलंप्रा-
पयतीति अग्निरग्रणीरुक्तः अभितोगच्छतीतिवाग्निः वैश्वानरोपासकस्यातिथिभोजनात्पूर्वंप्राणाग्निहोत्रंविद्यांगत्वेनविहितं तदर्थमग्निर्नेतादि

नंप्राणाहुत्यधिकरणत्वंचपरमात्मनोपिसर्वात्मत्वादुपपद्यते कथंपुनःपरमेश्वरपरि
ग्रहेप्रादेशमात्रश्रुतिरुपपद्यते इतितांव्याख्यातुमारभते। अभिव्यक्तेरित्याश्मरथ्यः
अतिमात्रस्यापिपरमेश्वरस्यप्रादेशमात्रत्वमभिव्यक्तिनिमित्तंस्यादभिव्यज्यते किल
प्रादेशमात्रपरिमाणःपरमेश्वरउपासकानांकृतेप्रादेशेषुहृदयादिषु उपलब्धिस्थाने
षुविशेषेणाभिव्यज्यते अतःपरमेश्वरेपिप्रादेशमात्रश्रुतिरभिव्यक्तेरुपपद्यतइत्याश्म-
रथ्यआचार्योमन्यते॥

कल्पनंप्रधानाविरोधेन नेतन्यमित्याह गार्हपत्येतिमात्रांपरिमाणमतिक्रांतोतिमात्रःतस्यविभोरित्यर्थः॥ ॥ ॥

उपासकानांकृतेनुग्रहाय प्रादेशमात्रोभिव्यज्यते प्रदेशेषु वा मीयते भिव्यज्यत इति प्रादेशमात्रः॥ मतांतरमाह अनुस्मृतेरिति प्रादेशेन मनसा मितः प्रा

देशमात्र इत्यर्थः यथाकथंचिदिति मनस्थं प्रादेशमात्रत्वं स्मृतिद्वारा स्मर्यमाणे कल्पितं श्रुतेरालंबनमित्यर्थः सूत्रस्यार्थांतरमाह प्रादेशेति संप्र

अनुस्मृतेर्बादरिः प्रादेशमात्रहृदयप्रति ष्ठेन चायं मनसानुस्मर्यते तेन प्रादेशमात्र इत्युच्यते यथा प्रस्थमिता

यवाः प्रस्था इत्युच्यंते तद्वत् यद्यपि च यवेषु स्वगतमेव परिमाणं प्रस्थसंबंधादभिव्यज्यते न चेह परमेश्वरगतं किं-

चित्परिमाणमस्ति यत् हृदयसंबंधादभिव्यज्येत तथापि प्रयुक्तायाः प्रादेशमात्रायाः श्रुतेः संभवति यथाकथंचि

दनुस्मरणमालंबनमित्युच्यते प्रादेशमात्रत्वेन वायमप्रादेशमात्रोप्यनुस्मरणीयः प्रादेशमात्रश्रुत्यर्थवत्तायैवम

नुस्मृतिनिमित्ता परमेश्वरे प्रादेशमात्रश्रुतिरिति बादरिराचार्यो मन्यते। संपत्तेरिति जैमिनिस्तथाहि दर्शयति।सं

पत्तिनिमित्ता वा स्यात् प्रादेशमात्रश्रुतिः कुतस्तथाहि समानप्रकरणं वाजसनेयिब्राह्मणं द्युप्रभृतीन् पृथिवीपर्यं

तान् त्रैलोक्यात्मनो वैश्वानरस्यावयवानध्यात्ममूर्धप्रभृतिचुबुकपर्यंतेषु देहावयवेषु संपादयन् प्रादेशमात्रसंपत्तिं

परमेश्वरस्य दर्शयति॥

तिश्रुत्युक्तां प्रादेशमात्रश्रुतेर्गतिमाह संपत्तेरिति। ब्राह्मणं पठति प्रादेशमात्रमिवेति अपरिच्छिन्नमपी

श्वरं प्रादेशमात्रत्वेन संपत्त्या कल्पितं सम्यग् विदितवंतो देवास्तमेवेश्वरमभिप्रत्यक्षेन संपन्नाः प्राप्तवंतो ह वै पूर्वकाले ततो वोयमध्यंतयाद्युप्रभृ ती

 नवयचान्वक्ष्यामियथाप्रादेशमात्रं प्रादेशपरिमाणमनतिक्रम्य मूर्धाधिध्यात्मां गेषु वैश्वानरं संपादयिष्यामीति प्राचीनशालादीन् प्रतिराजा प्रति
 ज्ञायस्वकीयमूर्धानमुपदिशन् करेणदर्शयन्नुवाच एषवैमेमूर्धा भूरादीन्लोकानतीत्य उपरिष्ठ तीत्यतिष्ठासौ द्युलोको वैश्वानरः तस्य मूर्धेतियाव
त् अध्यात्ममूर्धास्मिंदेशाधिदैवमूर्धासंपाद्यध्येयइत्यर्थः एवंचक्षुरादि प्रहनीयं स्वकीयचक्षुषी दर्शयन् एषवैसुतेजाः सूर्योवैश्वानरस्यचक्षुरित्य

प्रादेशमात्रमिवहवैदेवाः सुविदिताअभिसंपन्नास्तथातुवएतान्वक्ष्यामियथाप्रादेशमात्रमेवाभिसंपादयिष्यामी
तिसहोवाचमूर्धानमुपदिशन्नुवाचैषवाअतिष्ठावैश्वानरइतिचक्षुषीउपदिशन्नुवाचैषवैसुतेजावैश्वानरइतिनासिके
उपदिशन्नुवाचैषवैपृथग्वर्त्मात्मावैश्वानरः इतिमुख्यमाकाशमुपदिशन्नुवाचैषवैबहुलोवैश्वानरइतिमुख्याआपउपदिश
न्नुवाचैषवैरयिर्वैश्वानरइति चुबुकमुपदिशन्नुवाचैषवैप्रतिष्ठावैश्वानरइतिचुबुकमित्यधरंमुखफलकमुच्यते॥ ॥

वाच नासिकापदेनतन्निष्ठः प्राणोलक्ष्यते तस्मिन्नाध्यात्मिकप्राणेधिदैवप्राणस्यवायोर्दृष्टिमाह नासिकेइति अत्रसर्वत्रवैश्वानरशब्दस्तदंगपरः मु
खस्थंमुख्यं तस्मिन्नधिदैवंबहुलाकाशदृष्टिः मुखस्थलालारूपास्वप्सु रयिशब्दिततदीयवस्तिस्थोदकदृष्टिः चुबुकेप्रतिष्ठापादरूपापृथिवीद्र
ष्टव्या॥

ननुगुणवैषम्येणविद्ययोर्भेदात् अभिरहस्यश्रुत्यनुसारेणछांदोग्यस्थप्रादेशमात्रश्रुतिः कथंव्याख्येयेत्याशंक्याह। यद्यपीत्यादिना। एतावताल्प
वैषम्येण बहुतरप्रत्यभिज्ञासिध्दं विद्यैक्यंनहीयते शाखाभेदेपिसर्वशाखासुप्रतीयमानंवैश्वानराद्युपासनं एकइतिन्यायस्यवक्ष्यमाणत्वा

यद्यपिवाजसनेयके द्यौरतिष्ठात्वगुणासमाम्नायते आदित्यश्चसुतेजस्त्वगुणंछांदोग्येतु द्यौः सुतेजस्त्वगुणासमा
म्नायते आदित्यश्चविश्वरूपत्वगुणस्तथापिनैतावताविशेषेणकिंचि त्हीयते प्रादेशमात्रश्रुतेरविशेषात्सर्वशाखा
प्रत्ययत्वाच्च संपत्तिनिमित्तांप्रादेशमात्रश्रुतिंयुक्ततरांजैमिनिराचार्योमन्यते। आमनंतिचैनमस्मिन्। आमानंतिचैनं
परमेश्वरमस्मिन्मूर्धचुबुकांतरालेजाबालाः यएषोनंतोव्यक्तआत्मासोविमुक्तेप्रतिष्ठितइति सोविमुक्तः कस्मिन्प्रतिष्ठि
तइ ति वरणायांनास्यांचमध्येप्रतिष्ठितइतिकाचैवरणाकाचनासेति तत्रेमामेवनासिकांवरणानासीतिनिरुच्यसर्वाणीइंद्रि
यकृतानिपापानिवारयति सावरणासर्वाणींद्रियकृतानि पापानिनाशयति सानासीतिपुनरामनंतिकतमच्चास्यस्थानंभव
तीतिभ्रुवोर्घ्राणस्यचयः संधिः सएषद्युलोकस्यपरस्यचसंधिर्भवतीतितस्मादुपपन्नापरमेश्वरेप्रादेशमात्रश्रुतिः अभिवि
मानश्रुतिः प्रत्यगात्मताभिप्रायाप्रत्यगात्मतयासर्वैः प्राणिभिरभिविनीमय इत्यभिविमानः अभिगतोवायंप्रत्यगात्मत्वात्

च अतिष्ठात्वगुणश्छांदोग्यउपसंहर्तव्यः विश्वरूपत्वगुणश्चवाजसनेयिभिर्ग्राह्यस्तथाचद्युसूर्ययोः सुतेजस्त्वंसममतिष्ठात्वविश्वरूपत्वयोर्व्यव
स्या॥

यद्वाशाखाभेदेनगुणव्यवस्थानतुविद्याभेदइतिभावः॥प्रादेशत्वस्यसंपत्तिमयुक्तत्वेश्रुत्यंतरंसंवादयति। आमनंतीति। यएषोनंतोपरिच्छि-
न्नअनोव्यक्तोदुर्विज्ञेयस्तंकथंजानीयामित्यत्रेः प्रश्नेयाज्ञवल्क्यस्योत्तरंसईश्वरोविमुक्तेकामादिभिर्बध्देजीवेभेदकल्पनयाप्रतिष्ठितउपास्यः
पुनरत्रिप्रश्नः सइत्युत्तरंवरणायामितिएवंप्रश्नोत्तरेअग्रेपिज्ञेयेतत्रचश्रुतौइमामेवभ्रूसहितांनासिकांनिरुच्येति भाष्ययोजनासर्वानिंद्रियकृ
तान् दोषान्वारय तीतिवरणाभ्रूःसर्वान्दोषान्नाशयतीतिनासीनासिकेतिनिर्वचनंनासाभ्रुवोर्जीवद्वारेश्वरस्थानत्वध्यानात् पापवारकत्वंइ

विमानश्चमानवियोगात् इत्यभिविमानोभिविमिमीतेवासर्वंजगत् कारणत्वादित्यभिविमानस्तस्मात्परमेश्वरोवै
श्वानरइतिसिध्दं॥ ॥इतिश्रीमच्छंकरभगवत्पादकृतौशारीरकमीमांसाभाष्येप्रथमाध्यायस्यद्वितीयःपादः॥२॥

तिमंतव्यंतयोर्मध्येपिविशिष्यजीवस्यस्थानंपृच्छति। कतमदिति। भ्रुवोरित्युत्तरंप्राणस्येतिपाठेपिप्राणस्येत्यर्थः सएषसंधिर्द्युलोकस्य
स्वर्गस्यचब्रह्मलोकस्यसंधित्वेनध्येयइत्याह। सएषइति। आभिमुख्येनाहंब्रह्मेतिविमीयतेज्ञायतेइत्यभिमानः प्रत्यगात्माअभिमतश्चासौ
विमानश्चसर्वस्वरूपत्वेसत्यानंत्यात् मानमत्रपरिमाणंअभिविमीतेनिर्मिमीतेतस्माद्वैश्वानरवाक्यंउपास्येब्रह्मणिसमन्वितमितिसिद्धं ३४
॥ ॥इतिश्रीमच्छारीरकव्याख्यायांभाष्यरत्नप्रभायांप्रथमाध्यायस्यद्वितीयःपादःसमाप्तः॥२॥ ॥ ॥

